# DHARMAKUTAM

## VOL. III.

# AYODHYAKANDA

## PART II

**TRYAMBAKARAYA MAKHI.**

SRIRANGAM:
SRI VANI VILAS PRESS.
1926.

॥ श्रीः ॥

# ॥ धर्माकूतम् ॥

तञ्जानगराधीशस्यैकोजिमहाराजस्य मन्त्रिणो गङ्गाधरा-

ध्वरिणः पुत्रेण शहजिशरभोजिमहीपालयोरमात्येन

**त्र्यम्बकरायमखिना**

विरचितम् ।

## २. अयोध्याकाण्डः

( द्वितीयो भागः )

श्रीरङ्गम्

श्रीवाणीविलासमुद्रायन्त्रालयः ।

॥ श्रीः ॥

# ॥ धर्माकूतम् ॥

## ॥ अयोध्याकाण्डः ॥

### ॥ द्वितीयो भागः ॥

—*—

चतुःपञ्चाशे— 'ततः काल्यमुत्थाय कृतपूर्वाह्णिकौ रामलक्ष्मणौ विविधवृक्षवीरुत्परिवृतान्रुरुवराहादिसमाकीर्णान्देशांश्चातिक्रम्य वारिघट्टनधूमस्तोमादिश्रवणदर्शनादिना इत एवाविदूरे भरद्वाजाश्रम इत्यवधार्य तदाश्रममागात् ।

ततस्त्वाश्रममासाद्य मुनेर्दर्शनकाङ्क्षिणौ ।
सीतयानुगतौ वीरौ दूरादेवावतस्थतुः ॥

स प्रविश्य महात्मानमृषिं शिष्यगणैर्वृतम् ।
संशितव्रतमेकाग्रं तपसा लब्धचक्षुषम् ॥
हुताग्निहोत्रं दृष्ट्वैव महाभागं कृताञ्जलिः ।
रामः सौमित्रिणा सार्धं सीतया चाभ्यवादयत् ॥

अत्र रामेण अग्निहोत्रसमये दूरेऽवस्थाय हुताग्निहोत्रस्य ऋषेर्नमस्कारकरणं कर्मकालेऽभिवादननिषेधेन तद्दर्शनसमनन्तरमेव स्वेनाभिवादनस्य कर्तुमशक्यतया, ऋषेश्चातिथ्यभ्यनुज्ञापूर्वकं होमः कर्तव्य इत्येतादृशोपरोधपरिहाराय चेति द्रष्टव्यम् । तथा चापस्तम्बः— 'यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्, स्वयमेनमभ्युदेत्य प्रब्रूयाद्व्रात्यातिसृज होष्यामीत्यतिसृष्टेन होतव्यम् । अनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाह' इति । कर्मकालेऽभिवादननिषेधः प्रागेवाभिहितः 'जपं होमं च कुर्वाणो नाभिवाद्यस्तथा द्विजः' इति । ततः कृताग्निहोत्रं भरद्वाजमभिवाद्य ससीतः सलक्ष्मणो रामः स्वागमनवृत्तान्तं महर्षये भरद्वाजाय कथयामास ।

तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ।
उपानयत धर्मात्मा गामर्घ्यमुदकं ततः ॥

नानाविधानन्नरसान्वन्यमूलफलाश्रयान् ।
तेभ्यो ददौ तप्ततपा वासं चैवाप्यकल्पयत् ॥

अनेन ब्राह्मणेनापि राज्ञां मधुपर्कादिना पूजा कर्तव्येति सूचितम् । तथा चाश्वलायनः—'ऋत्विजो वृत्वा मधुपर्कमाहरेत् स्नातकायोपस्थिताय राज्ञे चाचार्याय च श्वशुरपितृव्यमातुलानां च' इति । छन्दोगानां गृह्येऽपि 'आचार्य ऋत्विक् स्नातको राजा विवाह्यः प्रिय इति षडर्घ्याः प्रतिवत्सरमर्हयेत् पुनर्यज्ञविवाहयोश्च' इति । बोधायनोऽपि 'अथैते अर्घ्याः ऋत्विक् श्वशुरः पितृव्यो मातुल आचार्यो राजा प्रियो वरोऽतिथिः संवत्सरपर्यागतेभ्य एतेभ्य एव कुर्याद्विवाहे वराय ऋत्विग्भ्यः कर्मणि कर्मणि ददाति ।' मनुरपि—'राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केण परिसंवत्सरान्पुनः ॥' गौतमोऽपि—'ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्कः संवत्सरे पुनः पूजिताः यज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्याश्रोत्रियस्यासनोदके' इति । अस्यायमर्थः—प्रथमं स्वगृहमागतानामृत्विगादीनां मधुपर्कः कर्तव्यः संवत्सरानन्तरं तु पुनरा-

गमनेऽपि कर्तव्य एव यज्ञविवाहयोस्तु संवत्सरात्प्रागपि पुनरागतानां मधुपर्कः श्रोत्रियस्य राज्ञस्तु प्रत्यागमनं मधुपर्कः अश्रोत्रियस्य तु राज्ञः आसनोदकादिकमेवेति। तम: प्रयागकृतावासो भरद्वाजः रामभद्रम्,

अवकाशो विविक्तोऽयं महानद्योः समागमे।
पुण्यश्च रमणीयश्च वसत्विह भवान्सुखम्॥

इत्यवादीत्। प्रयागस्य पुण्यत्वं च वनपर्वणि धौम्यः— 'गङ्गायमुनयोर्वीर संगमं लोकविश्रुतम्। यत्रायजत भूतात्मा पूर्वमेव पितामहः॥ प्रयागमिति विख्यातं तस्माद्भरतसत्तम।' पुलस्त्यतीर्थयात्रायाम्— 'ततो गच्छेत राजेन्द्र प्रयागमृषिसंस्थितम्। यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः॥ लोकपालाश्च सिद्धाश्च नियताः पितरस्तथा। सरितः सागराश्चैव गन्धर्वाप्सरसस्तथा॥ हरिश्च भगवानास्ते प्रजापतिपुरस्कृतः। तत्र त्रीण्यग्निकुण्डानि तेषां मध्ये च जाह्नवी॥ प्रयागादपि निष्क्रान्ता सर्वतीर्थपुरस्कृता। तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता॥ यमुना गङ्गया सार्धं संगता लोकपावनी।

गङ्गायमुनयोर्मध्यं पृथिव्या जघनं स्मृतम् । प्रयागं जघनस्थानमुपस्थमृषयो विदुः ॥ प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ । तीर्थं भोगवती चैव वेदिः प्रोक्ता प्रजापतेः । तत्र वेदाश्च यज्ञाश्च मूर्तिमन्तो युधिष्ठिर ॥ प्रजापतिमुपासन्त ऋषयश्च महाव्रताः । यजन्ते क्रतुभिर्देवास्तथा सूर्यादयो नृप ॥ ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत । प्रयागं सर्वतीर्थेभ्यः प्रवदन्त्यधिकं विभो ॥ श्रवणात्तस्य तीर्थस्य नामसंकीर्तनादपि । मृत्तिकालम्भनाद्वापि सर्वपापैः प्रमुच्यते ॥ तत्राभिषेकं यः कुर्यात्संगमे संशितव्रतः । पुण्यं स महदाप्नोति राजसूयाश्वमेधयोः । एषा यजनभूमिर्हि देवानामपि सत्कृता । दत्तं तत्र स्वल्पमपि महद्भवति भारत । चातुर्विध्ये च यत्पुण्यं सत्यवादिषु चैव यत् ॥ स्नात एव तदाप्नोति गङ्गायमुनसंगमे । दश तीर्थसहस्राणि षष्टिकोट्यस्तथापराः । एषां सांनिध्यमत्रैव कीर्तितं कुरुनन्दन । न वेदवचनात्तात न लोकवचनादपि ॥ मतिरुत्क्रमणीया ते प्रयागे मरणं प्रति । एतदुपष्टम्भिका श्रुतिरपि 'सितासिते सरितौ यत्र संगते तत्र प्लुतासो दिवमुत्पतन्ति एवैतन्वां विसृजन्ति धीरास्ते

जनासोऽमृतत्वं भजन्ते' इति । कालिदासोऽपि—
'समुद्रपत्न्योर्जलसंनिपाते पूतात्मनां तत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि सद्यस्तनुत्यजां नास्ति शरीर-
बन्धः ॥' प्राचीना अपि— 'मा गर्वीरश्वमेधिन्मखकु-
हमिति ब्रह्महन्मा च भैषीर्ब्रह्मघ्नोऽस्मीति पुण्ये महति
च दुरिते को मदः का च भीतिः । माघे मासि प्रयागे
मकरगतरवौ मज्जतां सज्जनानां यद्गिन्दुर्वा धुनीते
मदमपि भयमप्यत्र वेदाः प्रमाणम् ॥' इति । ततः
प्रेक्षकागमनशङ्कया नाविदूरेऽस्माकं वासो युक्ततरः—

एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम् ।
रमते यत्र वैदेही सुखार्हा जनकात्मजा ॥

इति वदन्तं रामभद्रं भरद्वाजः समभाषत—

दशक्रोश इतस्तात गिरिर्यस्मिन् निवत्स्यति ।
महर्षिसेवितः पुण्यः सर्वतः सुखदर्शनः ॥

चित्रकूट इति ख्यातो गन्धमादनसंनिभः ।
यावता चित्रकूटस्य नरः शृङ्गाण्यवेक्षते ॥

कल्याणानि समाधत्ते न पापे कुरुते मनः ।
ऋषयस्तत्र बहवो विहृत्य शरदां शतम् ॥

तपसा दिवमारूढाः कपालशिरसा सह ।
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् ॥

इति । चित्रकूटमहिमातिशयः भारते वनपर्वणि— 'ततो गिरिवरश्रेष्ठ चित्रकूटे विशांपते । मन्दाकिनीं समासाद्य नदीं पापप्रमोचनीम् ॥ तत्राभिषेकं कुर्वाणः पितृदेवार्चने रतः । अश्वमेधमवाप्नोति गतिं च परमां व्रजेत् ॥' ततो महर्षिकृतविविधोपचारैः सकलर्षिकथित- विविधकथाश्रवणेन च संजातविस्मयो रामभद्रः,

भरद्वाजाश्रमे रम्ये तां रात्रिमवसत्सुखम् ।

पञ्चपञ्चाशे—ततः प्रभाते कृतपूर्वाह्णिकौ रामलक्ष्मणौ ऋषिमभिवाद्य तदुपदिष्टमार्गेणैव गच्छन्तावासाद्य कलिन्दनन्दिनीम् ,

तौ काष्ठसंघाटमथो चक्रतुस्तु महाप्लवम् ।
शुष्कैर्वंशैः समास्तीर्णमुशीरैश्च समावृतम् ॥

आरोप्य सीतां प्रथमं संघाटं परिगृह्य तौ ।

ततः प्रतेरतुर्यत्तौ वीरौ दशरथात्मजौ ॥

अनेन बाहुभ्यां नदीतरणं न कर्तव्यम् इति सूचितम्। तथा चापस्तम्बः— 'वर्जयेद्बाहुभ्यां च नदीतरणं नावं च सांशयिकीम्।' मनुरपि 'न बाहुभ्यां नदीं तरेत्' इति। अथ महता प्लवेन समुत्तीर्य यमुनाम्,

न्यग्रोधं तमुपागम्य वैदेही वाक्यमब्रवीत्।
नमस्तेऽस्तु महावृक्ष पारयेन्मे व्रतं पतिः ॥

कौसल्यां चैव पश्यामः सुमित्रां च यशस्विनीम्।
इति सीताञ्जलिं कृत्वा पर्यगच्छद्वनस्पतिम् ॥

अनेन मार्गस्थितो महान्वनस्पतिः नमस्कारादिपूर्वकं प्रार्थनीय इति सूचितम्। तथा चापस्तम्बः— 'अर्थप्राध्वस्य परिप्लवे परिकाशने च अप उपस्पृश्य उत्तरे यथालिङ्गं जपेत्। एवमुत्तरैर्यथालिङ्गं चित्रियं वनस्पतिं शकृद्वीर्तिं स्विग्वातं शकुनिमिति। अनानाकुला— अध्वानं प्रस्थितः प्राध्वः अर्थः प्रयोजनं यत्किञ्चित्प्रयोजनमुद्दिश्य योऽध्वानं प्रस्थितः तस्य अर्थप्राध्वस्य परिप्लवे परितः सर्वतः स्थितैर्जनैः प्लवे प्लुते परिकासने सर्वतो

विद्यमानैः निष्ठीवने च अप उपस्पृश्य प्रायश्चित्ततया अनुहवं परिहवं परीवादं परिक्षवं दुःस्वप्नं दुरुदितं तद्द्विषद्भ्यो दिशाम्यहम् अनुहूतं परिहूतं शकुनेर्यदशाकुनं मृगस्य सृतमक्ष्णा या तद्द्विषद्भ्यो दिशाम्यहमिति जपेत् तत्र पृष्ठ आह्वानमनुहवः सर्वत आह्वानं परिहवः परिवादोऽभिशंसनं परिक्षव उक्तः दुःस्वप्नः प्रसिद्धः दुरितमल्पायुरादि अनुहूतं परिहूतमिति शकुनेरशोभनवागुच्यते । अशाकुनं अनिमित्तं भूतं मृगस्य सृगालादेः अक्ष्णया सृतं तिर्यग्गमनमपसव्यादि । एतेषामेकस्मिन्नपि निमित्ते द्वयोरपि मन्त्रयोर्जपः कार्यः । एवमुत्तरैर्यथालिङ्गं चित्रियं वनस्पतिं शकृद्रीतिं स्रिग्वातं शकुनिमिति । एवमित्यनेन अर्थप्राध्यस्येति च अप उपस्पृश्येति च जपेत् इति चापेक्षते चित्रियः प्रसिद्धो वनस्पतिः तमासाद्य अप उपस्पृश्य आसते अग्निरस्त्वारात्परशुरस्तु ते निवाते त्वाभिवर्षतु स्वस्ति तेऽस्तु वनस्पते' इति ऋचानुमन्त्रयते । नमः शकृत्सद इति शकृद्रीतिशकृतो रेखां उपतिष्ठते स्रिगसीति स्रिग्वातं वाससा कृतो वातः स्रिग्वातः तमन्यकृतमात्मस्पृष्टं उपतिष्ठते शकुनिं शुभवाचं पक्षिणं उद्गातेव शकुने साम

गायत्रीति ऋचा उपतिष्ठते। अशुभवचने प्रागुक्त अनु-हवमित्यादिमन्त्रद्वयजपः इति। ततो यमुनावनस्थितै-र्विचित्रफलपुष्पादिभिर्जानकीमनो विनोदयन्संहृत्य मृगच-तुष्टयमादाय च तदामिषं अस्ताचलमारूढमंशुमन्तं चाव-लोक्य,

समं नदीवप्रमुपेत्य संमतं
निवासमाजग्मुरहीनदर्शनाः।

षट्पञ्चाशे— ततः प्रभाते कृतपूर्वाह्णिको रामभद्रः महर्षिसमादिष्टेन मार्गेण रमणीयतरं चित्रकूटमासाद्य तत्र स्थितं कुलपतिं भगवन्तं वाल्मीकिमभिवाद्य,

बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे।
अयं वासो भवेत्तावद्वयं यत्र रमेमहि।
मुनयश्च महाभागा वसन्त्यस्मिञ्शिलोच्चये॥

इति प्रार्थितवान्। अनेन एतादृश एव देशे वासः कर्तव्य इति सूचितम्। तथा च गौतमः— 'एधोदकय-वसकुशमाल्योपनिष्क्रमणमार्यजनभूयिष्ठमनलससमृद्धं धा-र्मिकाधिष्ठितं निकेतमावसितुं यतेत' इति। ततो लक्ष्म-णेन विधिवन्निर्मितां पर्णशालामवलोक्य,

ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम्।
कर्तव्यं वास्तुशमनं सौमित्रे चिरवासिभिः॥

कर्तव्यः शास्त्रदृष्टो हि विधिधर्ममनुस्मरन्।
ऐणेयं श्रपयस्वैतच्छालां यक्ष्यामहे वयम्॥

त्वर सौम्य मुहूर्तोऽयं ध्रुवश्च दिवसो ह्ययम्।

इति रामभद्रः समादिदेश। ततो लक्ष्मणेन समाहृतमैणेयं मांसं सुनिष्टप्तमवलोक्य रामः,

संग्रहेणाकरोत्सर्वान्मन्त्रान्सत्रावसानिकान्।
इष्ट्वा देवगणान्सर्वान्विवेश सदनं शुचिः॥

वैश्वदेवबलिं कृत्वा रौद्रवैष्णवमेव च।
वास्तुसंशमनीयानि मङ्गलानि प्रवर्तयन्॥

जपं च न्यायतः कृत्वा स्नात्वा नद्यां यथाविधि।
पापसंशमनं रामश्चकार बलिमुत्तमम्॥

वेदिस्थलविधानानि चैत्यान्यायतनानि च।
आश्रमस्यानुरूपाणि स्थापयामास राघवः॥

वन्यैर्माल्यैः फलैर्मूलैः पक्वैर्मांसैर्यथाविधि।
अद्भिर्जपैश्च वेदोक्तैर्दर्भैश्च ससमित्कुशैः॥

तौ तर्पयित्वा भूतानि राघवौ सह सीतया ।
तदा विविशतुः शालां सुशुभां शुभलक्षणौ ॥

स रम्यमासाद्य तु चित्रकूटं
नदीं च तां माल्यवतीं सुतीर्थाम् ।
ननन्द रामो मृगपक्षिजुष्टां
जहौ च दुःखं पुरविप्रवासात् ॥

अत्र विधिवद्गृहं निर्माय वास्तुशमनभूतबलिप्रदानादिपूर्वकं स्थिरे मुहूर्ते प्रवेशः कर्तव्य इति सूचितम् । तथा चाश्वलायनः— 'अथो वास्तुपरीक्षा अनूषरमविवदिष्णुभूमौषधिवनस्पतिमत् यस्मिन्कुशवीरणं प्रभूतं कण्टकिक्षीरिणस्तु सामूलान्परिखायोद्वासयेदपामार्गः शाकस्तिल्वकः परिव्याध इति चैतानि यत्र सर्वत आपो मध्यं समेत्य प्रदक्षिणं शयनीयं परीत्य प्राच्य स्यन्देरन्नप्रपतत्वस्तत्सर्वसमृद्धं समवस्रवे भक्तशयनं कारयेद्ध्रुवं ह भवति । दक्षिणाप्रवणे सभां समापयेत्सा द्यूताहि भवति युवानस्तस्यां कितवाः कलहिनः प्रमायुका भवन्ति यत्र सर्वत आपः प्रस्कन्देरन्सा स्वस्त्ययनी अद्यूता च अथैतैर्वास्तु परीक्षेत जानुमात्रं गत्वा खात्वा तैरेव पांसुभिः

परिपूरयेत् अधिके प्रशस्तं समे वा तन्न्यूने गर्हितम्। अस्तमिते अपां पूर्णं परिवासयेत्सोदके प्रशस्तम्, आर्द्रे वातशुष्के गर्हितम्। श्वेतं मधुरास्वादं सिकतोत्तरं ब्राह्मणस्य लोहितं क्षत्रियस्य पीतं वैश्यस्य तत्सहस्रसीतकृत्वा यथा दिक् समचतुरस्रं मापयेत्। आयतचतुरश्रं वा तच्छमी-शाखयोदुम्बरशाखया च शन्तती येन त्रिः प्रदक्षिणं परिव्रजन्प्रोक्षत्यविच्छिन्नया चोदकधारया आपो हिष्ठा मयो भुव इति ऋचा वंशान्तरेषु शरणानि कारयेद्गर्तेष्ववक्रां शीफालमित्यवधापयेन्नास्पदाहुको भवतीति शीफालं मध्यस्थूणाया गर्ते आधाय प्रागग्रोदगग्रान्कुशानास्तीर्य व्रीहिमतीरप आसेचयेदच्युताय भौमाय स्वाहेति। अथै-नामुच्छ्रीयमाणमनुमन्त्रयेत इहैव तिष्ठ निमिता तिला-स्त्वामिरावतीं मध्ये पोषस्व तिष्ठन्तीं मा त्वा प्रापं नघा पचः आ त्वा कुमारस्तरुण आ वत्स्यो जयता सह आ त्वा परिश्रितः कुम्भ आ दध्नः कलशौ रयमिति वंशमाधीय-मानम् ऋतेन स्थूणामधिरोह वंशद्राघीय आयुः प्रातरं दधाना' इति सुदूर्वासु चतसृषु शिलासु मणिकं प्रतिष्ठा-पयेत्पृथिव्या अधिसंभवेति अरङ्करो वा वदन्तीति वा

अथास्मिन्नम आसेचयेदेतु राजा वरुणो रेवतीभिरस्मि-न्स्थाने तिष्ठतु मोदमानः। इरां वहतो घृतमुक्षमाणा मित्रेण साकं सह संविशन्तु इति। अथैनच्छमयति व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय शन्तातीयेन त्रिः प्रदक्षिणं परिव्रजन्प्रोक्षति अविच्छिन्नया चोदकधारया आपो हि ष्ठा मयोभुव इति तृचेन मध्येऽगारस्य स्थालीपाकं श्रपयित्वा वास्तोष्पते प्रतिजानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वा ब्राह्मणान्भोजयित्वा शिवं वास्त्विति वाचयीतोक्तं गृहप्रदनं बीजवतो गृहान् प्रपद्येत' इति। आपस्तम्बोऽपि 'दक्षिणात्प्रत्यक् प्रवणमवगारावकाशामुद्धृत्य पालाशेन शमीमयेन वो दूरे चैतामेव दिशमुत्तरयो दूहत्येवं एवं त्रिः क्लृप्तमुत्तरयाभिमृश्य प्रदक्षिणं स्थूणागर्तान् खनयित्वाभ्यन्तरं पांसूनुदुप्य उत्तराभ्यां दक्षिणां द्वारस्थूणामवदधाति एवमुत्तरां यथाखातमितरा अन्ववधाय वंशमाधीयमानमुत्तरेण यजुषाभिमन्त्रयते मितमुत्तरैर्यथालिङ्गं पालाशं शमीमयं वेध्ममादीय उत्तरयाग्निमुद्धृत्य उत्तरेण यजुषागारं प्रपाद्य उत्तरपूर्वदेशेऽगारस्योत्तरयाग्निं प्रतिष्ठापयन्ति। तस्माद्दक्षिणमुदधानायतनं

भवति तस्मिन्विषूचीनाग्रान्दर्भान्संस्तीर्य तेषूत्तरया व्रीहियवान्युप्य तत्रोदधानं प्रतिष्ठापयति तस्मिन्नुत्तरेण यजुषा चतुर उदकुम्भानानयति दीर्णमुत्तरयानुमन्त्रयते अग्नेरुपसमानाद्याज्या भागान्त उत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा उत्तरेण यजुषोदकुम्भेन त्रिः प्रदक्षिणमुत्तरतोऽगारं निवेशनं वा परिषिच्य ब्राह्मणान्भोजयेदपूपैः सक्तुभिरोदनेन इति । छन्दोगब्राह्मणेऽपि 'अथातो वास्तुशमनं प्रदक्षिणं प्रतिदिशं रज्ज्वा यच्छेत् अवान्तरदेशेषु च यत्राभिसमेयुस्तत्रोपलिम्पेत् रज्ज्वन्तेषु शमीपलाशश्रीपर्णीनां पत्रैर्वास्तूय किरेत् अक्षतैश्च सुमनोभिश्च पूर्वैः प्रोष्ठपदैर्गृहे अग्निं प्रतिष्ठाप्य धानावन्तं करम्भिणमित्येतद्गीत्वा पायसमग्नौ जुहुयात्परेषां च पलाशपर्णमध्यमेषु बल्युपहारः प्रजापतये स्वाहेति मध्य उपहरेत् इन्द्रायेति पुरस्तात् वायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इति अवान्तरदेशे वरुणायेति पश्चात् महाराजायेति अवान्तरदेशे सोमायेत्युत्तरतः महेन्द्रायेत्यवान्तरदेशे वासुकय इत्यधस्तात् ऊर्ध्वं नमो ब्रह्मण इति दिवि बहुपशुधनधान्यं हिरण्यमायुष्मत्पुरुषं

वीरसूः सुभगा विधवश्रीकं शिवं पुण्यं वास्तु भवति चतुर्षु मासेषु प्रयोगः संवत्सरे पुनः प्रयोगः इति । खादिरगृह्येऽपि 'गौरे भूमिभागे ब्राह्मणः लोहिते क्षत्रियः कृष्णे वैश्यः अवसानं जोषयेत्समं लोमशमनिरिणमशुष्कं यत्रोदकं प्रत्यगुदीचीं प्रवर्तते क्षीराः कण्टकिनः कटुकाश्च अत्रौषधयो न स्युः संमितं ब्रह्मवर्चस्यं बृहत्तृणैर्बल्यं मृदुतृणैः पशव्यं शक्ताभिर्मण्डलद्वीपिभिर्वा यत्र वा स्वयं कृत्वा श्वभ्राः सर्वतोऽभिमुखाः स्युः । प्राग्द्वारं धन्यं यशस्यं चोदग्द्वारं पुत्रियं पशव्यं च दक्षिणद्वारे सर्वे कामाः अनुद्वारं गेहद्वारं अरालोकी पायसो हविः कृष्णा च गौः अजो वा श्वेतः पायस एव वा मध्ये वेश्मनो वसन् पायसं चाज्येन मिश्रमष्टगृहीतं जुहुयात् वास्तोष्पत इति । याश्च पराः सप्तालक्ष्मी निर्णोदे ताभिश्च हुत्वा दिशां बलीन्नयेत् । अवान्तरदेशोर्ध्वमासां चैवं संवत्सरे संवत्सरे इति ॥ सप्तपञ्चाशाष्टपञ्चाशयोः, ततो गङ्गावतरणभरद्वाजाभिगमनपर्णशाला निर्माणादिकं सर्वं गुहमुखेन विज्ञायापृच्छ्य च गुहं रथवरमास्थाय ततः सायाह्नसमये तृतीयेऽहनि सारथिः,

अयोध्यां समनुप्राप्य निरानन्दां ददर्श सः ।

ततः पुत्रशोकाकुलं राजानमभिवाद्य रामलक्ष्मणसंदेशमेवमकथयत् ।

सूत मद्वचनात्तस्य तातस्य विदितात्मनः ।
शिरसा वन्दनीयस्य वन्दे पादौ पुनः पुनः ॥
सर्वमन्तःपुरं वाच्यं सूत मद्वचनात्त्वया ।
आरोग्यमविशेषेण यथार्हमभिवादनम् ॥
माता च मम कौसल्या कुशलं चाभिवादनम् ।
अप्रमादं च वक्तव्या ब्रूयाश्चैनामिदं वचः ॥
देवि देवस्य पादौ च देववत्परिपालय ।
कुमारे भरते वृत्तिर्वर्तितव्या च राजवत् ॥
भरतः कुशलं वाच्यो वाच्यो मद्वचनेन च ।
अतिक्रान्तवया राजा मा स्मैनं त्वमुपारुधः ॥
मातेव मम माता ते द्रष्टव्या पुत्रगर्धिनी । इति ।

लक्ष्मणोऽपि लघुतरकैकेयीशासनमात्रेण रामविवासनं सर्वथानुचितमेव निर्दुष्टं सर्वप्रजाभिरामं रामं प्रव्राज्य,

सर्वलोकं विरुध्येमं कथं राजा भविष्यसि ।

इत्यवादीत्। अनेन सकलजनोद्वेगकरो राजा राज्यं न प्राप्नोत्येव, कथंचित्प्राप्तराज्योऽपि तस्माद्भ्रश्यतीति सूचितम्। तथा चोद्योगपर्वणि— 'यस्मात्ते यान्ति भूतानि मृगव्याधान्मृगा इव। सागरान्तामपि महीं लब्ध्वा स परिहीयते ॥' एकोनषष्टितमे—ततस्तद्वचनसमाकर्णनसमाकुलहृदयो राजा सुमन्त्रमेवमवोचत्—

कैकेय्या विनियुक्तेन पापाभिजनभावया।
मया न मन्त्रकुशलैर्वृद्धैः सह समर्थितम् ॥
न सुहृद्भिर्न चामात्यैर्मन्त्रयित्वा न नैगमैः।
मयायमर्थः संमोहात्स्त्रीहेतोः सहसा कृतः ॥
भवितव्यतया नूनमिदं वा व्यसनं महत्।
कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया ॥

अनेन मन्त्रिपुरोहितसुहृज्जनैरनालोच्य स्वेनैव विचार्य करणे महाननर्थो भवतीति सूचितम्। तथा च सभापर्वणि युधिष्ठिरं प्रति चतुर्दशराजदोषेषु एकचिन्तनमपि परिगणितं नारदेन— 'नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम्। अदर्शनं ज्ञानवतामालस्यं क्षिप्रचित्तताम् ॥

एकचिन्तनमर्थानामनर्थैश्च चिन्तनम् । निश्चितानामनारम्भो मन्त्रस्यापरिरक्षणम् ॥ माङ्गल्यस्याप्रयोगश्च प्रसङ्गो विषयेषु च । कच्चित्त्वं वर्जयेरेतान्राजदोषांश्चतुर्दश ॥ प्रायशो यैर्विनश्यन्ति कृतमूलाश्च पार्थिवाः ॥' इति ।

लोहिताक्षं महाबाहुमामुक्तमणिकुण्डलम् ।
रामं यदि न पश्येयं गमिष्यामि यमक्षयम् ॥

अतो नु किं दुःखतरं योऽहमिक्ष्वाकुनन्दनम् ।
इमामवस्थामापन्नो नेह पश्यामि राघवम् ॥ इति ॥

षष्टितमे— ततो दशरथकृतविविधपरिदेवनश्रवणचकितहृदया कौसल्यापि,

नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः ।
तान्विना क्षणमप्यत्र जीवितुं नोत्सहे ह्यहम् ॥
अथ तान्नानुगच्छामि गमिष्यामि यमक्षयम् ।

इति सुमन्त्रं प्रार्थयामास । सूतोऽपि कौसल्यां बहुविधं सान्त्ववचनैः सान्त्वयन्नेवमब्रोचत् ।

व्यवधूय च संतापं वने वत्स्यति राघवः ।
लक्ष्मणश्चापि रामस्य पादौ परिचरन्वने ॥

आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ।
विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ॥
विस्रम्भं लभतेऽभीता रामे संन्यस्तमानसा ।
सदृशं शतपत्रस्य पूर्णचन्द्रोपमप्रभम् ॥
वदनं तद्वदान्याया वैदेह्या न विकम्पते ।
न शोच्यास्ते न चात्मा ते न च शोच्यो नराधिपः ॥
इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वती ॥ इति ।

अनेन चिरकालावस्थायियशःसंपादकः क्लेशो न शोच्य इति सूचितम् ॥ एकषष्टितमे— ततः कौसल्या सुमन्त्रकृतसान्त्वनशतमप्यनादृत्य धृतमुनिवेषं ससीतं राघवं वनगतं विचिन्त्योपभुज्य च शाल्यन्नं निविश्य च हंसतूलिकातल्पं समाकर्ण्य च श्रुतिसुखवीणावेणुमृदङ्ग-कलरवान्विहृत्य च हर्म्यप्रासादतलेषु सुकुमारो राजकुमारः कथमिदानीं विविधवृकवराहवनमहिषसिंहादिहिंस्रमृग-शताकीर्णे वने उपभुञ्जन्वन्यमाहारं संविशन् कठोरतर-पाषाणदन्तुरितदेशान् उपशृण्वन्हृदयविदारणविविधका-कघूकभेकादिशब्दाञ्शोकाकुलहृदयो रामभद्रः कां वा

वृत्तिं वर्तयेत् अथ क्लेशेन समाप्तवनवासः पञ्चदशे वर्षे पुनरागतः प्राज्ञेन भरतेन प्रतिदत्तमपि राज्यं नाङ्गीकरिष्यति ।

भोजयन्ति किल श्राद्धे केचित्स्वानेव बान्धवान् ।
ततः पश्चात्समीक्षन्ते कृतकार्या द्विजर्षभान् ॥
तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः ।
न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमाः ॥
ब्राह्मणेष्वपि तृप्तेषु पश्चाद्भोक्तुं द्विजर्षभाः ।
नाभ्युपैतुमलं प्राज्ञाः शृङ्गच्छेदमिवर्षभाः ॥

अत्र गुणवत्सु परेषु सत्सुताननादृत्य श्राद्धे बन्धूनां भोजनस्य अगुणवतां भोजनस्य च 'केचित्' इति पदेन अनादरप्रतिपादनात् अयमाचारः सर्वशास्त्रविगर्हित इति गुणवन्त एव परे भोजनीयाः तथा न पश्चात्तेऽभिमन्यन्त इत्यनेन श्राद्धशिष्टान्नभोजनमपि न कर्तव्यमिति सूचितम् । तथा च गुणवन्तः परे भोजनीया इत्यत्रापस्तम्बः 'प्रयतः प्रसन्नमनाः सृष्टः भोजयेद्ब्राह्मणान्ब्रह्मविदो योनिगोत्रमन्त्रान्ते वास्य संबन्धान्' इति ।

बोधायनोऽपि— 'ब्राह्मणानभिमन्त्रयेत योनिगोत्रश्रुत-वृत्तसंपन्नानसंबन्धान्' इति । गारुडपुराणेऽपि 'श्राद्धेषु विनियोज्यास्ते ब्राह्मणा वेदवित्तमाः । ये योनि-गोत्रमन्त्रान्ते वास्य संबन्धवर्जिताः ।' इति । बन्धु-मित्रादयो न भोजनीया इत्यत्र मनुस्मृतिरपि— 'यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च ॥ यः संगतानि कुरुते मोहाच्छ्राद्धे न मानवः । स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो नराधमः । संभोजिनी साभिहिता पिशाची दक्षिणा द्विजैः ॥ इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि । न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः । नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम् ।' इति । गुणवन्तो भोजनीया इत्यत्राश्वलायनः 'ब्राह्म-णाञ्श्रुतवृत्तशीलसंपन्नान् एकेन वा युक्तान्' इति । मनुरपि 'श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् । दातृप्रतिग्रही-तृंश्च कुरुते फलभागिनः । विदुषे दक्षिणा दत्त्वा विधिवत्प्रेत्य चेह च ॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् ।

पुष्कलं फलमाप्नोति नामन्त्रज्ञान्बहूनपि । यत्नेन भोज-
येच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगं वाप्यध्वर्युं
छन्दोगं वा समाप्तिगम् । येषामन्यतमो यस्य भुञ्जीत
श्राद्धमर्चितः । पितॄणां तस्य तृप्तिः स्याच्छाश्वती सप्त-
पौरुषम्' इति । याज्ञवल्क्योऽपि—'अग्रयाः सर्वेषु
वेदेषु श्रोत्रियो ब्रह्मविद्युवा । वेदार्थविद्द्विजश्रेष्ठः षडङ्गो
ज्येष्ठसामगः' इति । विष्णुः—'त्रिनाचिकेतास्त्रिमधुस्त्रि-
सुपर्णः षडङ्गवित् । वेदविच्छ्रोत्रियो योगी तथैव ज्येष्ठ-
सामगः' इति । गुणवतां परेषामलाभे बान्धवा भोजनीयाः।
तथा च विष्णुः—'ऋत्विक्स्वस्रीयदौहित्रजामातृश्वशुरा-
स्तथा । मातुलोऽथ तपोनिष्ठः पञ्चाग्न्यभिरतस्तथा ।
शिष्याः संबन्धिनश्चैव मातापितृरताश्च ये । एतान्नियोज-
येच्छ्राद्धे पूर्वोक्तानामसंभवे' इति । श्राद्धशेषं न भोक्त-
व्यम्; तथा चानुशासनिके—'सायंप्रातश्च भुञ्जीत नान्त-
राले समाहितः । अकाले न तु भुञ्जीत परश्राद्धे तथैव
च'। मार्कण्डेयः—'पित्रादीनामथान्येषां श्राद्धे शेषान्नभो-
जनम् । व्रतीनां विधवानां च यतीनां च विगर्हितम् ॥

श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः ।' अस्यापवादः, 'सगोत्राणां सकुल्यानां ज्ञातीनां च न दोषकृत् ।' जाबालिरपि— 'विप्रस्त्वन्यगृहश्राद्धे शेषान्नाद्भोजनं चरेत् । प्राजापत्यं विशुद्धिः स्यात् ज्ञातिगोत्रं न दोषकृत् ॥ श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः । ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य योगिनः । एतेषां श्राद्धशेषान्नं भुक्त्वा दोषं न विन्दति ।' इति ।

एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ।
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमंस्यते ॥

अनेन महान्तः अवमत्या प्राप्तं राज्यादिकमपि परित्यज्य मानमेव संरक्षयन्तीति सूचितम् । तथा चोद्योगपर्वणि— 'अवृत्तिभयमन्त्यानां मध्यानां मरणाद्भयम् । उत्तमानां तु मर्त्यानां अवमानात्परं भयम् ॥' इति ।

हविराज्यं पुरोडाशाः कुशा यूपाश्च खादिराः ।
नैतानि यातयामानि कुर्वन्ति पुनरध्वरे ॥

अनेन यातयामद्रव्यैर्यागो न कर्तव्य इत्युक्तं भवति । अत एव यातयामहविर्यागो न कर्तव्य इत्युक्तं पारतन्त्र-

शाखायाम्— 'न दारुपात्रेण दुह्यादग्निवद्धि दारुपात्रं यत् दारुपात्रेण दुह्यात् यातयाम्ना हविषा यजेत' इति । अस्यार्थः— दारुपात्रेण दोहनं न कर्तव्यं तेन दोहने सति मथनेनाभिव्यज्यमानोऽग्निः पूर्वं दारुणि गूढो वर्तत इत्यग्निसहितं दारुपात्रम् । तत्रत्येनाग्निना क्षीरस्य स्वीकृतरसत्वात् यातयामहविषा यागः कृतः स्यात् अतो दारुपात्रेण दोहनं न कर्तव्यम् इति । तथा च यातयामहविषा यागस्य दोषत्वेन सिद्धवन्निर्देशात् । यातयामद्रव्याणां यागसाधनत्वाभावः सिद्धः ।

तथा ह्यात्तमिदं राज्यं हृतसारां सुरामिव ।
नाभिमन्तुमलं रामः नष्टसोममिवाध्वरम् ॥

हता सपुत्रास्मि हताश्च पौराः
सुतश्च भार्या च तव प्रहृष्टौ ।

इति सोपालम्भमवादीत् ॥ द्विषष्टितमे—ततः संभ्रान्तहृदयेन दशरथेन,

प्रसादये त्वा कौसल्ये रचितोऽयं मयाञ्जलिः ।
भर्ता तु खलु नारीणां गुणवान्निर्गुणोऽपि वा ॥

धर्मं विमृशमानानां प्रत्यक्षं देवि दैवतम् ।
सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा ॥
नार्हसे विप्रियं वक्तुं दुःखितापि सुदुःखितम् ।

इति सान्त्व्यमाना कौसल्या—

प्रसीद शिरसा याचे भूमौ निपतितास्मि ते ।
नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता ॥
उभयोर्लोकयोर्वीर प्रत्यायासं प्रसाद्यते ।
जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनम् ॥
पुत्रशोकार्तया तत्तु मया किमपि भाषितम् ।
शोको नाशयते धैर्यं शोको नाशयते श्रुतम् ॥
शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ।
शक्यमापतितः सोढुं प्रहारो रिपुहस्ततः ।
सोढुमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते ॥

इत्यवादीत् । अतः पुत्रशोकसमाक्रान्तहृदयायाः मम वचनमयुक्ततरमपि क्षन्तुमर्हति भवानित्यवदत् । अनेन शोकाविष्टस्य कृत्याकृत्यविवेकभङ्गो भवेत्; अतः सर्वनाशकरः शोकः सर्वथा परित्याज्य इति सूचितम् । तथा

च वनपर्वणि— 'शोचता न भवेत्किंचित्केवलं परितप्यते। परित्यजन्ति ये दुःखं सुखं वाप्युभयं नराः । त एव सुखमेधन्ते ज्ञानतृप्ता मनीषिणः ॥ असंतोषपरा मूढाः संतोषं यान्ति पण्डिताः । असंतोषस्य नास्त्यन्तस्तुष्टिस्तु परमं सुखम् ॥ न शोचन्ति गताध्वानः पश्यन्तः परमां गतिम् । न विषादे मनः कार्यं विषादो विषमुत्तमम् । मारयत्यकृतप्रज्ञं बालं वृद्धं च वोरगः ।' इति । स्त्रीपर्वणि धृतराष्ट्रं प्रति संजयः— 'किं शोचसि महाराज नास्ति शोकेऽत्यहायता । न शोचञ्छ्रियमाप्नोति न शोचन्विन्दते परम् ॥ धृतराष्ट्रं प्रति व्यासश्च— 'अनित्यतां हि मर्त्यानां विजानासि न संशयः । अध्रुवे जीवलोकेऽथ स्थाने चाशाश्वते सति ॥ जीविते मरणान्ते च कस्माच्छोचसि भारत' इति ।

एवं हि कथयन्त्यास्तु कौसल्यायाः शुभं वचः ।
मन्दरश्मिरभूत्सूर्यो रजनी चाभ्यवर्तत ॥

त्रिषष्टितमे, ततः क्षणेनैव प्रतिबुद्धो दशरथः स्वकृतमुनिकुमारकवधरूपदुष्कृतस्मरणसंतप्तहृदयः कौसल्यामि-

दमवोचत् ।

यदाचरति कल्याणि शुभं वा यदि वाशुभम् ।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥

अनेन शुभमशुभं वा स्वेन कृतं कर्म स्वसदृशफलदानाय कर्तारमनुसरत्येवेति सूचितम् । तथा च स्त्रीपर्वणि धृतराष्ट्रं प्रति विदुरवचनम्— 'शयानं चानुशेते हि तिष्ठन्तं चानुतिष्ठति । अनुधावति धावन्तं कर्म पूर्वकृतं नरम् । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ॥ तस्यां तस्यामवस्थायां तत्फलं समुपाश्नुते । शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ॥ कृतं लभति सर्वत्र नाकृतं भुज्यते क्वचित् ।' मनुरपि— 'यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । तथा पूर्वकृतं कर्म कर्तारमनुविन्दति ॥' इति ।

गुरुलाघवमर्थानामारम्भे कर्मणां फलम् ।
दोषं वा यो न जानाति स बाल इति होच्यते ॥

अविज्ञाय फलं यो हि कर्मत्वे वानुधावति । स शोचेत्फलवेलायां यथा किंशुकसेचकः ॥ अनेन भाविफलगुरु-

लाघवादिविचारपूर्वमेव कर्म कर्तव्यं न तु अविचार्येति सूचितम् । तथा च भारते— 'आदावेव मनुष्येण वर्तितव्यं यथाक्षमम् । यथा नातीतमर्थं वै पश्चात्तापेन युज्यते । मधुराः केवलं दृष्ट्वा प्रपातं नानुपश्यति ॥ स भ्रष्टो मधुलोभेन शोचत्येव यथा भवान् । तत्रैव किं नु मे स्यादिदं कृत्वा किं न मे स्यादकुर्वतः । इति कार्याणि संचिन्त्य कुर्याद्वा पुरुषो न वा' इति । अभियुक्ता अपि 'उचितमनुचितं वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नतः पण्डितेन । अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः' इति । पुरा खलु शब्दवेधीति लब्धशब्दोऽहं मृगयामटन् ।

व्यायामकृतसंकल्पः सरयूमन्वगां नदीम् ।
अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः ।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥
अमुञ्चं निशितं बाणमहमाशीविषोपमम् ।
तस्मिन्निपतिते बाणे वागभूत्तत्र मानुषी ॥
ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः ।
को वधेन ममार्थी स्यात्किं वास्यापकृतं मया ॥

इति । ततो मदीयशरसंताडितो मुनिकुमारकः सश्रमं समीपमागतं मामवलोक्य पिपासितयोरन्धयोर्गुर्वोरम्भोग्रहणाय समागतं मामनपराधिनमकारणं घ्नता त्वया

द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ।
पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ॥

न त्वामनुदहे क्रुद्धो वनं वह्निरिवैधितः ।
विशल्यं कुरु मां राजन्मा भूत्ते मनसो व्यथा ॥

ब्रह्महत्याकृतं पापं हृदयादपनीयताम् ।
शूद्रायामस्मि वैश्येन जातो जनपदाधिप ॥

इत्यवादीत् । तद्वचनाच्च समुद्धृतशल्यो मुनिकुमारकः दिष्टां गतिमगात् ॥ चतुष्षष्टितमे— ततो मुनिकुमारकोपदिष्टमार्गेण तमेव जलपूर्णकुम्भमादायाश्रमं प्रविशतः मम पदशब्दश्रवणमात्रेण

किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ।

इति । तावन्धौ तत्पितरौ इत्यवगत्य,

क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः ।
भगवंश्चापहस्तोऽहं सरयूतीरमागतः ॥

जिघांसुः श्वापदं किंचिन्निपानेनागतं गजम् ।

तत्र च जले पूर्यतः कुम्भस्य शब्देन गजभ्रमाच्छब्द-वेदिना,

अज्ञानाद्भवतः पुत्रः सहसाभिहतो मया ।
शेषमेवं गते यत्स्यात्तत्प्रसीदतु मे मुनिः ॥

इत्यवोचम् । अनेन महत्स्वपराधं कृतवता तत्प्रसादनं कर्तव्यमिति । तथा च पैठीनसिः 'त्वंकाराहंकारापगुरण-पातनलोहितप्रवर्तनोत्तरजयेषु प्रणिपातैकरात्रोपवासः कृच्छ्रातिकृच्छ्रं चरित्वा प्रसादयेद्यथालिङ्गम्' इति । अथाशनिपातसंनिभं तद्वचनमाकर्ण्य ऋषिरेवमवोचत्—

यद्येतदशुभं कर्म न स्म मे कथयेः स्वयम् ।
फलेन्मूर्धा तव राजन्सद्यः शतसहस्रधा ॥

अनेन महत्स्वपराधिना अप्रसादने महाननर्थो भवतीति सूचितम् । अत एव तपस्यतः शमीकस्य कण्ठे मृतं सर्पं परिक्षिप्य तमप्रसाद्य गतस्य परिक्षितः शृङ्गिशापादनर्थः संपन्न इति ।

क्षत्रियेण वधो राजन्वानप्रस्थे विशेषतः ।

ज्ञातपूर्वः कृतः स्थानाच्च्यावयेदपि वज्रिणम् ॥
सप्तधा तु फलेन्मूर्धा मुनौ तपसि तिष्ठति ।
ज्ञानाद्विसृजतः शस्त्रं तादृशे ब्रह्मवादिनि ॥

अनेन ज्ञानाज्ञानकृतयोः पापयोः वैलक्षण्यमस्तीति सूचितम् । तथा च मनुः—'इयं विशुद्धिरुदिता प्रमादाकामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्नैव विद्यते । ततः स मामवलम्ब्य पुत्रनिकटमागतः सभार्यो मुनिर्बहुविधं सकरुणं विलप्य,

अपापस्त्वं यथा पुत्र निहतः पापकर्मणा ।
तेन सत्येन गच्छाशु ये लोकाः शस्त्रयोधिनाम् ॥
यान्ति शूरा गतिं यां च संग्रामेष्वनिवर्तिनः ।
हतास्त्वभिमुखाः पुत्र गतिं तां परमां व्रज ॥

अनेन युद्धेष्वपरावर्तिनां शस्त्रहतानामुत्तमलोकप्राप्तिर्भवतीति सूचितम् । तथा च यजुरारण्यके— 'ये युद्ध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः ये वा सहस्रदक्षिणाः तांश्च देवापि गच्छतात् ।' मनुः— 'आहवेषु यदन्योन्यं जिघांसन्तो महीक्षितः । युद्ध्यमानाः परं शक्त्या स्वर्गं

यान्त्यपराङ्मुखाः ॥ द्वाविमौ पुरुषौ लोके सूर्यमण्डल-
भेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः । अक्ष-
य्याल्लँभते लोकान्यदि क्लीबं न भाषते । यस्तु
भग्नेषु सैन्येषु विद्रवत्सु समन्ततः । परित्राता यदा
गच्छेत्स च क्रतुफलं लभेत् । यस्य च्छेदाक्षतं गात्रं शर-
मुद्गरयष्टिभिः । देवकन्यास्तु तं वीरं हरन्ति रमयन्ति च ।
देवाङ्गनाः सहस्राणि शूरमायोधने हतम् । त्वरमाणाः
प्रधावन्ति मम भर्ता ममैव च । ये यज्ञसङ्घैस्तपसा च
विप्राः स्वर्गेषु शीघ्रेण यथैव यान्ति । क्षणेन यान्त्येव हि
तत्र वीराः प्राणान्सुयुद्धेन परित्यजन्तः ॥' आनुशास-
निके— 'ये रणाग्रे महीपालाः शूराः समिति शोभनाः ।
वध्यन्तेऽभिमुखाः शक्र ब्रह्मलोकं व्रजन्ति ते ॥'

या गतिः सर्वसाधूनां स्वाध्यायात्तपसा च या ।
भूमिदस्याहिताग्नेश्चाप्येकपत्नीव्रतस्य च ॥

गोसहस्रप्रदातॄणां या या गुरुभृतामपि ।
देहन्यासकृतां या च तां गतिं गच्छ पुत्रक ॥

अनेन सर्वसाधुभूमिदानकर्त्रादीनामपि उत्तमश्लोकप्राप्तिर्भवतीति सूचितम्। तथा च विष्णुपुराणे— 'सर्वलोकहितं कुर्यान्नाहितं कस्यचिद्द्विजः। मैत्री समस्तसत्त्वेषु ब्राह्मणस्योत्तमं धनम्॥ प्राणिनि रत्ने च पारक्ये समबुद्धिर्भवेद्द्विजः। तद्वर्णबन्धमुक्तोऽसौ लोकान्प्राप्नोत्यनुत्तमान्।' इति। स्वाध्यायवतामुत्तमलोकविषये श्रुतिः 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायुरादित्यस्य सायुज्यं गच्छति' इति। स्मृतिरपि— 'यः स्वाध्यायमधीतेऽब्दं विधिना नियतेन्द्रियः। तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु' इति। तपस्विनामुत्तमलोकप्राप्तिविषये श्रुतिः 'तपसा देवा देवतामग्र आयन् तपसर्षयः स्वरन्वविन्दन्' इति। मनुरपि— 'कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च। स्थावराणि च भूतानि दिवं यान्ति तपोबलात्' इति। भूमिदातुरुत्तमलोकावाप्तौ संवर्तः—'भूमिं सस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे। गां दत्त्वापि प्रसूतां च स्वर्गलोके महीयते॥ अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैस्थाविसुताश्च गावः। लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात्' इति। आहिताग्नेरुत्तमलोकावाप्तौ

आनुशासनिके भीष्मः 'शतवर्षजीवी यश्च मृगो मनुष्यो वेदाध्यायी यश्च यज्वाप्रमत्तः एवं ते सर्वे शक्रलोकं व्रजन्ति परं गन्ता धृतराष्ट्रो न तत्र' इति । एकपत्नीव्रतं द्विविधम् एकः पतिर्यस्याः सा एकपत्नी तस्याः व्रतमेकपत्नीव्रतम् । एका च सा पत्नी च एकपत्नी सैव व्रतं येषां एकपत्नीव्रताः इति । तथा च स्त्रियाः परपुरुषविमुखत्वं पुरुषस्य परदारविमुखत्वं च । तदुभयत्रापि मनुः— 'आसीता मरणात्क्षान्ता नियता ब्रह्मचारिणी । यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् । अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसंततिम् ॥ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः । संयोगं पतितैर्गत्वा परस्यैव च योषितः । अपहृत्य तु विप्रस्वं भवन्ति ब्रह्मराक्षसाः' इति । गोसहस्रप्रदातॄणामुत्तमलोकप्राप्तिं प्रति आनुशासनिके भीष्मः— 'सर्वेषामिह दानानां यत्फलं परिकीर्तितम् । तदेवाप्नोति विप्रेभ्यो गोसहस्रप्रदानतः ॥ अनेन विधिना यस्तु गोसहस्रप्रदो नरः । सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः ॥ विमाने

नार्कवर्णेन किंकिणीजालमालिना । सर्वेषां लोकपालानां लोके संपूज्यते नरः । प्रतिमन्वन्तरं तिष्ठेत्पुत्रपौत्रसुमान्वितः ॥ सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत् । शतमष्टोत्तरं तद्वत्पितॄणां तारयेत्कुलम् । तद्रोमसंख्यावर्षाणि स्वर्गे लोके महीयते' इति । गुरुभूतामुत्तमलोकप्राप्तिविषये देहन्यासं कृतवत उत्तमलोकप्राप्तावानुशासनिके—'आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् । हुत्वाग्नौ देहमुत्सृज्य वह्निलोके महीयते' इति । ततश्च मुनिकुमारकः शक्रेण सह पितरावाश्वास्य,

स्थानमस्मि महत्प्राप्तो भवतोः परिचारणात् ।
भवन्तावपि च क्षिप्रं मम मूलमुपैष्यतः ॥

इत्यभिधाय स्वकृतकर्मभिर्दिव्यविमानारूढो दिवमारुरोह । ततः पुत्रवियोगजनितखेदमसहमानस्तपस्वी

पुत्रव्यसनजं दुःखं यदेतन्मम सांप्रतम् ।
एवं त्वं पुत्रशोकेन राजन्नन्तं करिष्यसि ॥

इति शप्तवान् । यद्यपि 'शूद्रायामस्मि वैश्येन जातः' इति मुनिकुमारकवचनेन मुनिकुमारकस्य करणजात्यव-

गमात् बुद्धिपूर्वकं तद्वधेऽपि न ब्रह्महत्याप्रसक्तिरस्ति । तथापि— 'विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतम् । वैश्येऽर्धं पाद एकस्तु शूद्रजातिषु शस्यते' इति बृहद्विष्णुवचनपर्यालोचनया कामतः क्षत्रियकर्तृके शूद्रजातिवधे ब्रह्महत्याचतुर्थांशप्रायश्चित्तविधानात् मुनिकुमारकस्य शूद्रापेक्षया करणत्वेन अधिकत्वात् पितृमातृशुश्रूषादिस्वकर्मनिरतत्वेन गुणवत्त्वाच्च तादृशस्य कामतो वधे प्रायश्चित्ताधिक्येन ब्रह्महत्येति व्यपदेशः युक्त एव । ततः मत्कृतां चितां समाधिरुह्य स्वर्गं गते सभार्ये तस्मिंस्तपस्विनि कुमारकवधं तन्निमित्तं शापं च मुहुर्मुहुर्मनसि विचिन्तयन् स्वनगरमागतोऽस्मि ।

तस्यायं कर्मणो देवि विपाकः समुपस्थितः ।
अपथ्यैः सह संभुक्ते व्याधिरन्नरसं यथा ।

अनेन समशनाध्यशनविषमाशने सति व्याधिर्भवति । अतस्तत्परित्यजेदिति । तथा च वाग्भटे— 'मिश्रं पथ्यमपथ्यं च भुक्तं समशनं मतम् । विद्यादध्यशनं भूयो भुक्तस्योपरिभोजनम् ॥ अकाले बहु चाल्पं वा भुक्तं तु

विषमाशनम् । त्रीण्यप्येतानि मृत्युं वा घोरान्व्याधीन्सृजन्ति च ॥

तदहं पुत्रशोकेन संत्यक्ष्याम्यद्य जीवितम् ।
चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये साधु मा स्पृश ॥

न तन्मे सदृशं देवि यन्मया राघवे कृतम् ।
सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥

कश्च प्रव्राज्यमानो वा नासूयेत्पितरं सुतः ।
हा राघव महाबाहो हा ममायासनाशन ॥

हा पितृप्रिय मे नाथ हा ममासि गतः सुत ।

इति रामस्य मातुश्च सुमित्रायाश्च संनिधौ राजा दशरथः शोचन् जीवितान्तमुपेयिवान् ॥ पञ्चषष्टिषट्षष्ट्योः— ततः प्रभातसमये यथापूर्वं स्तुवत्सु वन्दिषु पठत्सु पाठकेषु समानीतेषु स्नानीयमङ्गलालम्भनादिषु प्रबोधनचतुराः राजमहिष्यः गतसत्त्वं निश्चेष्टं राजानं विचिन्त्य वेपमानहृदयाः

तदा प्रचुक्रुशुर्दीनाः सस्वरं ता वराङ्गनाः ।

करेणव इवारण्ये स्थानप्रच्युतयूथपाः ॥

तासामाक्रन्दशब्देन सहसोद्गतचेतने ।
कौसल्या च सुमित्रा च त्यक्तनिद्रे बभूवतुः ॥

ततः कोसलेन्द्रतनया गतचेतनं राजानमवलोक्य दुःसहशोकानलाकुलितहृदया सुमित्रादिभिर्नृपवधूभिः सह कृतबहुविधप्रलापा सकरुणमिदमुवाच—

विहाय मां गतो रामो भर्ता च स्वर्गतो मम ।
विपथे सार्थहीनेव नाहं जीवितुमुत्सहे ॥

भर्तारं तं परित्यज्य का स्त्री दैवतमात्मनः ।
इच्छेज्जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः ॥

साहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता ।
इदं शरीरमालिङ्ग्य प्रवेक्ष्यामि हुताशनम् ॥

इति । नन्वत्र पतिव्रतानां मृतं पतिमालिङ्ग्य अनुगमनं धर्म्यमित्यवगम्यते । तदसंगतम् । आत्महत्यारूपानुमरणस्य निषिद्धत्वात् । तथा च श्रुतिः—'तस्मादुह न पुरायुषः प्रेयात्' इति । ईशावास्येऽपि— 'असूर्या नाम

ते लोकाः अन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः’ इति। तथा आङ्गिरसस्मृतिरपि— ‘या स्त्री ब्राह्मणजाती या मृतं पतिमनुव्रजेत्। सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्’ इति। व्याघ्रपादश्च— ‘न म्रियेत समं भर्त्रा ब्राह्मणी शोककर्शिता। न ब्रह्मगतिमाप्नोति मरणादात्मघातिनी’ इति। तस्मादात्मघातरूपानुमरणं कथं धर्मो भवेत्, प्रत्युत अवस्थानेनैव स्वर्गादिफलावगमेनावस्थानस्यैव युक्तत्वात्, तथा च पराशरः— ‘मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता। सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः॥’ इति। मनुरपि— आसीता मरणात्क्षान्ता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥ अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्। दिवं गतानि विप्राणामकृत्वा कुलसंततिम्॥ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥’ इति। एवं च बहुफलमवस्थानं परित्यज्य प्रसिद्धमनुमरणं कथं करिष्यामीत्युक्तवती कौसल्या इति चेत् न, नियतया अवस्थाने फलावगमात्। अनुगमनेऽपि

वैधव्यावस्थाननिन्दापूर्वकं बहुफलप्रतिपादनात् । तथा च संग्रहे—'जीवहीनो यथा देहः क्षणादशुचितां व्रजेत् । भर्तृहीना तथा योषित्सुस्नाताप्यशुचिः सदा ॥ अमङ्गलेभ्यः सर्वेभ्यो विधवा ह्यत्यमङ्गलम् । विधवादर्शनात्सिद्धिः कापि तात न जायते ॥ विधाय मातरं चैकां सर्वमङ्गलवर्जिताम् । तदाशिषमपि प्राज्ञ त्यजेदाशीविषोपमम् ॥ कन्याविवाहसमये वाचयेयुरिति द्विजाः । भर्तुः सहचरी भूयाज्जीवतोऽजीवतोऽपि वा ॥ भर्त्रा सहानुयातव्यो देहावस्था यया सदा । चन्द्रमा ज्योत्स्नया तद्वद्विद्युत्वान्विद्युता यथा । अनुव्रजन्ति भर्तारं गृहात्पितृवनं मुदा ॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् । यमदूताः पलायन्ते सतीमालोक्य दूरतः ॥ अपि दुष्कृतकर्माणं समुत्सृज्य च तत्पतिम् । न तथा बिभिमो वह्ने न तथा विद्युतो यथा ॥ आपतन्तीं समालोक्य वयं दूताः पतिव्रताम् । तपनस्तपतेऽत्यन्तं दहनोऽपि च दह्यते । कम्पन्ते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः ॥ यावत्स्वलोमसंख्यास्ति तावत्कोट्ययुतानि च । भर्त्रा स्वर्गसुखं भुङ्क्ते रममाणा पतिव्रता' इति । शङ्खोऽपि—'मृते भर्तरि या नारी समारोहेद्धुताशनम् ।

साऽरुन्धतीसमा चारात्स्वर्गे लोके महीयते' इति। पराश-
रोऽपि— 'तिस्रः कोट्यर्धकोटीश्च यानि रोमाणि मा-
नुषे। तावन्त्यब्दसहस्राणि स्वर्गे लोके महीयते' इति।
व्यासोऽपि— 'यदि प्रविष्टो नरकं पतिः पापैः सुदारुणैः।
संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः॥ तिष्ठतो ह्य-
वशो दीनो वेष्टमाणः स्वकर्मभिः। व्यालग्राही यथा व्यालं
बलादुद्धरत्यशङ्कितः॥ तद्वद्भर्तारमादाय दिवं याति च सा
बलात्। या भर्तृपरमा नित्यं स्तूयमानाप्सरोगणैः॥
क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश। ब्रह्मघ्नो वा
कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः॥ पुनात्यविधवा नारी
तमादाय मृता तु या' इति। एवं च उदाहृतशास्त्रबला-
द्भर्त्रा सह अनुगमनं धर्म एव। तथैवाचारोऽपि पतिव्र-
तानाम्; यथा विष्णुपुराणे— 'रेवती चैव रामस्य देह-
माश्लिष्य सत्तम। विवेश ज्वलितं वह्निं तत्संगाह्लादशीत-
लम्॥' इति। तत्रैव स्थलान्तरे जनकतनयमालिङ्ग्य
काशीराजतनयानुमरणं कृतवतीति प्रतिपादितम्। 'तत-
श्चितिस्थं भूयोऽपि भर्तारं सा शुभेक्षणा। अन्वारुरोह
विधिवद्यथापूर्वं मुदा पतिम्॥ ततोऽवाप तया सार्धं

राजपुत्र्या स पार्थिवः । ऐन्द्रानतीत्य वै लोकाँल्लोकान्कामदुहोऽन्वयात् ॥ स्वर्गदायत्वमतुलं दाम्पत्यमतिदुर्लभम् । प्राप्तं पुण्यफलप्राप्यं संशुद्धिं तां द्विजोत्तम' इति । मौसलपर्वण्यपि— 'श्वोभूते तु ततः शौरिर्वसुदेवः प्रतापवान् । त्यक्त्वात्मानं महातेजा जगाम गतिमुत्तमाम् । तं देवकी च भद्रा च रोहिणी मदिरास्तथा ॥ अन्वारोहन्त च तदा भर्तारं योषितां वराः' इति । यदुक्तं प्राक् श्रुतिविरोध इति तन्न, आत्महत्यानिषेधपरायाः श्रुतेर्विहितानुमरणव्यतिरिक्तात्महिंसाविषयत्वात्; अन्यथा— 'सितासिते सरितो यत्र संगते' इत्यादिश्रुतिविहिततनुत्यागोऽपि । तस्माद्ये युद्ध्यन्ते प्रधनेषु शूरासः' इति श्रुतिविहितशरीरपरित्यागोऽपि युद्धे न स्यात्, तथा दैवतपश्वालम्भनमपि न स्यात् । तस्या हिंसारूपत्वात् । यदि च निषेधशास्त्रस्य विहितस्य व्यतिरिक्तपरत्वात् प्रयागमरणादिकमुपपन्नमिति तदा प्रकृतेऽपि तुल्यमिति । यदपि चोक्तम् या स्त्री ब्राह्मणजातीयेत्यादिस्मृतिविरोध इति तन्न, तस्याः स्मृतेः ब्राह्मणी पृथक् चितिमारुह्य न गच्छेदित्येतत्परत्वात् । तथा च ब्रह्मकैवर्ते—'पृथक् चितिं

समारुह्य न विप्रा गन्तुमर्हति' इति। तस्मादनुगमनाव-
स्थानयोरुभयोरपि शास्त्रीयत्वात् विकल्प एव; अत एव
उभयविधाचारोऽपि पतिव्रतानाम्; यथा आदिपर्वणि—
'अहं ज्येष्ठा धर्मपत्नी ज्येष्ठधर्मफलं मम। अवश्यंभाविनो
भावान्मा मां माद्री निवर्तय॥ अन्वेष्यामीह भर्तारमहं
प्रेतवशं गतम्।' इति वदन्तीं कुन्तीम्- 'दारकेष्वप्रमत्ता
च भवेथाश्च हिता मम। अतोन्यं न प्रपश्यामि संदेष्टव्यं
हि किंचन॥ इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नरर्षभ।
मद्रराजसुता तूर्णमन्वारोहद्यशस्विनी' इति कुन्त्याः अव-
स्थानं माद्र्याः सहगमनं च प्रतिपादितम्। तथा मौसले-
ऽपि— 'इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा। वज्रे-
णाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः॥ रुक्मिणी त्वथ
गान्धारी शैल्या हैमवतीत्यपि। देवी जाम्बवती चैव
विविशुर्जातवेदसम्॥ सत्यभामा तथैवान्या देव्यः कृष्णस्य
संमताः। वनं प्रविविशू राजंस्तापस्ये धृतनिश्चयाः' इति।
एवमितिहासपुराणेषु पतिव्रताभिरनुगमनं कृतम् अव-
स्थितं च इति प्रतिपादनेन उभयविधशास्त्रानुरोधेन च,
उभयमपि धर्म्यं तुल्यकल्पं च तुल्यफलत्वात्, तुल्यफलत्वं

च ब्रह्मचर्येणावस्थितायाः कुन्त्या अनुगमनं कृतवत्या माद्र्याश्च पतिसालोक्यप्रतिपादकेन स्वर्गारोहणिके 'पत्नीभ्यां सहितः पाण्डुर्महेन्द्रसदनं ययौ ।' इति वचनेनावगम्यते । तस्मात्कौसल्योक्तमनुगमनं नानुपपन्नम् । अत एव अवस्थानस्यापि शास्त्रीयत्वात्कौसल्या अनुगमनमकृत्वा स्थितेत्येतदप्युपपन्नमेव । ततो गतचेतनं राजानमालिङ्ग्य परिदेवयमानां कौसल्यां विविधसान्त्वनशतैः कथंचिदपनीय,

तैलद्रोण्यामथामात्याः संवेश्य जगतीपतिम् ।
राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम ॥

न तु संकलनं राज्ञे विना पुत्रेण मन्त्रिणः ।
सर्वज्ञाः कर्तुमीषुस्ते ततो रक्ष्यन्ति भूमिपम् ॥ इति ।

अनेन संस्कारविलम्बे मृतशरीरं तैलद्रोण्यादिषु निक्षिप्य रक्षणीयमिति सूचितम् । तथा चापस्तम्बः— 'आहिताग्निं जने प्रमीतं तैलद्रोण्यामवधाय शकटेन हरन्ति' इति । 'न तु संकलनं राज्ञो विना पुत्रेण मन्त्रिणः' इत्यनेन सपुत्रस्य पुत्रेण विना अन्येन संकलनं न कारयि-

तव्यमिति सूचितम् । तथा च स्मृत्यन्तरे— 'पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्स्वधाम् । पुत्रा विहिंसितास्तेन यस्त्वेवं कुरुते नरः' इति ॥ सप्तषष्टितमे, तत उदयशिखरमारूढे भगवति सवितरि समेत्य मन्त्रिपुरोहिताः कुलपुरोहितं वसिष्ठमेवमवोचन्—

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
अराजकं हि नो राष्ट्रं न विनाशमवाप्नुयात् ॥

नाराजके जनपदे विद्युन्माली महास्वनः ।
अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ॥

अराजके जनपदे बीजमुष्टिः प्रकीर्यते ।
नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ॥

अराजके धनं नास्ति नास्ति भार्याप्यराजके ।
इदमत्याहितं चान्यत्कुतः सौख्यमराजके ॥

नाराजके जनपदे कारयन्ति सभां नराः ।
उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च ॥

नाराजके जनपदे यज्ञशीला द्विजातयः ।
सत्राण्यन्वा ; ते दान्ता ब्राह्मणाः संशितव्रताः ॥

नाराजके जनपदे महायज्ञेषु यज्वनः।
ब्राह्मणा वसुसंपूर्णा विसृजन्त्याप्तदक्षिणाः॥

नाराजके जनपदे सिद्धार्था व्यवहारिणः।
कथाभिरनुरज्यन्ते कथाशीलाः कथाः प्रियैः॥

नाराजके जनपदे वाहनैः शीघ्रगामिभिः।
नरा निर्यान्त्यरण्यानि नारीभिः सह कामिनः॥

नाराजके जनपदे धनवन्तः सुरक्षिताः।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः॥

नाराजके जनपदे बद्धघण्टाविषाणिनः।
अटन्ति राजमार्गेषु कुञ्जराः षष्टिहायनाः॥

नाराजके जनपदे शरान्सततमस्यताम्।
श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने॥

नाराजके जनपदे वणिजो दूरगामिनः।
गच्छन्ति क्षेममध्वानं बहुपण्यसमाचिताः॥

नाराजके जनपदे चरत्येकचरो वशी।
भावयन्नात्मनात्मानं यत्र सायंगृहो मुनिः॥

नाराजके जनपदे योगक्षेमः प्रवर्तते।

न चाप्यराजके सेना शत्रून्विषहते युधि ॥

नाराजके जनपदे हृष्टैः परमवाजिभिः ।
नराः संयान्ति सहसा रथैश्च परिमण्डिताः ॥

नाराजके जनपदे नराः शास्त्रविशारदाः ।
संवदन्तोऽवतिष्ठन्ते वनेषूपवनेषु च ॥

नाराजके जनपदे चन्दनागरुरूषिताः ।
राजपुत्रा विराजन्ते वसन्त इव शाखिनः ॥

यथा ह्यनुदका नद्यो यथा वाप्यतृणं वनम् ।
अगोपाला यथा गावस्तथा राष्ट्रमराजकम् ॥

ध्वजो रथस्य प्रज्ञानं धूमो ज्ञानं विभावसोः ।
तेषां यो नो ध्वजो राजा स देवत्वमितो गतः ॥

नाराजके जनपदे स्वकं भवति कस्यचित् ।
मत्स्या इव नरा नित्यं भक्षयन्ति परस्परम् ॥

ये हि संच्छिन्नमर्यादा नास्तिकाश्छिन्नसंशयाः ।
तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः ॥

यथा दृष्टिः शरीरस्य नित्यमेव प्रवर्तते ।
तथा नरेन्द्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ॥

राजा सत्यं च धर्मश्च राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥

यमो वैश्रवणः शक्रो वरुणश्च महाबलः ।
विशेष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ॥

अहो तम इवेदं स्यान्न प्रज्ञायेत किंचन ।
राजा चेन्न भवेल्लोके विभजन्साध्वसाधु वा ॥

जीवत्यपि महाराजे तवैव वचनं वयम् ।
नातिक्रमामहे सर्वे वेलां प्राप्येव सागरः ॥

स नः समीक्ष्य द्विजवर्यवृत्तं
नृपं विना राज्यमरण्यभूतम् ।
कुमारमिक्ष्वाकुसुतं वदान्यं
त्वमेव राजानमिहाभिषिञ्च ॥

अनेन लौकिकवैदिकव्यवहारव्यवस्थासिद्ध्यर्थं प्रजाभिः राजा अवश्यकर्तव्य इत्युक्तम् । तथा च मनुः—'अराजके जनपदे सर्वतो विद्रुते भयात् । रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥' इति । अत एव राजधर्मेणाराजके देशे वासप्रतिषेधपूर्वकं लौकिकवैदिकव्यवहारयोरन्वयव्यतिरेकाभ्यां राजाधीनत्वं प्रतिपाद्य व्यव-

हारसिद्ध्यर्थं तपश्चर्यादिना ब्रह्माणं प्रसाद्य राजानं मनुं संपाद्य तस्मै भागं परिकल्पितवन्तः इत्युक्तं युधिष्ठिरं प्रति भीष्मेण— 'राष्ट्रस्य यत्कृत्यतमं राज्ञ एवाभिषेचनम् । अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्त्युत । अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठते । परस्परं च खादन्ते सर्वथा धिक-राजकम् । इन्द्रमेव प्रणमते यद्राजानमिति श्रुतिः ॥ यथैवेन्द्रस्तथा राजा संपूज्यो भूतिमिच्छता । नाराजकेषु राष्ट्रेषु वस्तव्यमिति वैदिकम् ॥ नाराजकेषु राष्ट्रेषु हव्यं वहति पावकः । अथ चेदभिवर्तेत राज्यार्थी बलवत्तरः ॥ अराजकानि राष्ट्राणि हतराज्यानि वा पुनः । प्रत्युद्ग-म्याभिपूज्यः स्यादेतदत्र सुमन्त्रितम् ॥ न हि राज्यात्पाप-तरमस्ति किंचिदराजकात् । वसेत्समनुपश्येत समग्रं कुशलं भवेत् ॥ बलवान्हि प्रकुर्वीत कुर्यान्निःशेषतामिह । भूयांसं लभते क्लेशं या गौर्भवति दुर्दुघा ॥ अथवा सुदुघा भवति नैव तां विनयस्य च । यदतप्तप्रणमते नमते यो बलीयसे ॥ तस्माद्राजैव कर्तव्यः सततं भूतिमिच्छता । न धनार्थो न दानार्थस्तेषां येषामराजकम् ॥ तृष्यते हि हरन्पापः परवित्तमराजकम् । यदस्य तद्धरन्त्यन्ये तदा राजानमि-

च्छति ॥ पापान्यपि सदा क्षेमं न लभन्ते कथंचन।
एतस्य तद्वै हरतो द्वयोश्च बहवोऽपरे ॥ न दासः क्रियते
दासो ह्रियन्ते च बलात्स्त्रियः। एतस्मात्कारणाद्देवाः
प्रजापालं प्रचक्रिरे ॥ राजा चेन्न भवेल्लोके पृथिव्यां
दण्डधारकः। शूले मत्स्यानिवाभक्ष्य दुर्बलान्बलवत्तराः॥
अनायकाः प्रजाः पूर्वं विनेशुरिति नः श्रुतम्। परस्परं
भक्षयतो मत्स्या मत्स्यानिवाबलान् ॥ ताः समेत्य मिथ-
श्चक्रुः समयानिति नः श्रुतम्। यः क्रूरो दण्डपुरुषो यश्च
स्यात्पारदारिकः ॥ यश्च नः समयं भिन्द्यात्त्याज्या न-
स्तादृशा यदि। विश्वासनार्थं वर्णानां सर्वेषामविशेषतः ॥
तास्तथा समयं कृत्वा समये नावतस्थिरे। सहितास्ताः समा-
जग्मुरसुखार्ताः पितामहम् ॥ अनीश्वरा विनश्यामो भगव-
न्नीश्वरं दिश। यं पूजयेम संभूय यश्च नः परिपालयेत् ॥
ताभ्यो मनुं व्यादिदेश मनुना तेऽभिनन्दिताः।' मनुरु-
वाच— 'बिभेमि कर्मणः क्रूराद्राज्यं हि भृशदुष्करम्।
विशेषतो मनुष्येषु मिथ्यावृत्तेषु नित्यदा ॥' भीष्म
उवाच— 'तमब्रुवन्प्रजा मा भैर्विधास्याम धनं तव।
पशूनामथ पञ्चाशं हिरण्यस्य तथैव च ॥ धान्यस्य दशमं

भागं दद्मि ते कोशवर्धनम् । मुख्ये न चातपत्रेण ये मनुष्याः प्रधानतः ॥ भवन्तं तेऽनुयास्यन्ति महेन्द्रमिव देवताः । स त्वं जातबलो राजन्दुष्प्रधर्षः प्रतापवान् ॥ सुखे शास्यसि नः सर्वान्कुबेर इव नैर्ऋतान् । यं च धर्मं चरिष्यन्ति प्रजा राज्ञा सुरक्षिताः ॥ चतुर्थं तस्य धर्मस्य राज्ञ एव भविष्यति । तेन धर्मेण महता सुखलब्धेन भावितः । पाह्यस्मान्सर्वतो राजन्देवानिव शतक्रतुः ॥ विजयाय हि निर्याहि प्रतीपं मघवानिव । मानं विधम शत्रूणां धर्मं जनयतः सदा ॥' भीष्म उवाच— 'स निर्ययौ महातेजा बलेन महता वृतः । महाभिजनसंपन्नस्तेजसा प्रज्वलन्निव ॥ तस्य तां महिमां दृष्ट्वा महेन्द्रस्येव देवताः । अथ तत्रसिरे सर्वे स्वधर्मेष्वदधुर्मनः ॥ वर्णिनं चाश्रमं चैव म्लेच्छाः सर्वे च दस्यवः । ततो महीं परिययौ पर्जन्य इव वृष्टिमान् ॥ शमयन्सर्वतः पापान्सुकर्मसु च योजयन् । ये ये भूमिमिहेच्छेयुः पृथिव्या मानवाः क्वचित् ॥ कुर्यू राजानमेवादौ प्रजानुग्रहकारणात् । नमस्येयुश्च तं भक्त्या शिष्या इव गुरुं सदा ॥ देवायुजसहस्राक्षं नरराजानमन्तिकात् । स्वकृतं स्वजनेनेह परोऽपि बहु मन्यते ॥

स्वजनेन त्ववज्ञातं परे परिभवन्ति च। राज्ञः परैः परिभवः सर्वेषामसुखावहः॥ तस्माच्छत्रं च पुत्रं च वासांस्याभरणानि च। भोजनान्यथ पानानि राज्ञो दद्युर्गृहाच्युत॥ आसनान्यथ शय्याश्च सर्वोपकरणानि च।'
अष्टषष्टितमे, वसिष्ठोऽपि सिद्धार्थविजयजयन्ताशोकनन्दनानूजनवरान्द्वादशानाहूय,

कोशे यानि च वासांसि भूषणानि वराणि च।
क्षिप्रमादाय राज्ञश्च भरतस्य च गच्छत॥
त्यक्तशोकैरिदं वाच्यं शासनाद्भरतो मम।
पुरोहितस्त्वा कुशलं प्राह सर्वे च मन्त्रिणः॥
त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया।
मा चास्मै प्रोषितं रामं मा चास्मै पितरं मृतम्॥

इति शंसथेत्यवोचत्। ततो दूता वसिष्ठाभ्यनुज्ञया पुराभिगम्य संतीर्य विविधनदीरतिक्रम्य च नानाविधाञ्जनपदान्क्रमेण क्लान्तवाहना गिरिव्रजं पुरवरमस्तंगते भगवति सवितर्याजग्मुः॥ एकोनसप्ततितमे—

यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम्।
भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः॥

व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् ।
पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥

तप्यमानं समाज्ञाय वयस्याः प्रियवादिनः ।
आयासं हि विनेष्यन्तः सभायां चक्रिरे कथाः

वादयन्ति तथा चान्ये लास्यन्ति तथापरे ।
नाटकान्यपरे प्राहुर्लास्यानि विविधानि च ॥

स तैर्महात्मा भरतः सखिभिः प्रियवादिभिः ।
गोष्ठी हास्यानि कुर्वद्भिर्न प्राहृष्यत राघवः ॥

तमब्रवीत्प्रियसखो भरतं सखिभिर्वृतम् ।
सुहृद्भिः पर्युपासीनः किं सखे नानुमोदसे ॥

एवं ब्रुवाणं संहृष्टं भरतः प्रत्युवाच ह ।
शृणु त्वं यन्निमित्तं मे दैन्यमेतदुपागतम् ॥

स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजम् ।
पतन्तमद्रिशिखरात्कलुषे गोमये ह्रदे ॥

प्लवमानश्च मे दृष्टः स तस्मिन्गोमये ह्रदे ।
पिबन्नञ्जलिना तैलं हसन्नपि मुहुर्मुहुः ।
ततस्तिलोदनं भुक्त्वा पुनः पुनरधःशिराः ॥

तैलेनाभ्यक्तसर्वाङ्गस्तैलमेवावगाहत ।
स्वप्नेऽपि सागरं शुष्कं चन्द्रं च पतितं भुवि ॥

उपरुद्धां च जगतीं तमसेव समावृताम् ।
औपवाह्यस्य नागस्य विषाणं शकलीकृतम् ॥

सहसा चापि संशान्तं ज्वलितं जातवेदसम् ।
अवतीर्णां च पृथिवीं शुष्कांश्च विविधान्द्रुमान् ॥

अहं पश्यामि विध्वस्तान्सधूमांश्चापि पर्वतान् ।
पीठे कार्ष्णायसे चैनं विषण्णं कृष्णवाससम् ॥

प्रहसन्ति स्म राजानं प्रमदाः कृष्णपिङ्गलाः ।
त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः ॥

रथेन खरयुक्तेन प्रयातो दक्षिणामुखम् ।
प्रहसन्तीव राजानं प्रमदा रक्तवासिनी ॥

प्रकर्षता मया दृष्टा राक्षसी विकृतानना ।
एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ॥

अहं रामोऽथ वा राजा लक्ष्मणो वा मरिष्यति ।
नरो यानेन यः स्वप्ने खरयुक्तेन याति हि ॥

अचिरात्तस्य धूमाग्रं चितायां संप्रदृश्यते ।

एतन्निमित्तं दीनोऽहं तन्न वः प्रतिपूजये ॥
शुष्यतीव च मे कण्ठो न स्वस्थमिव मे पुनः ।
न पश्यामि भयस्थानं भयं चैवोपधारये ॥
भ्रष्टश्च स्वरयोगो मे च्छाया चोपहता मम ।
जुगुप्स इव चात्मानं न च पश्यामि कारणम् ॥
इमां हि दुःस्वप्नगतिं निशाम्य ता-
मनेकरूपामवितर्कितां पुरा ।
भयं महत्तद्धृदयान्न याति मे
विचिन्त्य राजानमचिन्त्यदर्शनम् ॥

अत्र भरतेन स्वप्नदर्शनस्य 'अहं रामोऽथ वा राजा लक्ष्मणो वा मरिष्यति' इति फलप्रतिपादनात्, येन यादृशस्वप्नो दृष्टः तस्य तादृशं फलं भवतीति सूचितम् । तथा च स्वप्नाध्याये बृहस्पतिः—'स्वप्नाध्यायं प्रवक्ष्यामि नानास्वप्नसमुच्चये । स्वप्नस्तु प्रथमे यामे संवत्सरविपाकिनम् ॥ द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामिकम् । चातुर्थे यामिके स्वप्ने मासैकेन फलं भवेत् ॥ अरुणोदयवेलायां दशाहेन फलं भवेत् । एवं चानुदिते काले त्रिरात्रं तु भविष्यति ॥ गवां दोहनवेलायां सद्यः

स्वप्नफलं भवेत् । अत ऊर्ध्वं प्रवक्ष्यामि स्वप्नपुण्यफलं ध्रुवम् । वातकं पित्तकं चैव चिन्तितं चानुवर्जयेत् ॥ अतिदीर्घं दिवा दृष्ट्वा स्वप्नं तं परिवर्जयेत् । यस्तु पश्यति स्वप्नान्ते राजानं कुञ्जरं हयम् । सुवर्णं वृषभं गावः कुटुम्बं तस्य वर्धते । आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम् । विष्ठानुलेपो रुदितं मृतं च स्वप्नेषु गम्यागमनं च धन्यम् ॥ क्षीरिणं फलिनं वृक्षमेकाकी योऽधिरोहति । तत्र तस्य विबुद्धस्य मृत्युरित्येव निर्दिशेत् ॥ यस्तु श्वेतेन सर्पेण दंशितो दक्षिणो भुजः । सहस्रलाभस्तस्य स्यादपूर्णे दशमे दिने । उरगो वृश्चिको वापि जलूका दृश्यते यदि । अव्ययं चार्थसिद्धिं च पुत्रं तस्य विनिर्दिशेत् । प्रासादशैलमारुह्य समुद्रं तरते नरः । अपि दासकुले जातः सोऽपि राजा भविष्यति ॥ यस्तु मध्ये तटाकस्य भुङ्क्ते वै घृतपायसम् । अखण्डे पुष्करे पत्रे तं विद्यात्पृथिवीपतिम् ॥ बलाकां कुक्कुटीं क्रौञ्चीं लब्ध्वा यः प्रतिबुध्यते । सत्कुलाच्च लभेत्कन्यां भार्यां च प्रियवादिनीम् ॥ अनिलैर्बध्यते यस्तु बाहुपाशेन वा पुनः । पुत्रो वा जायते तस्य प्रतिष्ठा तस्य वृद्धये ॥

आसने शयने याने शरीरे वाहने गृहे । ज्वलमानो तु बुध्येत तस्य श्रीरावर्तो सुखी ॥ आदित्यमण्डलं स्वप्ने चन्द्रं वा यदि पश्यति । व्याधितो मूल्यरोगी ह्यरोगी श्रियमाप्नुयात् ॥ रुधिरं पिबते स्वप्ने सुरां वा पिबते यदि । ब्राह्मणस्तु लभेद्विद्यामितरस्तु धनं लभेत् ॥ अभिधावन्ति यं स्वप्ने शृङ्गिणो दंष्ट्रिणोऽपि वा । वानरो वा वराहो वा भवेद्राजकुलाद्भयम् ॥ सलिलं दधि ताम्बूलं शङ्खं चन्दनमौक्तिकम् । जातीवकुलपुष्पं च उत्पलं वा धनागमः । केशा यत्र विशीर्यन्ते दन्ताश्च प्रपतन्ति वा । अर्थनाशो भवेत्तस्य अपत्यं वापि नश्यति ॥ वमते यस्तु स्वप्नान्ते अथ वा तु विरेचते । वमिते तु महाव्याधिर्धननाशो विरेचने । अशोकं करवीरं वा पालाशं वाथ पुष्पितम् । स्वप्नान्ते यस्तु पश्येत नरः शोकमवाप्नुयात् ॥ रक्ताम्बरधरा नारी रक्तगन्धानुलेपना । अवगूहति यं स्वप्ने ब्रह्महत्यां विनिर्दिशेत् । कृष्णाम्बरधरा नारी पीतवर्णानुलेपना । अवगूहति यं स्वप्ने कुष्ठं तस्य विनिर्दिशेत् ॥ पीताम्बरधरा नारी पीतवर्णानुलेपना । अवगूहति यं स्वप्ने कुष्ठं तस्य विनिर्दिशेत् । श्वेताम्बरधरा

नारी श्वेतगन्धानुलेपना । अवगूहति यं स्वप्ने तस्य श्रीः सर्वतोमुखी ॥ सर्वाणि कृष्णान्यपि निन्दितानि गोहस्तिदेवद्विजवाजिवर्जम् । सर्वाणि शुक्लान्यपि शोभनानि कार्पासभस्मास्थितक्रवर्जितानि ॥ ओदनतक्रलवणपिष्टचूर्णं वर्जम् । तैलाभ्यक्तं शरीरे तु रसेन च घृतेन च ॥ स्नेहेन वा तथान्येन व्याधिं तस्य विनिर्दिशेत् ॥ गोवृषं रथसंयुक्तमेकाकी योऽधिरोहति । तत्र तस्य विबुद्धस्य धनं शीघ्रं विनिर्दिशेत् ॥ खरोष्ट्ररथसंयुक्तमेकाकी योऽधिरोहति । तत्र तस्य विबुद्धस्य मृत्युं सद्यो विनिर्दिशेत् ॥ अथवा—नावमारोहयेद्यस्तु ह्यभिन्नां यः समुत्तरेत् । अथ वा निर्मलं तीर्थमध्वानं तस्य निर्दिशेत् ॥ पादुकोपानहच्छत्रं लब्ध्वा यः प्रतिबुध्यति । अध्वानं निर्दिशेत्तस्य शीघ्रं च पुनरागमः । दधिलाभे ध्रुवं धर्मो घृतलाभे ध्रुवं यशः । घृताशने ध्रुवं क्लेशो यशस्तु दधिभक्षणे ॥ दधि दृष्ट्वा भवेद्वृद्धिर्गोधूमैश्च धनागमः । यवैर्यज्ञागमं विद्याल्लाजाः सर्वार्थसिद्धिदाः ॥ फलिते च फलं विद्यात्पुष्पिते वृत्तिरुत्तमा । धूमायते भवेन्मृत्युः प्रज्वलंश्च श्रियावहः ॥ दीपं मूलं फलं पत्रं

कन्या च्छत्रं ध्वजं रथः । एतानि यो लभेत्स्वप्ने यश्चिन्तयति तद्भवेत् ॥ मानुष्याणि च मांसानि स्वप्नान्ते यस्तु भक्षयेत् । हरितानि च पक्वानि शृणु तस्यापि यत्फलम् । हरितेन शतं विद्यात्पक्वेन मरणं ध्रुवम् । पादे पञ्चशतं लाभः सहस्रं बाहुभक्षणे ॥ राज्यं च शतसाहस्रं भवेच्छिरसि भक्षणे। भक्षयेन्मद्यमांसानि तस्य लाभोऽयुतं स्मृतम् । पुत्रैस्तु वेष्टितो यो वै नगरे स्वगृहेऽपि वा ॥ गेहे माण्डलिको राजा नगरे पार्थिवो भवेत् । देवता यत्र नृत्यन्ति प्रहसन्ति रुदन्ति च ॥ आस्फोटयन्ति धावन्ति यत्र देशो विनश्यति । देवताश्च द्विजा गावः पितरो ललना नृपाः । यद्वदन्ति नरं स्वप्ने तत्तथैव फलं भवेत् । नागपत्रं लभेत्स्वप्ने कर्पूरमगरुं तथा । चन्दनं श्वेतवस्त्रं च तस्य श्रीः सर्वतोमुखी ॥ यो मालां लभते स्वप्ने फलं वा लभते यदि । कन्यालाभो भवेत्तस्य क्षिप्रमेव न संशयः ॥ क्षीरं पिबति यः स्वप्ने फेनदोहितेन स्थितम् । सोमपानं भवेत्तस्य लक्ष्मीहारोऽप्यनेकशः । हसिते कल्हारं प्राप्तं मूके रोदनमादिशेत् । अञ्जने नेत्ररोगं च रोमहर्षे धनक्षयः । यो लिङ्गमर्चितं

दृष्ट्वा अन्यां वा यदि देवताम् ॥ व्यवहारे जयस्तस्य जयो राजकुलेषु च। करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ॥ हसितो नाभिकश्चैव तस्य कालो भविष्यति ॥ स्वप्नाध्यायमिमं पुण्यं प्रातरुत्थाय यः पठेत्। दुःस्वप्नं नाशयेत्तस्य सुस्वप्नं च भविष्यति' इति बृहस्पतिप्रणीतस्वप्नाध्यायः ॥ अग्नित्रयं त्रीणि च पुष्कराणि नामत्रयं त्रीणि पदानि विष्णोः रुद्रस्त्रिनेत्रस्त्रिपथा च गङ्गा एता विदुः स्वप्नविनाशनानि ॥ यत्फलं गोसहस्रस्य सुवर्णालंकृतस्य च। त्रिवारं पठतस्तस्य स ददाति बृहस्पतिः ॥ तथा चोद्योगपर्वणि श्रीकृष्णं प्रति कर्णवाक्यम्—'सहस्रपादं प्रासादं स्वप्नान्ते तु युधिष्ठिर। अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत ॥ श्वेतोष्णीषाश्च दृश्यन्ते सर्वे ते शुक्लवाससः। आसनानि च शुभ्राणि सर्वेषामुपलक्षये। त्वं चापि मया दृष्टः स्वप्नान्ते रुधिराविलः ॥ आन्त्रेण पृथिवी दृष्टा परिक्षिप्ता जनार्दन। अस्थिसंचयमारूढश्चामितौजा युधिष्ठिरः ॥ सुवर्णपात्र्यां संहृष्टो भुक्तवान्घृतपायसम्। युधिष्ठिरो मया दृष्टो ग्रसमानो वसुंधराम् ॥ उच्चपर्वतमारूढो भीमकर्मा वृकोदरः। गदापाणिर्नर-

व्याघ्रो ग्रसन्निव महीमिमाम् ॥ क्षपयिष्यति नः सर्वा-न्सुव्यक्तं स महारणे । विदितं मे हृषीकेश यतो धर्म-स्ततो जयः ॥ पाण्डुरं गजमारूढो गाण्डीवी स धनं-जयः । त्वया सार्धं महाबाहो श्रिया परमया ज्वलन् ॥ यूयं सर्वान्हनिष्यध्वमत्र मे नास्ति संशयः । पार्थिवा-न्समरे कृष्ण दुर्योधनपुरोगमान् ॥ नकुलः सहदेवश्च सात्यकिश्च महारथः । शुक्लकेयूरकण्ठान्ताः शुक्लमाल्या-म्बरावृताः ॥ अधिरूढा नरव्याघ्रा हयवाहनमुत्तमम् । एत एव मया दृष्टाः पाण्डुरछत्रवाससः ॥ श्वेतोष्णी-षाश्च दृश्यन्ते त्रय एते जनार्दन । धार्तराष्ट्रस्य सैन्येषु तान्विजानीहि माधव ॥ अश्वत्थामः कृपश्चैव कृतवर्मा च सात्वतः । रथोष्णीषाश्च दृश्यन्ते सर्वे माधव पा-र्थिवाः । उष्ट्रप्रयुक्तमारूढौ भीष्मद्रोणौ जनार्दन । मया सार्धं महाबाहो धार्तराष्ट्रेण वै विभो ॥ अगस्त्यशास्तां च दिशं प्रयातौ भो जनार्दन । अचिरेणैव कालेन प्राप्स्या-मो यमसादनम् ॥ अहं चान्ये च राजानो यच्चैतत्क्षत्र-मण्डलम् । गाण्डीवाग्निं प्रवेक्ष्याम इति मे नास्ति संशयः ॥ श्रीभगवानुवाच 'उपस्थितविनाशेयं नून-

मद्य वसुंधरा । तथा हि मे वचः कर्णं नोपैति हृदयं तव । सर्वेषां तात भूतानां विनाशे प्रत्युपस्थिते । अनयो नयसङ्काशो हृदयान्नापसर्पति ।' इति । अत एव सुन्दरकाण्डे सुस्वप्नदुःस्वप्नयोस्तत्तदनुरूपं फलं प्रतिपादितं त्रिजटया—

स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भर्तुरस्या जयाय च ॥
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्छिताः ।
सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥
कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि ।
तासां श्रुत्वा तु वचनं राक्षसीनां मुखाच्च्युतम् ॥
उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ।
गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥
युक्तां हंससहस्रेण स्वयमास्थाय राघवः ।
शुक्लमाल्याम्बरधरो लक्ष्मणेन सहागतः ॥
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ।
सागरेण परिक्षिप्तं श्वेतं पर्वतमास्थिता ॥
रामेण संगता सीता भास्करेण प्रभा यथा ।

राघवश्च मया दृष्टश्चतुर्दन्तं महागजम् ॥
आरूढः शैलसंकाशं चचाल सह लक्ष्मणः ।
ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ॥
शुक्लमाल्याम्बरधरौ जानकीं पर्युपास्थितौ ।
ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः ॥
भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ।
भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ॥
चन्द्रसूर्यौ मया दृष्टौ पाणिना परिमार्जती ।
ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ।
सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ।
पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ।
इहोपयातः काकुत्स्थः सीतया सह भार्यया ॥
लक्ष्मणेन सह भ्रात्रा विमाने पुष्पके स्थितः ।
साण्डं त्रिभुवनं भीमं सर्वतः सचराचरम् ॥
सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा ।
क्षीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः ॥
तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः ।
तस्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः ॥

आसीनः प्राङ्मुखः श्रीमानासने परमे शुभे ।
अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः ॥

सब्रह्मर्षिगणैः सिद्धैः सर्वतीर्थजलेन च ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥

सीता तत्र पृथुश्रोणी रराज जनकात्मजा ।
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे ॥

पुनरेव मया दृष्टो रामो रमयतां वरः ।
विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने ॥

परं ब्रह्म परं सत्यं परं ज्ञानं परं तपः ।
परं बीजं परं क्षेत्रं परं कारणकारणम् ॥

शङ्खचक्रधरः श्रीमान्पुण्डरीकायतेक्षणः ।
श्रीवत्सवक्षा नित्यश्रीरक्षय्यः शाश्वतो ध्रुवः ॥

एवंभूतो महातेजा रामः कमललोचनः ।
सर्वलोकेश्वरः श्रीमान्रराज रघुनन्दनः ॥

ततो महेन्द्रः पितरो मुनीन्द्रा
गन्धर्वविद्याधरपन्नगेश्वराः ।

कृताभिषेकं परिवार्य रामं
प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः ॥

नृत्यन्ति गायन्ति समेत्य तत्र
वाद्यं प्रकुर्वन्ति सुरेन्द्रनार्यः ।
वंशाश्च वीणाप्रमुखाश्च भेर्यो
नदन्ति शङ्खाः पणवाश्च सर्वे ॥

ततोऽन्यत्र मया दृष्टो रामः सत्यपराक्रमः ।
लक्ष्मणेन सहभ्रात्रा सीतया सह भार्यया ॥

आरुह्य पुष्पकं दिव्यं विमानं सूर्यसंनिभम् ।
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥

लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ।
एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः ॥

न हि रामो महातेजाः शक्यो जेतुं सुरासुरैः ।
राक्षसैर्वापि चान्यैर्वा स्वर्गः पापजनैरिव ॥

रावणश्च मया दृष्टः क्षितौ तैलसमुक्षितः ।
रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥

विमानपुष्पकादद्य रावणः पतितो भुवि ।
कृष्यमाणः स्त्रिया दृष्टो मुण्डः कृष्णाम्बरः पुनः ॥

रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ।
पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः ।
गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थितः ॥
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ।
पतितोऽवाक्शिरा भूमौ गर्दभाद्भयमोहितः ॥
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः ।
उन्मत्त इव दिग्वासा दुर्वाक्यं प्रलपन्बहु ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ।
मलपङ्कं प्रविश्याशु मग्नस्तत्र तु रावणः ॥
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ।
काली कर्दमलिप्ताङ्गी दिशं यां यां प्रकर्षति ॥
एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः ।
रावणस्य सुताः सर्वे दृष्टास्तैलसमुक्षिताः ॥
वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ।
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ॥
एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
शङ्खदुन्दुभिनिर्घोषैर्नृत्तगेयैरलंकृतः ।

आरुह्य मेघसंकाशं मेघस्तनितनिःस्वनम् ॥
चतुर्दन्तगजं दिव्यमास्ते तत्र विभीषणः ।
चतुर्भिः सचिवैः सार्धं वेदाद्य समुपस्थितः ॥
समाजश्च महान्दृष्टो गीतवादित्रनिःस्वनः ।
पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ॥
लङ्का चैव पुरी रम्या सवाजिरथसंकुला ।
सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥
लङ्का दृष्टा मया स्वप्ने वानरेण तरस्विना ।
निर्दग्धा नगरी सर्वा रावणेनाभिपालिता ॥
पीत्वा तैलं प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः ।
लङ्कायां भस्मरूपायां प्रविष्टा राक्षसस्त्रियः ॥
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः ।
रक्तं विवसनं गृह्य प्रविष्टा गोमयह्रदे ॥ इति ॥

सप्ततमे, ततः स्वप्नकथनसमय एव सभां प्रविश्य कृतनमस्कारा दूताः सर्वसुहृज्जनेषु कुशलं पृच्छन्तं भरतम्—

कुशलास्ते नरव्याघ्र येषां कुशलमिच्छसि ।
श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥

इत्यवदन् । ततस्तदानीतधनवस्त्राभरणादिभिः स्वमातामहमातुलादीनभिपूज्य तैश्च विविधवसनभूषणादिप्रदानपूर्वकं कृताभ्यनुज्ञः रथमारुह्य भरतः शत्रुघ्नसहितो ययौ ॥ एकसप्ततितमे— ततो भरतः क्रमेण समतीत्य जनपदानुत्तीर्य नदीनदानतिक्रम्य पर्वतानासाद्य चोपवनमवलोक्य च नगरं सारथिमेवमवादीत्—

श्रुता नो यादृशाः पूर्वं नृपतीनां विनाशने ।
आकारांस्तानहं सर्वानिह पश्यामि सारथे ॥

संमार्जनविहीनानि परुषाण्युपलक्षये ।
असंयतकवाटानि श्रीविहीनानि सर्वशः ॥

बलिकर्मविहीनानि धूपसंमोदनेन च ।
अनाशितकुटुम्बानि प्रभाहीनजनानि च ॥

अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम् ।
अपेतमाल्यशोभानि असंमृष्टाजिराणि च ॥

देवागाराणि शून्यानि न च भान्ति यथापुरम् ।
देवतार्चाः प्रविद्धाश्च यज्ञगोष्ठयस्तथाविधाः ॥

माल्यापणेषु राजन्ते नाद्य पण्यानि वा तथा ।

दृश्यन्ते वणिजोऽप्यत्र न यथापूर्वमद्य वै ॥
[illegible] महद्भया नष्टव्यापारयन्त्रिताः ।
देवतायतनचैत्येषु दीनाः पक्षिगणाः स्थिताः ॥
मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशम् ।
सस्त्रीपुंसं च पश्यामि जनमुत्कण्ठितं पुरे ॥
इत्येवं कृत्वा भरतः सूतं तं दीनमानसः ।
तान्यरिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥

द्विसप्ततितमे—ततः प्रविश्य नगरमासाद्य राजभवनं समतीत्य कक्षात्रयमनवलोक्य राजानम्,

जगाम भरतो द्रष्टुं मातरं मातुरालयम् ।

ततः स्वसंदर्शनसमनन्तरमेव समुत्सृज्य सौवर्णमासनं परमसं प्रत्युद्गच्छन्तीं स्वमातरमभिवाद्य तत्रापि पितृद-र्शनदूयमानमानसः समागतोऽहं पितुः पादावभिवादयितुं तमाख्याहीति मातरमवदत् ।

तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
या गतिः सर्वभूतानां तां गतिं ते पिता गतः ॥

तद्वाक्यश्रवणमात्रेणैव भूमौ निपत्य चिरमार्तस्वरेण

विलपन्भरतः तैस्तैः सान्त्वनवचनैः सान्त्वयन्तीं जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः—

अभिषेक्ष्यति रामं नु राजा यज्ञं नु यक्ष्यते ।
इत्यहं कृतसंकल्पो हृष्टो यात्रामयासिषम् ॥

अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते ।
धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम् ॥

न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् ।
उपजिघ्रेद्धि मां मूर्ध्नि ततः संनम्य सत्वरम् ॥

यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि धीमतः ।
तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥

पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ।
तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥

पितुरनन्तरं ज्येष्ठभ्रातैव गतिरित्येतत्प्राकप्रपञ्चितम् ॥

आर्यः किमब्रवीद्राजा पिता मे सत्यविक्रमः ।
पश्चिमं साधु संदेशमिच्छामि श्रोतुमात्मनः ॥ इति ।

अनेन चरमकाले पित्रा पुत्रोऽनुशासनीय इति उक्तं भवति । तथा च बृहदारण्यके— 'अथातः संप्रतिर्यदा

प्रेष्यन्मन्यते अथ पुत्रमाह' इत्यारभ्य 'तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति' इत्यन्तेन अयमर्थः। एवमानुशासनिकेऽपि वैशंपायनः—'एवमुक्तस्तु गाङ्गेयः पाण्डवानिदमब्रवीत्। धृतराष्ट्रमुखांश्चापि सर्वांश्च सुहृदस्तथा॥ प्राणानुत्स्रष्टुमिच्छामि ते मानुज्ञातुमर्हथ। सत्येषु यतितव्यं वः सत्यं हि परमं बलम्॥ आनृशंस्यपरैर्भाव्यं सदैव नियतात्मभिः। ब्राह्मण्यैर्धर्मशीलैश्च तपोनित्यैश्च भारताः॥ इत्युक्त्वा सुहृदः सर्वान्संपरिष्वज्य चैव च। पुनरेवाब्रवीद्धीमान्युधिष्ठिरमिदं वचः॥ ब्राह्मणाश्चैव ते नित्यं प्राज्ञाश्चैव विशेषतः। आचार्यऋत्विजश्चैव पूजनीया जनाधिप'॥ इति। अत एवाश्रमवासाय प्रस्थितो धृतराष्ट्रः राज्यपालनप्रकारमुपदिश्य 'भीष्मेण सर्वमुक्तोऽसि कृष्णेन विदुरेण च। मयाप्यवश्यं वक्तव्यं प्रीत्या ते नरसत्तम' इति युधिष्ठिरं प्रति उक्तवान्।

इमां तु पश्चिमां वाचं व्याजहार पिता तव।
सिद्धार्थास्ते नरा राममागतं सीतया सह।
लक्ष्मणं च महाबाहुं द्रक्ष्यन्ति पुनरागतम्॥

इत्यकथयत् ॥ ततः 'कैकेयि, केदानीं सलक्ष्मणो राम:' इति वदन्तं भरतम्,

स हि राजसुतः पुत्र चीरवासा महावनम् ।
दण्डकान्सह वैदेह्या लक्ष्मणानुचरो गतः ॥

इत्यब्रवीत् । तद्वचनसमनन्तरम्,

कच्चिन्न ब्राह्मणधनं हृतं रामेण कस्यचित् ।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ।

इति तेन पृष्टा सा—

मया तु पुत्र श्रुत्वैवं रामस्यैवाभिषेचनम् ॥
याचितस्ते पिता राज्यं रामस्य च विवासनम् ।
स स्ववृत्तिं समास्थाय पिता ते तत्तथाकरोत् ।
रामश्च सह सौमित्रिः प्रेषितः सह सीतया ॥
तमपश्यन्प्रियं पुत्रं महीपालो महायशाः ।
पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान् ॥

तत्पुत्र शीघ्रं विधिवद्विधिज्ञै-
र्वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः ।

संकाश्य राजानमदीनसत्त्व-
मात्मानमुर्व्यामभिषेचयस्व ॥

इत्यवदत् ॥ त्रिसप्ततिचतुःसप्ततितमयोः—ततो भरतः पितृमरणरामविवासननिदानभूतां राज्यकामुकां कैकेयी-मेवमवदत्—

किं नु कार्यं हतस्येह मम राज्येन शोचतः ।
विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥

ननु त्वार्योऽपि धर्मात्मा त्वयि वृत्तिमनुत्तमाम् ।
वर्तते गुरुवृत्तिज्ञो यथा मातरि वर्तते ॥

तथा ज्येष्ठा हि मे माता कौसल्या दीर्घदर्शिनी ।
त्वयि धर्मं समास्थाय भगिन्यामिव वर्तते ॥

तस्याः पुत्रं कृतात्मानं चीरवल्कलवाससम् ।
प्रस्थाप्य वनवासाय कथं पापे न शोचसि ॥

अहं हि पुरुषव्याघ्रावपश्यन्रामलक्ष्मणौ ।
केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे ॥

अथ वा मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा ।
सकामां न करिष्यामि त्वामहं पुत्रगृद्धिनीम् ॥

अस्मिन्कुले तु पूर्वेषां ज्येष्ठो राज्येऽभिषिच्यते।
अपरे भ्रातरस्तस्मिन्प्रवर्तन्ते समाहिताः॥

निवर्तयित्वा रामं च तस्याहं दीप्ततेजसः।
दासभूतो भविष्यामि सुस्थितेनान्तरात्मना॥

भ्रूणहत्यामसि प्राप्ता कुलस्यास्य विनाशनात्।
कैकेयि नरकं गच्छ मा च भर्तुः सलोकताम्॥

सा त्वमग्निं प्रविश वा स्वयं वा दण्डकान्व्रज।
रज्जुं बद्ध्वाथ वा कण्ठे न हि तेऽन्यत्परायणम्॥

ननु 'आचार्यश्च पिता चैव माता भ्राता च पूर्वजः। नार्तेनाप्यवमन्तव्याः' इत्यादिमनुवचनपर्यालोचनया मातृनिन्दायाः प्रतिषेधावगमात् भरतेन कथं माता निन्दिता इति चेन्न। अधर्ममार्गप्रवृत्ता गुर्वादयोऽपि राज्ञा शिक्षणीयाः। तथा च मनुः—'पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः। नादण्ड्यो नाम राज्ञोऽस्ति यस्त्वधर्मेण तिष्ठति॥' इति। राजधर्मेऽपि 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्॥ इदं च कैकेयी भर्तृमरणसंपादकराम-

विवासनकरणात् महापराधवतीति तस्या दण्डो युक्तः । तस्य च— 'गुरून्पुरोहितान्विप्रान्प्राग्दण्डेनैव दण्डयेत् । विवादिनो नरांश्चान्यान्दोषिणोऽर्थेन दण्डयेत् । महापराधयुक्तांश्च वधदण्डेन दण्डयेत् ॥' इति बृहस्पतिवचनेन गुर्वादिभेदेन दण्डस्य व्यवस्थापितत्वात्, मातुः कैकेय्या गुरुत्वात् वाग्दण्डनं यत्कृतं तद्युक्तमेव ॥ पञ्चसप्ततितमे—अथ कौसल्या सकरुणं विलपतो भरतस्याक्रोशश्रवणेन समागतं भरतमवगत्य तद्दर्शनसमुत्सुका बभूव । भरतशत्रुघ्नावपि समासाद्य कौसल्यां स्वसंदर्शनसमसमयसमाधिकशोकवशेन भूमौ वेष्टमानाम्,

पर्यष्वजेतां दुःखार्तां पतितां नष्टचेतनाम् ।

ततः,

भरतं प्रत्युवाचेदं कौसल्या भृशदुःखिता ।
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम् ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम् ।
कैकेयी कं गुणं तत्र पश्यन्ती क्रूरदर्शिनी ॥
क्षिप्रं ममापि कैकेयी प्रस्थापयितुमर्हति ।

अथ वा स्वयमेवाहं सुमित्रानुचरा सुखम् ॥
अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः ।

ननु 'अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः' इत्युक्तम् । तदनुपपन्नम् । मृते भर्तरि तत्संस्कारस्यावश्यकर्तव्यत्वेन संस्कार्यस्य राज्ञः संस्कारकर्तुर्भरतस्य च संनिधाने तावानादृत्य वनं प्रत्यग्निहोत्रनयनस्य अयुक्तत्वात् । न च ज्येष्ठस्यैवाधिकारात्, 'भरतः प्रेतकार्याणि मा स्म कार्षीद्गतायुषः' इति पित्रा प्रतिषिद्धस्य भरतस्यानधिकाराच्च भर्तृशरीरं गृहीत्वा रामसमीपं गच्छामीत्येतदभिप्रायेणोक्तमिति वाच्यम् । तर्हि अग्रेऽपि भरतेन संस्कारो न कर्तव्यः स्यात् । किं च, कैकेयीं परित्यज्य कौसल्यासुमित्राभ्यामपि नयनमनुपपन्नम् । अश्वमेधादिक्रतुसंबन्धेन पत्नीत्वात्, अतः केवलाग्नीनां संस्कार्यसहितानां वनं प्रति नयनमनुपपन्नमेवेति चेन्न । प्रियं चेद्भरतस्यैव तद्रामप्रव्राजनं भवेत् । 'मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः' इति राजवचनात् रामगमनमङ्गीकुर्वतो भरतस्य पितृसंस्कारेऽनधिकारात् भरतकृतशप-

थात्प्राक्तदाशयस्याज्ञानात् रामसमीपमेव संस्कार्येण सहाग्नीनां नयनं युक्तम् । यच्चोक्तं कैकेय्या अपि पत्नीत्वात्तया विना कथमग्नीनां नयनम् इति तदपि न । कौसल्याया ज्येष्ठत्वात् 'ज्येष्ठा चेदग्निसंयुक्ता ह्यन्या गच्छेद्यथासुखम्' इति वचनेन ज्येष्ठाया एवाग्निसंबन्धावगमात् 'अगृह्णां यच्च ते पाणिमग्निं पर्यणयं च यत् । अनुजानामि तत्सर्वमस्मिँल्लोके परत्र च ॥ केवलार्थपरां हित्वा त्यक्तधर्मां त्यजाम्यहम्' इत्यादिवचनपर्यालोचनया कैकेय्याः परित्यागावगमाच्च तां परित्यज्याप्यग्नीनां नयने बाधकाभावात् । तस्मात् 'अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः' इति वचनं युक्तमेव । अत एवाग्रे भरतकृतशपथैरवगततदाशया कौसल्या भरतकृतं भर्तृसंस्कारमभ्युपेत्य वनं न गतवती इति ।

इत्यादिबहुभिर्वाक्यैः क्रूरैः संभर्त्सितोऽनघः ।
कौसल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥

कृता शास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन ।
सत्यसन्धः सतां श्रेष्ठो यस्यार्योऽनुमते गतः ॥

अनेन सच्छास्त्राविश्वासः पापाधायक इत्युक्तं भवति। तथा चानुशासनिके 'यः प्रवृत्तां श्रुतिं सम्यक्शास्त्रं वा मुनिभिः कृतम्। दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातकम्' इति।

प्रैष्यं पापीयसां यातु सूर्यं च प्रति मेहतु।
हन्तु पादेन गां सुप्तां यस्यार्योऽनुमते गतः॥

अत्र पापीयसां निकृष्टानां सेवनं पापाधायकमित्यवगम्यते। तथा उद्योगपर्वणि 'उत्तमानेव सेवेत प्राप्तकाले तु मध्यमान्। अधमांस्तु न सेवेत यदीच्छेद्भूतिमात्मनः॥' इति। द्वितीयचरणेन सूर्याभिमुखतया विण्मूत्रविसर्जनं पापाधायकम्। तथा च पराशरः— 'प्रत्यादित्यं प्रत्यनलं प्रतिगाश्च प्रतिद्विजम्। ये मूत्रयन्ति पथि च ते भवन्ति गतायुषः' इति। 'हन्तु ते भवन्ति गतायुषः' इति। 'हन्तु पादेन गाम्' इत्यनेन गवां पदा ताडनं पापाधायकम्। अथ पदा स्पर्शमपि प्रतिषेधति। एवं आपस्तम्बोऽपि 'देवतानां राज्ञश्च ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जयेत्' इति।

कारयित्वा महत्कर्म भर्ता भृत्यमनर्थकम् ।
अधर्मो यस्य सोऽस्यास्तु यस्यार्थोऽनुमते गतः ॥

अनेन कर्मकराणां भृत्यादाने महान्दोष इति सूचितम् । अत एव भृत्यानां भृतिदाने कालातिक्रमणेऽप्यनर्थ उक्तः । सभापर्वणि 'कालातिक्रमणाच्चैव भक्तचेतनयोर्भृताः । भर्तुः कुप्यन्ति दौर्गत्या सोऽनर्थः सुमहान्स्मृतः' इति ॥

परिपालयमानस्य राज्ञो भूतानि पुत्रवत् ।
ततस्तु द्रुह्यतां पापे यस्यार्थोऽनुमते गतः ॥

इत्यनेन सम्यक्परिपालनं कुर्वतो राज्ञो द्रोहो न कर्तव्यः इति सूचितम् । आनुशासनिके 'भर्तृपिण्डमुपाश्नन्यो राजद्विष्टानि सेवते । सोऽपि मोहसमापन्नो मृतो जायेत वानरः' इति । गारुडपुराणेऽपि 'गुरुमित्रद्रुहः पापा ये च स्वामिद्रुहो जनाः । अमेध्ये क्रिमयः सर्वे मृगव्याधा भवन्ति ते ॥'

बलिषड्भागमुद्धृत्य नृपस्यारक्षतः प्रजाः ।
अधर्मो योऽस्य सोऽस्यास्तु यस्यार्थोऽनुमते गतः॥

इत्यनेन षड्भागं गृहीत्वा धर्मेण प्रजा अरक्षतो राज्ञो महान्दोष इति सूचितम् । तथा च मनुः— 'अरक्षितारं राजानं बलिषड्भागहारिणम् । तमाहुः सर्वलोकस्य समग्रमलहारिणम्' इति ॥

संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम् ।
तां विप्रलपतां पापं यस्यार्योऽनुमते गतः ॥

इत्यनेन द्विजेभ्यः प्रतिश्रुत्य अदाने दोष इत्युक्तं भवति । तथा च माधवीये— 'प्रतिश्रुत्य द्विजेभ्यश्च अदत्त्वा मद्गुको भवेत्' इति । यज्ञे उपदिष्टदक्षिणाया अदाने प्रत्यवायो भवतीत्युक्तम् । तथा चापस्तम्बः— 'योऽदक्षिणेन यज्ञेन स यज्ञः प्रक्षामो नायुरुपदध्यात् यथादिष्टां दक्षिणामन्तरि या दुर्वारा प्रतिष्ठिता या देयासां प्रायश्चित्तिः' इति ॥

उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ।
स नाशयतु दुष्टात्मा यस्यार्योऽनुमते गतः ॥

इत्यनेन सद्गुरुणोपादिष्टवेदशास्त्रादिपरित्यागे प्रत्यवा-

यो भवतीत्युक्तम् । तथा च मनुः—'ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः । गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट्' इति ॥

पायसं कृसरं छागं वृथा सोऽश्नातु निर्घृणः ।
गुरूंश्चाप्यवजानातु यस्यार्योऽनुमते गतः ॥

इत्यनेन पायसाद्युत्तमान्नं देवब्राह्मणादिभ्योऽदत्त्वा न भक्षणीयमित्युक्तं भवति । तथा च मनुः—'वृथा कृसरसंयावं पायसापूपमेव च । अनुपाकृतमांसं च प्रयत्नेन विवर्जयेत्' इति । गुरूंश्चाप्यवजानात्वित्यनेन गुर्वाद्यवमानं न कर्तव्यमिति सूचितम् । तथा च मनुः—'आचार्यमृत्विजश्चैव गुरूंश्चैव तपस्विनम् । मुनींश्चाप्यवमन्यन्ते ते भवन्ति हि राक्षसाः ॥

गाश्च स्पृशतु पादेन गुरून्परिवदेत च ।
मित्रे द्रुह्येत सोऽत्यन्तं यस्यार्योऽनुमते गतः ॥

इति गवां पादस्पर्शने दोषः । तथा चानुशासनिके—'पादमुद्यम्य यो मर्त्यः स्पृशेद्गाश्च सुदुर्मतिः । ब्राह्मणं वा

महाभागं दीप्यमानं तथानलम् ॥ तस्य दोषान्प्रवक्ष्यामि तच्छृणुध्वं समाहिताः । दिवं स्पृशत्यशब्दोऽस्य ब्रश्यन्ति पितरश्च वै ॥ वैमनस्यं च देवानां कृतं भवति पुष्कलम् । पावकश्च महातेजा हव्यं न प्रतिगृह्णाति । आजन्मनां शतं चैव नरके पच्यते तु सः । निष्कृतिर्न च तस्यापि अनुमुह्यन्ति कर्हिचित् । तस्माद्गावो न पादेन स्प्रष्टव्या वै कदाचन । ब्राह्मणश्च महातेजा दीप्यमानस्तथानलः ॥ श्रद्दधानेन मर्त्येन आत्मनो हितमिच्छता' इति । गुरून्परिवदेत चेत्यनेन गुर्वादीनां तिरस्कारो न कर्तव्य इति सूचितम् । तथा च पराशरः—'गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः । अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः' इति । 'मित्रे द्रुह्येत' इत्यनेन मित्रद्रोहो न कर्तव्य इति सूचितम्— तथा च गारुडपुराणे—'गुरुमित्रद्रुहः पापा ये च स्वामिद्रुहो जनाः । अमेध्ये क्रिमयः सर्वे मृगव्याघ्रा भवन्ति ते ॥' इति ॥

विश्वासात्कथितं किंचित्परिवादं मिथः क्वचित् ।
विवृणोतु स दुष्टात्मा यस्यार्योऽनुमते गतः ॥

इत्यनेन विश्वासेन कथितं परिवादं न विवृणुयात् इति सूचितम् । तथा च सामविधानब्राह्मणे 'गुह्यं प्रकाशयन्नधर्मभाक् भवति' इति । आनुशासनिकेऽपि 'विश्वासहर्ता तु नरो मीनो जायेत दुर्मतिः । भूत्वा मीनोऽष्टवर्षाणि मृगो जायेत भारत' इति ॥

**पुत्रदारैश्च भृत्यैश्च स्वगृहे परिवारितः ।**
**स एको मृष्टमश्नातु यस्यार्थोऽनुमते गतः ॥**

इत्यनेन पुत्रादिभिः परिवृतः तान्परित्यज्य स्वयमेव मृष्टान्नं नाश्नीयादिति सूचितम् । तथा च वामनपुराणे—'बुभुक्षितेषु भृत्येषु य एकोऽश्नाति मानवः । श्वयोनिं स समासाद्य चण्डालो जायते नरः ॥' इति ॥

**अप्राप्य सदृशान्दारानपत्यः प्रमीयताम् ।**
**अनवाप्तक्रियाधर्मो यस्यार्थोऽनुमते गतः ॥**

इत्यनेन सदृशदाराद्यप्राप्तिः पापस्य फलमिति सूचितम् । तथा च माधवीये—'अपकारं तु यः कुर्यादुपकर्तरि यन्नरः । श्वासकासीज्वरीसर्वगात्ररोगी मृतप्रजः ॥ मृतपुत्रोऽथ वन्ध्यः स्याद्यो द्वेष्टि परसंततिम् ॥' इति ।

तत्र सदृशदाराप्राप्तौ मार्कण्डेयपुराणे— ' ब्राह्मणः क्षत्रियो वैश्यः स्ववर्णे पाणिसंग्रहम् । अकृत्वा त्वन्यजायायाः पतन्ति नृप संग्रहात् ॥

राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ।
भृत्यत्यागे च यत्पापं तत्पापं प्रतिपद्यताम् ॥

इत्यनेन राजादिवधे भृत्यत्यागे च महान्दोष इत्युक्तं भवति । राजन्यवैरिहन्ता च तथैव गुरुतल्पगः । तप्तकुम्भे स्वसागामी हन्ति राजभटांश्च यः ' इति विष्णुपुराणे । तत्रैव, 'स्त्रियं हत्वा तु दुर्बुद्धिर्यमस्य विषयं गतः । बहून्क्लेशान्समासाद्य संसारांश्चैकविंशतिम् ' ॥ इति । बालकन्यां यदा हन्यात्तदा तेनैव कारयेत् । शिशुं हत्वा यदा शूद्रो गर्भमात्रं यदा हरेत् ॥ हस्तद्वयं तदा छित्वा निर्वास्यो विषयाद्बहिः ।' इति । भृत्यत्यागे आनुशासनिके भीष्मः— 'उपाध्यायांश्च भृत्यांश्च भक्तांश्च भरतर्षभ । ये त्यजन्ति विकारां स्त्रीं ते वै निरयगामिनः ॥'

संग्रामे समुपोढे तु शत्रुपक्षभयङ्करे ।
पलायमानो वध्येत यस्यार्योऽनुमते गतः ॥

इत्यनेन शत्रुसंमुखतयैव मर्तव्यं परावृत्य मरणे महान्दोष इति सूचितः। तथा च मनुः—'यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम्। भर्ता तत्सर्वमादत्ते परावृत्य हतस्य च' इति ॥

**कपालपाणिः पृथिवीमटतां चीरसंवृतः**
**भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गतः ॥**

इत्यनेन ब्रह्महत्याप्रायश्चित्तसूचककपालपाण्यादिकथनात् ब्रह्महत्यादोषः सूचितः। तथा च मनुः— 'ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्' ॥ हेमाद्रौ मार्कण्डेयः— अज्ञानाद्ब्राह्मणं हत्वा चीरवासा जटी भवेत्। स्वेनैव हतविप्रस्य कपालमपि धारयेत् ॥ तदभावे मुनिश्रेष्ठ कपालं चान्यमेव वा। वन्याहारो भवेन्नित्यमेकाहारो मिताशनः ॥ तीर्थान्युपवसेच्चैव पुण्यक्षेत्राश्रमाणि च। यदि वन्येन जीवेत ग्रामे भिक्षां समाचरेत् ॥ ततः शुद्धिमवाप्नोति ब्रह्महा रघुनन्दन' इति ॥

**पाने प्रसक्तो भवतु स्त्रीपक्षेषु च नित्यशः।**

कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गतः ॥

इत्यनेन मद्यस्त्र्याद्यासक्त्या पापमित्युक्तं भवति । तथा च मनुः— 'स्त्रियोऽक्षा मृगपापानां वाक्पारुष्यं च पञ्चमम् । महच्च दण्डपारुष्यमर्थदूषणमेव च ॥ एतान्दोषान्नरः प्राज्ञो बुद्ध्या बुद्ध्या विवर्जयेत्' इति। कामक्रोधयोस्तु गीतायाम्—'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभः तस्मादेतत्त्रयं त्यजेत्' इति ॥

मा स्म धर्मे मनो भूयादधर्मं स निषेवते ।
अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥

इत्यनेन धर्मे द्वेषः, अधर्मे स्नेहः, अपात्रे प्रदानं च पापफलमित्युक्तं भवति । तथा चानुशासनिके— 'ये नास्तिका निष्क्रियाश्च गुरुशास्त्रातिलङ्घिनः । अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः' इति । अपात्रदानं प्रतिषेधति गौतमः— 'प्रतिश्रुत्याप्यधर्मसंयुक्ते न दद्यात्' इति। मनुरपि— 'न चाण्वपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके पापे नावेदविदि धर्मवित् ॥ त्रिष्व-

ष्येतेषु दत्तं हि विधिनाप्यार्जितं धनम् । दातुर्भवेदनर्थाय परत्रादातुरेव च ॥' इति ॥

उभे संध्ये शयानस्य यत्पापं परिकल्प्यते ।
तच्च पापं भवेत्तस्य यस्यार्योऽनुमते गतः ॥

इत्यनेन संध्ययोर्निद्रा न कर्तव्या इति सूचिता। तथा च मनुः— 'नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत् ।' इति ॥

यदग्निदायके पापं यत्पापं गुरुतल्पगे ।
मित्रद्रोहे च यत्पापं तत्पापं प्रतिपद्यताम् ॥

इत्यनेन गृहादिदाहे महत्पातकं भवतीत्युक्तम् । तथा चानुशासनिके— 'आश्रमे वा वने वापि ग्रामे वा नगरे पुरे । अग्निं समुत्सृजेन्मोहात्तं विद्याद्ब्रह्मघातकम् ॥' इति । गुरुतल्पगे माधवीये— 'मनसापि गुरोर्भार्यां यः शिष्यो याति पापकृत् । श्वयोनौ च स संभूतस्त्रीणि वर्षाणि जीवति ॥ तत्रापि निरयं प्राप्तः क्रिमियोनौ प्रजायते ॥' इति । मित्रद्रोहे पूर्वमेवोदाहृतम् ॥

देवतानां पितॄणां च मातापित्रोस्तथैव च ।
मा स्म कार्षीत्स शुश्रूषां यस्यार्योऽनुमते गतः ॥

इत्यनेन देवतादीनां शुश्रूषाविद्वेषे पापं भवतीति सूचितम् । तथा च मनुः—'तेषां त्रयाणां शुश्रूषा परमं तप उच्यते । अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥' इति ॥

सतां लोकात्सतां कीर्त्याः सज्जुष्टात्कर्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥

इत्यनेन सत्कर्मपरित्यागः पापाधायक इत्युक्तो भवति । तथा च माधवीये—'देवकार्यमकृत्वा तु पितृकार्यमथापि वा । अनिर्वाप्य नरो ह्यश्नन्मृतो जायति वायसः ॥

ऋतुस्नातां सतीं भार्यामृतुकालानुरोधिनीम् ।
अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः ॥

इत्यनेन ऋतुकालानभिगमने दोष इत्युक्तम् । तथा च याज्ञवल्क्यः—'ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥' इति ॥

तृषार्ते सति पानीये विप्रलम्बेन योजयेत् ।
यत्पापं लभते तत्स्याद्यस्यार्योऽनुमते गतः ॥

इत्यनेन तृषार्तस्य पानीयविप्रलम्बो न कर्तव्य इत्युक्तम् । तथा चानुशासनिके-- 'गोकुलस्य तृषार्तस्य जलार्थे वसुधाधिप । उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातकम् ॥' इति ॥

विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ।
एवमाश्वासयन्नेव दुःखार्तो निपपात ह ॥

तथा तु शपथैः क्लिष्टैः शपमानमचेतनम् ।
भरतं शोकसंतप्तं कौसल्या वाक्यमब्रवीत् ॥

मम दुःखमिदं पुत्र भूयः समुपजायते ।
शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥

दिष्ट्या न चलितो धर्मादात्मा ते सह लक्ष्मणः ।
वत्स सत्यप्रतिज्ञो मे सतां लोकानवाप्स्यसि ॥

अनेन सर्गेण प्राप्तं संशयं शपथेनापि परिहरेदिति सूचितम् । तथा च बिसस्तैन्यसंशयः सप्तर्षिभिः शपथेन निवर्तित इति प्रतिपादितमानुशासनिके— 'श्रमेण महता

कृत्वा ते बिसानि कलापराः। तीरे निक्षिप्य पद्मिन्यास्तर्पणं चक्रुरम्भसा ॥ अथोत्थाय जलात्तस्मात्सर्वे ते समुपागमन्। नापश्यंश्चापि ते तानि बिसानि पुरुषर्षभाः। ऋषय ऊचुः— 'केन क्षुधा परीतानामस्माकं पापकर्मणा। नृशंसेनापनीते बिसान्यां ह्यारकाङ्क्षिणाम्। ते शङ्कमानास्त्वन्योन्यं पप्रच्छुर्द्विजसत्तमाः ॥ ते ऊचुः समयं सर्वे कुर्म इत्यरिकर्शन। तदुक्त्वा बाढमित्येवं सर्व एव तदा समम् ॥ क्षुधार्ताः सुपरिश्रान्ताः शपथायोपचक्रमुः। अत्रिरुवाच— 'स गां स्पृशतु पादेन सूर्यं च प्रतिमेहतु। अनध्यायेष्वधीयेत बिसस्तैन्यं करोति यः। शरणागतं हन्तु सखं स्वसुतां चोपजीवतु ॥ अर्थान्काङ्क्षतु कीनाशाद्बिसस्तैन्यं करोति यः।' कश्यपः— सर्वत्र सर्वं लपतु न्यासलोपं करोतु च। कूटसाक्षित्वमध्येतु बिसस्तैन्यं करोति यः। वृथा मांसाशनश्चास्तु वृथा दानं करोतु च। यातु स्त्रियं दिवा चैव बिसस्तैन्यं करोति यः। भरद्वाज उवाच— 'नृशंसस्त्यक्तधर्मास्तु स्त्रीषु ज्ञातिषु गोषु च। ब्राह्मण्यं चापि जयतां बिसस्तैन्यं क-

रोति यः । उपाध्यायमधःकृत्वा ऋचोऽध्येतु यजूंषि च । जुहोतु च स कक्षाग्नौ बिसस्तैन्यं करोति यः ॥' जमदग्निरुवाच— 'पुरीषमुत्सृजत्वप्सु हन्तु गां चैव दुह्यतु । अनृतौ मैथुनं यातु बिसस्तैन्यं करोति यः ॥ द्वेष्यो भार्योपजीवी स्याद्दूरबन्धुश्च वैरवान्। अन्योन्यस्या- तिथिश्चास्तु बिसस्तैन्यं करोति यः ॥ गौतमः—'अ- धीत्य वेदांस्त्यजतु त्रीनग्नीनपविध्यतु । विक्रीणातु तथा सोमं बिसस्तैन्यं करोति यः । विश्वामित्र उवाच— 'जीवतो वै गुरून्भृत्यान्भरन्त्वस्य परे जनाः । अग- तिर्बहुपुत्रः स्याद्बिसस्तैन्यं करोति यः । अशुचिर्ब्रह्मकू- टोऽस्तु ऋद्धया चैवाप्यहंकृतः । कर्षको मत्सरी चास्तु बिसस्तैन्यं करोति यः ॥ वर्षाचरोऽस्तु भृतको राज्ञ- श्चास्तु पुरोहितः । अयाज्यस्य भवेदृत्विग्बिसस्तैन्यं क- रोति यः ॥' अरुन्धत्युवाच— 'नित्यं परिभवेच्छ्वश्रूं भर्तु- र्भवतु दुर्मनाः । एका स्वादु समश्नातु बिसस्तैन्यं करोति या ॥ ज्ञातीनां गृहमध्यस्था सक्तूनत्तु दिनक्षये । अभाग्यावीरशूरास्तु बिसस्तैन्यं करोति या ॥' गण्डो- वाच— 'अनृतं भाषतु सदा बन्धुभिश्च विरुध्यतु ।

ददातु कन्यां शुल्केन बिसस्तैन्यं करोति या ॥ साध-
यित्वा स्वयं प्राश्याद्यस्य जीर्यतु चैव ह । विकर्मणा
प्रमीयेत बिसस्तैन्यं करोति या ॥' पशुसख उवाच—
'दास एव प्रजायेतामप्रसूतिरकिंचनः । दैवतेष्वनमस्कारो
बिसस्तैन्यं करोति या ॥' शुनसख उवाच— 'अध्वर्यवे
दुहितरं दातु छन्दोगे वा चरितब्रह्मचर्ये । अथर्वणं वेद-
मधीत्य विप्रः स्नायीत वा यो हरते बिसानि ॥' ऋषय
ऊचुः 'इष्टमेतद्द्विजातीनां योऽयं ते शपथः कृतः ।
त्वया कृतं बिसस्तैन्यं सर्वेषां नः शुनः सख ॥' 'न्यस्त-
मद्य नपश्यद्भिर्यदुक्तं कृतकर्मभिः । सत्यमेतन्न मिथ्यैत-
द्बिसस्तैन्यं मया कृतम् । मया ह्यन्तर्हितानीह बिसानि वा
विपश्यत ॥ परीक्षार्थं भगवतां कृतमेतन्मयानघाः'
इति । तथा पुष्करस्तैन्ये भृग्वादिभिः शपथेन संशयो
निवारित इति प्रतिपादितम् । तत्रैव ते निश्चितास्तत्र
महर्षयस्तु संपश्यन्तो धर्ममेतन्नरेन्द्राः । ततोऽशपन्त शप-
थान्पर्यायेण सहैव ते पार्थिवपुत्रपौत्रैः ॥ भृगुरुवाच—
'प्रत्याक्रोशेदिहाक्रुष्टस्ताडितः प्रतिताडयेत् । खादेच्च पृष्ठ-
मांसानि यस्ते हरति पुष्करम् ॥' वसिष्ठ उवाच— 'आ-

स्वाध्याय परे लोके श्वानं च परिकर्षतु । पुरे च भिक्षु-
र्भवतु यस्ते हरति पुष्करम् ॥' कश्यप उवाच— सर्वत्र
सर्वं लपतु न्यासे लोभं करोतु च । कूटसाक्षित्वं च यातु
यस्ते हरति पुष्करम् ॥' गौतमः— 'जीवत्वहंकृतो बुद्ध्या
विषमेण समेन सः । कर्षको मत्सरी चास्तु यस्ते हरति
पुष्करम् ॥' अङ्गिरा उवाच— 'अशुचिर्ब्रह्मकूटस्तु श्वानं
च परिकर्षतु । ब्रह्महा निकृतिश्चास्तु यस्ते हरति पुष्क-
रम् ॥' धुन्धुमार उवाच— 'अकृतज्ञस्तु मित्राणां
शूद्राणां च प्रजायतु । एकः संपन्नमश्नातु यस्ते हरति
पुष्करम् ॥' पुरुरुवाच— 'चिकित्सायां प्रचरतु भार्यया
चैव पुष्यतु । श्वशुरात्तस्य वृत्तिः स्याद्यस्ते हरति
पुष्करम् । दिलीप उवाच— 'उदपानप्लवे ग्रामे ब्राह्मणो
वृषलीपतिः । तस्य लोकान्स व्रजतु यस्ते हरति पुष्करम्'
शुक उवाच— 'वृथा मांसं समश्नातु दिवा गच्छतु
मैथुनम् । प्रेष्यो भवतु राज्ञश्च यस्ते हरति पुष्करम् ॥'
जमदग्निरुवाच— 'अनध्यायेष्वधीयीत मित्रं श्राद्धे च
भोजयेत् । श्राद्धे शूद्रस्य चाश्नीयाद्यस्ते हरति पुष्करम् ॥
शिविरुवाच— 'अनाहिताग्निर्म्रियतां यज्ञे विघ्नं करोतु

च । तपस्विभिर्विरुध्येच्च यस्ते हरति पुष्करम् ॥' ययातिरुवाच— 'अनृतौ व्रती जटी चैव भार्यायां स प्रजायतु । निराकरोतु वेदांश्च यस्ते हरति पुष्करम् ॥' नहुष उवाच— 'अतिथिर्गृहसंस्थोऽस्तु कामवृत्तस्तु दीक्षितः । विद्यां प्रयच्छतु भृतेर्यस्ते हरति पुष्करम् ॥ नारद उवाच— 'गृहज्ञानी बहिः शास्त्रं पठतां विस्वरं पदम् । गरीयसोऽवजानातु यस्ते हरति पुष्करम् ॥' नाभाग उवाच— 'अनृतं भाषतु सदा सद्भिश्चैव विरुध्यतु । शुल्केन कन्यां ददातु यस्ते हरति पुष्करम् ॥' कविरुवाच— 'पद्भ्यां स मां ताडयतु सूर्यं च प्रतिमेहतु । शरणागतं संत्यजतु यस्ते हरति पुष्करम् ॥' विश्वामित्र उवाच— 'करोतु भृतको वर्षां राज्ञश्चास्तु पुरोहितः । ऋत्विगस्तु ह्ययाज्यस्य यस्ते हरति पुष्करम्' ॥ पर्वत उवाच— 'ग्रामे चाधिकृतः सोऽस्तु खरयानेन गच्छतु । शुनः कर्षतु वृत्त्यर्थं यस्ते हरति पुष्करम् ॥' भरद्वाज उवाच—'सर्वपापसमादानं नृशंसे चानृतेयतु । तत्तस्यास्तु सदा पापं यस्ते हरति पुष्करम् ॥' अष्टक उवाच— 'स राजास्त्वकृतप्रज्ञः कामवृत्तस्तु पापकृत् । अधर्मेणाभिशास्तूर्वीं यस्ते ह-

रति पुष्करम् ॥' गालव उवाच— 'पापिष्ठेभ्यस्तु सोऽर्घार्हः स नरोऽस्तु स्वपाककृत् । दत्त्वा दानं कीर्तयतु यस्ते हरति पुष्करम् ॥' अरुन्धत्युवाच— 'श्वश्रूापवादं वदतु भर्तुर्भवतु दुर्मनाः । एका स्वादु समाश्नातु या ते हरति पुष्करम् ।' वालखिल्या ऊचुः— 'एकपादेन वृत्त्यर्थं ग्रामद्वारे स तिष्ठतु । धर्मज्ञस्त्यक्तधर्मोऽस्तु यस्ते हरति पुष्करम् ॥' शुनःसख उवाच— 'अग्निहोत्रमनादृत्य स सुखं स्वपतु द्विजः । परिव्राट् कामवृत्तोऽस्तु यस्ते हरति पुष्करम् ।' सुरभ्युवाच— 'वाल्जेन निदानेन कांस्यं भवतु दोहनम् । दुह्येत परवत्सेन यस्ते हरति पुष्करम्' इति ॥

षट्सप्ततितमे— ततः शोकसंतप्तहृदयो भरतः नायं क्लेशकालः प्राप्तं कालमौर्ध्वदैहिकम् झटिति प्रवर्त्यतामिति वसिष्ठानुज्ञया राजानं तैलसंरोधादुद्धृत्य रत्नपरिष्कृते शयनीये संवेश्य,

ऋत्विक्पुरोहिताचार्यांस्त्वरयामास सर्वशः ॥

ये त्वग्नयो नरेन्द्रस्य अग्न्यागाराद्बहिष्कृताः।
ऋत्विग्भिर्याजकैश्चैव ते ह्रियन्त यथाविधि॥

हरणविधिमाहापस्तम्बः— 'अथोल्मुकः प्रथमाः प्रतिपद्यन्ते न हीनमन्वाहरेयुः' इति। गौतमोऽपि— 'पूर्वमग्निं संस्कर्ता मुक्तशिखः बध्यतः शवमनुपृष्ठं संभागनितरे'। ततः शिबिकायामारोप्य नीयमाने राजनि,

हिरण्यं च सुवर्णं च वासांस्याभरणानि च।
प्रकिरन्तो राजमार्गं नृपतेरग्रतो ययुः॥

ततश्चन्दनागरुकाष्ठैः सुनिचितां चितामधिरोप्य

तथा हुताशनं कृत्वा जेपुस्तस्य तदर्त्विजः।
जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः॥

सामगानकरणे गौतमः— 'अथो प्रस्थानं नाके सुपर्णमिति ग्रामे गायेत्, धूम उदिते त्वेषस्ते धूम ऋण्वतीति, प्रज्वलिते अग्ने मृडमहां असीति द्वाभ्यां जगन्मज्योतिरिति च अनुगीतो ब्रह्मलोकमवाप्नोति वामदेव्यं

त्रिचे गायेदिति । ततः समागतनारीणां सकरुणं विल-पन्तीनां क्रौञ्चीनामिव निनदश्रवणेन द्विगुणीकृतशोका-वेगो भरतः सरयूतीरमाजगाम ।

कृत्वोदकं ते भरतेन सार्धं
नृपाङ्गना मन्त्रिपुरोहिताश्च ।
पुरं प्रविश्याश्रुपरीतनेत्रा
भूमौ दशाहं व्यनयन्त दुःखम् ॥

अनेनाशौचिभिर्यावदाशौचं निवापाञ्जलिं प्रदाय अक्षारलवणाशनभूशयनादिनियमवद्भिः स्थेयमिति सू-चितम् । तथा च मनुः—'अक्षारलवणाः स्युर्निमज्जेयुश्च ते त्र्यहम् । मांसाशनं तु नाश्नीयुः शयीरंश्च पृथक् क्षितौ' इति । बोधायनोऽपि— 'ज्योतिष्कृत्वागारं प्रविशन्त्येकरात्रमुपोष्य तेषामक्षारलवणभोजनमधःशयनं ब्रह्मचर्यमा दशरात्रात्' इति । प्रेतपत्न्या विशेषमाहा-पस्तम्बः 'यावज्जीवं प्रेतपत्नी ब्रह्मचर्यं क्षारलवणवर्जनं च' इति । मनुरपि— 'आसीता मरणात्क्षान्ता नियता ब्रह्मचारिणी' इति । संग्रहेऽपि विधवाधर्माः— 'अनु

याति न भर्तारं यदि दैवात्कथंचन तथापि शीलं संरक्ष्यं शीलभङ्गात्पतत्यधः ॥ तद्वैगुण्यादपि स्वर्गात्पतिः पतति नान्यथा । तस्याः पिता च माता च भर्तृवर्गस्तथैव च ॥ पत्यौ मृते च या योषिद्वैधव्यं पालयेत्क्वचित् । सा पुनः प्राप्य भर्तारं स्वर्गभोगान्समश्नुते ॥ विधवाकबरीबन्धो भर्तृबन्धाय जायते । शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥ एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा ॥ कृच्छ्रं पराकं वा कुर्याच्चान्द्रायणमथापि वा । यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः ॥ प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥ पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥ नैवाङ्गोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् । गन्धद्रव्यस्य संयोगो नैव कार्यस्तथा पुनः ॥ विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या च नान्यथा । पतिमेव सदा ध्यायेद्विष्णुरूपधरं शिवम् ॥ यद्यदिष्टतमं लोके यच्च पत्युः समाहितम् । तत्तद्गुणवते देयं पतिप्रीणनकाम्यया ॥ नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि । कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् । अपृष्ट्वा

च सुतार्त्किञ्चिन्न कुर्याद्व्रतपरा। एवं चर्यापरा नित्यं विधवापि शुभा मता। एवं धर्मसमायुक्ता विधवापि पतिव्रता। पतिलोकमवाप्नोति न भवेत्कापि दुःखिता॥ न गङ्गया तथा भेदो या नारी पतिदेवता। उमा शिवसमा साक्षात्तस्मात्तां पूजयेद्बुधः॥' हरिवंशे— पतिं संकल्पयित्वाथ चित्रस्थं वापि मृण्मयम्। तस्य पूजां सदा कुर्यात्सतां धर्ममनुस्मरन्' इति। मार्कण्डेयपुराणे तु तिलोदकपिण्डदानशयनादीनां फलविशेषोऽपि प्रतिपादितः। तत्र यद्बान्धवास्तोयं प्रयच्छन्ति तिलैः सह। यच्च पिण्डं प्रयच्छन्ति नीयमानस्तदश्नुते॥ भूमौ स्वपद्भिर्नार्थं क्लेशमाप्नोति बान्धवैः। दानं ददद्भिश्च तथा जन्तुराप्यायते तथा॥ तैलाभ्यङ्गं बान्धवानां गात्रसंवाहनं स पश्यति। उपभुङ्क्ते तथा दत्तं तोयपिण्डोदकं भुवि' इति॥ सप्तसप्ततितमे—

ततो दशाहे विगते कृतशौचो नृपात्मजः।
द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत्।

अत्र 'द्वादशेऽहनि श्राद्धकर्माण्यकारयत्' इत्येतत्

संस्कारात्प्राक् तैलद्रोण्यामनेकदिनसंस्थापितस्यापि त-स्यापि आहिताग्नित्वात् संस्कारदिवसमारभ्येति ज्ञेयम् । तथा च उशना 'दाहाद्याशौचं कर्तव्यं द्विजातीनामग्नि-होत्रिणां सपिण्डानां तु मरणे मरणादितरेषु च' इति । पैठी-नसीरपि— 'अनग्निमत उत्क्रान्तेराशौचादि द्विजातिषु । दाहादग्निमतो विद्याद्विदेशस्थे मृते सति' इति । ब्राह्मेऽपि —दाहादेव तु कर्तव्यस्तस्य वैतानिको विधिः' इति । ननु— 'शुद्धो विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ।' शावमाशौ-चदशरात्रमनृत्विक् दीक्षितब्रह्मचारी सपिण्डानामेका-दशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्यार्धमासमेकमासं शूद्र-स्य ' इति मनुगौतमवचनपर्यालोचनया क्षत्रियाणामेका-दशाहद्वादशाहपर्यन्तसूतकस्य विद्यमानत्वेन तदनन्तर-मेव सूतकनिवृत्तिदर्शनात्, 'ततो दशाहेऽतिगते कृतशौचो नृपात्मजः' इति कथमुक्तमिति चेन्न सर्वेषामेव वर्णानां सूतके मृतके तथा । दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्' इति शातातपवचनपर्यालोचनया सर्व-वर्णसाधारण्येन दशाहानन्तरमेव सूतकनिवृत्त्यवगमेन

तदभिप्रायकत्वेन विरोधाभावात्। द्वादशेऽहनि कर्तव्यश्राद्धानि च सपिण्डीकरणादीनि इति ज्ञेयमिति।

ब्राह्मणेभ्यो ददौ रत्नं धनमन्नं च पुष्कलम्।
वासांसि च महार्हाणि रत्नानि विविधानि च।
हास्तिकं बहु शुल्कं च गाश्चापि शतशस्तथा।
दासीदासं च यानं च वेश्मानि सुमहान्ति च।
ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्वदैहिकम्।

अनेन परलोकं गतस्योत्तमलोकप्राप्त्यर्थं दानानि कर्तव्यानि इति सूचितम्। अत एव धृतराष्ट्रेण परलोकगतान्भीष्मादीनुद्दिश्य दानानि कृतानि इति प्रतिपादितमाश्रमवासिके पर्वणि— 'ततोऽभिरूपान्भीष्माय ब्राह्मणानृषिसत्तमान्। पुत्रार्थे सुहृदश्चैव स समीक्ष्य सहस्रशः। कारयित्वान्नपानानि यानान्याच्छादनानि च। सुवर्णमणिरत्नानि दासीदासमजाविकम्। कम्बलानि च रत्नानि ग्रामान्क्षेत्रानजाविकान्॥ सालंकारान्गजानश्वान्कन्याश्चैव वरस्त्रियः। उद्दिश्योद्दिश्य सर्वेभ्यो ददौ स नृपसत्तमः। द्रोणं संकीर्त्य भीष्मं च सोमदत्तं च बाह्लिकम्। दुर्योधनं च राजानं पुत्रांश्चैव पृथक् पृथक्॥

जयद्रथपुरोगांश्च सुहृदश्चापि सर्वशः । स आढ्ययज्ञो ववृधे बहुशो धनदक्षिणः ॥ अनेकधनरत्नौघो युधिष्ठिरमते तदा ।' इति । ततस्त्रयोदशे दिवसे चितासंशोधनार्थमुपगतोऽतिदुःखितो भरतः

दृष्ट्वा भस्मारुणं तच्च दग्धास्थिस्थानमण्डलम् ।
स तु दृष्ट्वा रुदन्दीनः पपात धरणीतले ॥

तमवलोक्य भगवान्वसिष्ठ एवमवोचत्—

त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते प्रभो ।
सावशेषास्थिनिचये किमिह त्वं विलम्बसे ॥

नन्वत्र त्रयोदशे दिवसे अस्थिसंचयनं कर्तव्यत्वेन प्रतीयते तदनुपपन्नम् 'अपरेद्युस्तृतीयस्यां पञ्चम्यां सप्तम्यां वा अस्थीनि संचिन्वन्ति' इत्यापस्तम्बसूत्रेण द्वितीयपञ्चमसप्तमदिनेष्वेव कर्तव्यत्वेन प्रतिपादितस्य अस्थिसंचयनस्य त्रयोदशेऽहनि कर्तुमशक्यत्वादिति चेन्न । द्वितीयादिदिवसेषु अस्थिसंचयनस्य कर्तव्यत्वेऽपि तच्छेषभूतलोष्टचयनस्य त्रयोदशे दिवसे करणसंभवात् लोष्टचयनस्यसं चयनशेषत्वं त्रयोदशदिनकर्तव्यत्वं चाहापस्त

ख्यः— 'दिष्टगमनादयुक्ष्वहःसु अर्धमासमासकर्तृषु संवत्सरे वा निदधाति' इति । अत्र कपर्दिभाष्यम्—दिष्टगमनं दशममहः तस्मादयुक्षु विषमेष्वहःसु अहोरात्रेषु तस्मादेकादशाहप्रभृति तदहे पश्चाहे अयुक्षु अर्धमासप्रभृतिषु वा निदधाति लोष्टचितं करोतीत्यर्थः । केचिद्दिष्टगमनं तस्मादयुक्षु इति तदनुपपन्नम् । दशाहे अन्यकर्मश्रवणात् अन्यच्च विरुद्धम् । दानप्रतिग्रहणे प्रतिषिध्येत इति धर्मशास्त्रे तथा भोजनं च । तस्माद्दशरात्रेऽतीत एव इति । अतः संचयनशेषभूतलोष्टचयनस्य त्रयोदशो दिवसः काल एवेति न किंचिदनुपपन्नम् ।

त्रीणि द्वन्द्वानि भूतेषु प्रवृत्तान्यविशेषतः ।
तेषु चापरिहार्येषु नैवं भवितुमर्हसि ॥

इति भरतं परिसान्त्व्य सावशेषं क्रियाकलापं कारयामास । अनेन क्लेशसमये महद्भिः शोकपरिहारोपयोगिनीभिः कथाभिः समाधानं कर्तव्यमिति सूचितम् । तथा च याज्ञवल्क्यः— 'कृतोदकान्समुत्तीर्णान्मृदुशाड्वलसंस्थितान् । स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥

मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् । करोति यः स संमूढो जलबुद्बुदसंनिभे ॥ पञ्चधा संभृतः कायो योऽयं पञ्चत्वमागतः । कर्मभिः स्वशरीरस्थैस्तत्र का परिदेवना । गन्त्री वसुमतीनाशमुदधिर्दैवतानि च ॥ फेनप्रख्यः कथं नाम मर्त्यलोके प्रयास्यति । कात्यायनोऽपि— एवं कृतोदकान्सम्यक् सर्वाञ्शाड्वलसंस्थितान् । आप्लुतान्पुनराचान्तान्वदेयुस्त्वनुयायिनः ॥ मा शोकं कुरुतानित्ये सर्वस्मिन्प्राणधर्मिणि । धर्मं कुरुत यत्नेन यो वः सह करिष्यति ॥ शोके दोषोऽपि याज्ञवल्क्येन दर्शितः— 'श्लेष्माश्रुबान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः' इति ॥ अष्टसप्ततितमे— ततः सकलमरणरामविवासननिदानभूतां

विचकर्ष तदा कुब्जां क्रोशन्तीं धरणीतले ।
स बली बलवत्क्रोधाद्गृहीत्वा पुरुषर्षभः ।
कैकेयीमभिनिर्भर्त्स्य बभाषे परुषं वचः ।

अथ भरतः शत्रुघ्नवचनश्रवणसमनन्तरमेव भयचकितहृदयां शरणमभिकाङ्क्षन्तीं कैकेयीमवलोक्य तामिदमवोचत् ।

अवध्याः सर्वभूतानां प्रमदाः क्षम्यतामिति ।
हन्यामहमिमां पापां कैकेयीं दुष्टचारिणीम् ॥
यदि मां धार्मिको रामो नासूयेन्मातृघातकम् ।
इमामपि हतां कुब्जां यदि जानाति राघवः ।
त्वां च मां च हि धर्मात्मा नाभिभाषिष्यते ध्रुवम् ।

इति । तद्वचनाच्च शत्रुघ्नेन परित्यक्तां मन्थरां कैकेयी समाश्वासयति स्म ॥ एकोनाशीतितमे, ततः प्रव्राजिते रामभद्रे दिवमारूढे दशरथे शरणमभिकाङ्क्षमाणानस्मान्परिपालयितुमात्मानमभिषेचयेति वदतो राज्यकर्तृज्जनान्बहुप्रकारमुपालभ्य प्रदक्षिणीकृत्य चाभिषेचनिकं भाण्डं वनगमनकृतनिश्चयो भरतः

ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य नः ।
नैवं भवन्तो मां वक्तुमर्हन्ति कुशला जनाः ॥
रामः पूर्वो हि नो भ्राता भविष्यति महीपतिः ।
अहं त्वरण्ये वत्स्यामि नव वर्षाणि पञ्च च ॥
आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ।

इत्यभिधाय मार्गसमीपकरणाय चतुरं शिल्पवर्गम-

चिरादेव प्रेषयामास । राज्यकर्तारोऽपि भरतवचनमाकर्ण्य

**एवं ते भाषमाणस्य पद्मा श्रीरुपतिष्ठताम् ।**
**यस्त्वं ज्येष्ठे नृपसुते पृथिवीं दातुमिच्छसि ॥**

इत्यवदन् ॥ अशीतितमे— तदनु भरतनिदेशेन भूप्रदेशाभिज्ञैः खनकयन्त्रककर्मान्तिकवर्धकिवृक्षतक्षककूपकारसुधाकारादिभिर्विविधशिल्पिभिर्निम्नोन्नतधरणीसरणिसमीकरणाय टङ्कलवित्रखनित्रपरशुकुद्दालादिविविधायुधैः पुरः प्रस्थापितैः क्वचिदतिगहनगुल्मलतापाषाणानुच्छिन्दद्भिः क्वचिदवृक्षक्षितिभागे क्षणेन वृक्षानुपक्षिपद्भिः क्वचन पांसुपटलैरदभ्रकूपश्वभ्राणि पूरयद्भिः क्वचन समुज्जृम्भमाणाम्भोनिधिसंभ्रमकारिणो जलाशयान् खनद्भिः समीकृतः तत्र तत्र च नवविधविमलतरमणिगणविरचितकुट्टिमप्रदेशभूषितः, दरविकसितकुसुमसमुदयसमुदयदनुपमबहलपरिमलपरिमिलदलिकुलदलितनवकिसलयनिवहरुचिरतरुपटलजटिलः, क्वचिदमन्दचन्दनजलसंसेकसुरभिलः, तत्र तत्र च विरचितविशालसंनिवेशमण्डपः, क्वचिदम्बरचुम्बिसौधशिखरसमासक्तपताकापव-

नकम्पितताारकगणः, शुभशिल्पिनिर्मितो नरेन्द्रमार्गः समधिकं विरराज ॥ एकाशीतितमे—ततः प्रभाते यथापूर्व स्तुवतां सूतमागधवन्दीनां सुवर्णकोणाभिहतानां दुन्दुभीनां वीणावेणुमृदङ्गादिमङ्गलवाद्यानां च शब्दश्रवणेन द्विगुणशोकसंतप्तान्तःकरणो भरतः 'नाहं राजोपचारयोग्यः' इति ससंभ्रममुत्थाय मन्त्रिजनसमाकीर्णां शातकुम्भस्तम्भखचितरत्नकिरणसमुद्द्योतितामपरामिव सुधर्मां धर्मात्मा सभां समाजगाम । द्व्यशीतितमे— तस्यां च सभायां काञ्चनमयं सुखास्तरणसंवृतमासनमध्यासीनो भरतः सकलजगतीसंरक्षणविचक्षणस्त्वमात्मानमभिषिच्य सातङ्कं महीमण्डलं निरातङ्कं कर्तुमर्हसीति कुलपुरोहितेन वसिष्ठेन समुदीरितं वचनमाकर्ण्य सबाष्पकण्ठमिदमभाषत—

चरितब्रह्मचर्यस्य विद्यास्नातस्य धीमतः ।
धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥

कथं दशरथाज्जातो भवेद्राज्यापहारकः ।
राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥

**अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ।**
**इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥**

तदलमनेन निरर्थकसमारम्भेण मार्गसमीकरणाय प्रागेव प्रस्थापिता विष्टिकर्मान्तिकाः तदधुनैव चतुरङ्गबलपरिवारेण रामानयनाय वनगमनमेव समीहन्ताम् इत्यभिधाय सकलबलोद्योजनाय सुमन्त्रं प्रेषयामास ॥ त्र्यशीतितमे— ततः प्रभातायां शर्वर्यामुदिते च दिनकरमण्डले सज्जं रथवरमास्थायाभिप्रयान्तं भरतं मन्त्रिपुरोधसः उत्तमाश्वोपेतान्रथानास्थायाग्रतः प्रययुः पृष्ठतश्च रामानयनसंजातहर्षाः कौसल्याकैकेयीसुमित्रादिमातरः समाजग्मुः । अन्वगेव पौरजानपदाः सकलकलाकुशलाः कर्मान्तिकाश्च निर्ययुः । एवं महान्तमध्वानं परिक्रम्य क्रमेण च गङ्गामासाद्य रमणीये शृङ्गिबेरपुरे सचिवानुमत्या सेनानिवेशं कारयामास ॥ चतुरशीतितमे— अथ शृङ्गिबेरपुरेश्वरः निषाधाधिपतिर्गुहः गङ्गातीरे परिसरवर्तिन्यां कोविदारध्वजं भरतरथमवलोक्य 'किमयं निःसपत्नां राज्यश्रियमभिलषन्, वनवासिनावपि रामलक्ष्मणौ हन्तुमायाति आहोस्विदस्मदहितमाचरिष्यति उत

दाशान्वा बाधितुमयमुद्योगः तद्यावदेव नायमभिपतति तावदेव संनद्धेन मया भवितव्यमिति निश्चित्य प्रत्येकं कैवर्तशतसंकुलां नौकापञ्चशतीमत्रैव संनिधापयत ।

यदा तुष्टस्तु भरतो रामस्येह भविष्यति ।
नेयं स्वस्तिमती सेना गङ्गामद्य तरिष्यति ॥

इति स्वीयजनानाज्ञाप्य मधुमांसाद्युपायनानि चादाय अभिचक्राम भरतं निषादाधिपतिर्गुहः ।

अनेन पूज्यानां दर्शनं रिक्तहस्तेन न कर्तव्यमिति सूचितम् । तथा च भारते— 'धर्ममर्थं च कामं च वितथं योऽभिकाङ्क्षति । रिक्तपाणिर्न पश्येत राजानं दैवतं गुरुम्' इति । सुमन्त्रस्तु दूरादेव समायान्तं गुहं भरताय निवेदयामास । अथ कृताञ्जलिर्गुहः सविनय-मुपसृत्य राजन् तवायं देशः, वयमपि भवदीया एव समुपाहृतं कन्दमूलफलमुच्चावचमाशुष्कमांसं चाङ्गीकृत्य अत्रैव विभावरीं नीत्वा श्वः काल्यमाग्रतो गन्तासीति सादरमभाषत ॥ पञ्चाशीतितमे—अथ निषादाधिपत्युदीरितवचनमाकर्ण्य समुपाहृतमुपायनमभिनन्द्य गहनोऽयं

देशः गङ्गानूपो दुरत्ययः कतरेण पथा भरद्वाजाश्रमगमनं तदाख्यातु भवानित्यवदत् । तद्वचनश्रवणसमनन्तरं प्रलयानिलसमाहतोर्मिमालासमाकुलेव ते सेना महतीं शङ्कां जनयति । यदि रामभद्रे न दोषमभिलषसि तदा अहमेव धन्विनः सुसमाहितान्दाशान्पुरस्कृत्य त्वामनुगमिष्यामि तद्विस्पष्टमाख्यातु भवानित्यभिभाषमाणं गुहम् अतिनिर्मलान्तःकरणो भरतः एवमब्रवीत् ।

राघवः स हि मे भ्राता ज्येष्ठः पितृसमो मतः ।
तं निवर्तयितुं यामि काकुत्स्थं वनवासिनम् ॥

बुद्धिरन्या न ते कार्या गुह सत्यं ब्रवीमि ते ।
इति तद्वचनसमाकर्णनसंजातसंतोषो गुहः

धन्यस्त्वं न त्वया तुल्यं पश्यामि जगतीतले ।
अयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि ॥

शाश्वती खलु ते कीर्त्तिर्लोकाननुचरिष्यति ।
यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि ॥

इत्येवमभिभाषमाणयोस्तयोः

बभौ नष्टप्रभः सूर्यो रजनी चाभ्यवर्तत ।

षडशीतिप्रभृतिनवतिपर्यन्तम्— ततो गुहमुखेनावगतरामवृत्तान्तो भरतः तत्रैव तां रजनीमतिवाह्याप्रभातायां शर्वर्यां गुहानीतपञ्चशतनौकासमुत्तारितसकलसेनागणः स्वयमपि गङ्गां समुत्तीर्य समभिगम्य प्रयागवनं भरद्वाजाश्रमं दृष्ट्वा क्रोशादेव नरर्षभः बलं सर्वमवस्थाय जगाम सह मन्त्रिभिः ।

पद्भ्यामेव हि धर्मज्ञो न्यस्तशस्त्रपरिच्छदः ।
वसानो वाससी क्षौमे पुरोधाय पुरोहितम् ॥

ततः संदर्शने तस्य भरद्वाजस्य राघवः ।
मन्त्रिणस्तानवस्थाप्य जगामानुपुरोहितम् ॥

अनेन राज्ञा तपोवनानि विनीतवेषेणैव पुरोहितं पुरस्कृत्य प्रवेष्टव्यानीति सूचितम् । तथा चादिपर्वणि शकुन्तलोपाख्याने दुष्यन्तः— 'ध्वजिनीमश्वसंबाधां पदातिजनसंकुलाम् । अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ॥ मुनिं विरजसं द्रष्टुं गमिष्यामि तपोवनम् । काश्यपे स्थीयतामत्र यावदागमनं मम ॥ सामात्यो राजलिङ्गानि सो-

ऽपनीय नराधिपः । पुरोहितसहा यश्च जगामाश्रममुत्तमम्'
इति । अथ भगवान् भरद्वाजः समागतौ वसिष्ठभरतावभि-
गम्य संपूज्यासनपाद्यादिभिः आपृच्छ्य च कुशलम्, स-
मासीनं भरतं चावलोक्य, शत्रुशेषमुन्मूल्य निःसपत्नां
राज्यश्रियमभिलषत इव चतुरङ्गबलपरिवृतस्य भवतः स-
मागमनमतितरां संशयमुत्पादयति तद्विस्पष्टमाचक्ष्वेत्यव-
दत । तदाकर्ण्य कलुषितान्तःकरणो भरतो महर्षिमेव-
मब्रवीत् ।

अहं तु तं नरव्याघ्रमुपयातः प्रसादकः ।
प्रतिनेतुमयोध्यां च पादौ तस्याभिवन्दितुम् ॥

त्वं मामेवंगतं मत्वा प्रसादं कर्तुमर्हसि । इति ।

ततो धार्मिकभरतवचनाकर्णनसंजातहर्षो महर्षिः, ककु-
त्स्थकुलसंभवस्य तव धर्मानपेतबुद्धिविभवं जानन्नेव तद्दृढी-
करणाय मयेदमुक्तं तदत्रैव निशीथिनीमपनीय श्वः
समीहितं कुर्वित्यवदत् ॥ एकनवतितमे— इति बहुतरादर-
मेदुरवचसस्तस्यानतिलङ्घनीयशासनस्य भगवतो महामुने-
र्भरद्वाजस्य वचनैः समुदितप्रमोदतरङ्गितान्तरङ्गः तत्र-

सादलाभरतो भरतो महानयमस्माकमनुग्रह इति तदाश्रम एव तन्निशानिवासाय मतिं चकार ।

कृतबुद्धिं निवासाय तत्रैव स मुनिस्तदा ।
भरतं कैकेयीपुत्रमातिथ्येन न्यमन्त्रयत् ॥

तदनु तदनुगतजनभोजनसंविधानसमुज्जृम्भितं संरम्भमवलोक्य विनयावनतेन भरतेन भगवन्नलमलममुना महता भवदपूर्वोपचाररचनेन । ननु वयं भवत्कृतार्घ्यपाद्याद्युपचारेण पुण्यारण्यवाससुलभैः कन्दमूलफलैरपि मधुरमधुरसस्राविण्या भगवतो वाण्या च संप्राप्तातिथ्यसत्कार एव । तदलमनयोपचारयन्त्रणयेति बहुधा प्रत्याख्यातोऽपि प्रख्याततपा भरद्वाजः प्रहसन्निदमवादीत् ।

जाने त्वां प्रीतिसंयुक्तं तुष्येस्त्वं येन केनचित् ।
सेनायास्तु तवैतस्याः कर्तुमिच्छामि भोजनम् ॥

अनेन समागतस्य राज्ञः सानुचरस्यैव आतिथ्यं कर्तव्यमिति सूचितम् । तथा च तैत्तिरीयश्रुतिः— 'यावद्भिर्वै राजानुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं

क्रियते' इति । ऐतरेयब्राह्मणेऽपि— 'यावन्तः खलु वै राजानमनुयान्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियते' इति। तदधुना विपुलरथगजतुरगपदातिसमूहसंततां चमूमपहाय किमिति परिमितपरिजनेन सह समागतोऽसीति वदन्तं भगवन्तं भरद्वाजम् ।

भरतः प्रत्युवाचेदं प्राञ्जलिस्तं तपोधनम् ।
ससैन्येनोपयातोऽस्मि भगवन्भगवद्भयात् ॥

राज्ञा च भगवन्नित्यं राजपुत्रेण वा सदा ।
यत्नतः परिहर्तव्या विषयेषु तपस्विनः ॥

तदमी दृढतररथचरणरयभरविराचितधरणीस्यन्दनाः स्यन्दनाः, संचरद्वनिधरसमुन्नतिशिखरिशिखरसौभाग्यगलहस्तिनो मदहस्तिनः, पटुतरसादिजनकलितविविधगतिशिक्षानुरूपचतुरगाश्च तुरगाः, निजभुजयुगलसमार्जितयशःसंपत्तयः पत्तयश्च, निखिलमपि महीवलयमाच्छाद्य स्वच्छन्दमुच्चलन्तः भैरवपरित्रासितविविधवन्यसत्त्वाः, चिरपरिवर्धिततरुनिकरपरिभवेण निखिलतपोधनसज्जनमज्जनादिसाधनविमलसरोवरपरिसरोपरोधेन कु-

शतृणविटपिविटपघटितोटजपाटनेन च भगवदाश्रमोपद्रवं विधास्यन्तीति दूरत एव तान्निधाय कतिपयपरिवारेण भगवदभ्याशमभ्यगामिति वदन्, सहसा समानयेति तेन मुनिना समाज्ञप्तः क्षणेन तद्बलं समाचकर्ष । अथ किल भगवानाङ्गिरसकुलावतंसो महर्षिरङ्गीकृतातिथ्यनिमन्त्रणे भरते तदनुगतविपुलबलविविधान्नपानादिसंतर्पणाय दर्पणविमलाशयः, सम्यगाचम्य सौम्याननः समुज्ज्वलदुज्ज्वलज्वलनत्रयज्वालाविनिःसरदच्छतरच्छविच्छुरितदशादिशावकाशाम्, अनवरतहुतहव्यां हव्यभागग्रहणागतशतमखमुखमखाशनभाविताम्, उपरितनभागविलसत्दृस्थलस्थापितविविधसमित्कुशपलाशशाखाभरदृढलग्नपृषदाज्यधूमरेखाम्, दर्शनमात्रेणैव सकलपापापनोदिनीं विशालामग्निशालां प्रविश्य विचित्रकर्मनिर्माणालंकर्मीणं विश्वकर्माणम् अनल्पशिल्पकल्पनपारावारपारद्रष्टारं त्वष्टारम्, अन्यानपि शतमन्युपुरोगमानुपह्वरे समाह्वयन्, समाधिगतो मुनिरित्थं विदध्यौ । याः किल क्षित्यन्तरिक्षयोः प्राक्प्रत्यक्प्रवाहिन्यो वाहिन्य इहैकमत्समित्यागत्य काश्चन सृजन्तु मैरेयं काश्चन परिस्रवन्तु मधुरां सुरां काश्चन वहन्तु

खण्डितपुण्ड्रकाण्डविनिस्रुतरसलहरिमाधुरीचोदकं चोदकम्, अपि च मया समाहूता विश्वावसुहाहाहूहूप्रभृतयः सर्वेऽपि देवगन्धर्वाः घृताचीप्रमुखाश्चाप्सरोगणाः, नागदन्तादिमाश्च गन्धर्वसुन्दर्यः पुरन्दरपुरालयाः सरसिरुहासनसदनगताश्च दिव्यवारवनिताः सर्वा अपि तुम्बुरुणा सह मदाश्रम एव सहसा समायान्तु यच्चोत्तरासु कुरुभूमिषु दिव्यवसनभूषणपत्रहृद्यमुद्यानं यदपि च राजराजपुरोपकण्ठे दिव्यनारीफलम् अतिमृदुलफलकिसलयपरिचर्वणसमुदितमदभरविकस्वरस्वरमधुरशुकपिकनिकरावरपावनं वनं तदपि सत्वरं मदाश्रमचत्वरेषु संनिधत्ताम्, अपि च भगवान्सोमः भक्ष्यभोज्यचोष्यलेह्यादिविविधान्नराशीन्, उत्तमरसोत्तमानिह विदधानः अमूल्यानि पादपगलितानि माल्यानि यथोचितरुचिरपाकानि मांसशाकानि च संविधत्ताम् ।

एवं समाधिना युक्तस्तेजसाप्रतिमेन च ।
शीक्षास्वरसमायुक्तं तपसा चाब्रवीन्मुनिः ॥

मनसा ध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलेः ।
आजग्मुस्तानि सर्वाणि दैवतानि पृथक्पृथक् ॥

तदनु शनैः शनैर्गन्धसिन्धुरकठोरगण्डपिण्डकण्डूयननिर्घृष्टमलयमहीधरकन्दरमन्दिरचन्दनतरुसंघसंघर्षणसमुन्मिषितगन्धबन्धुरोदरविदलदरविन्दकुन्दमाकन्दमल्लिकजमालतीकुटजपाटलीवकुलमुकुलबहलविनिर्गलदमन्दमकरन्दबिन्दुसंदोहवहनपरिश्रमेणेव मन्दमन्दपरिस्पन्दे, अशेषजनखेदापनोदिनि, तदाश्रमसमीपेषु संचरति गन्धवहनस्तनन्वयेन घनाघनोऽपि गगनतलात् अदभ्रमधुसंभ्रमपरिभ्रमत् परपराजितपवनविधुतविसृत्वरपरागपटलान्धकारितदिगन्तरेषु विकीर्यमाणेषु, सुरभिलसुरतरुवरकुसुमवर्षेषु अतिस्निग्धमधुरोदारगम्भीरघोषेषु वाद्यमानेषु देवदुन्दुभिषु देवदूतैः करतलविनिहितमणिमयवीणेषु गायत्सु सिद्धविद्याधरगन्धर्वेषु निरुपमनित्यनिजयौवनमयभूषणपुनरुक्तमणिभूषणाः प्रतिपुरुषसविधमपि रम्भादिमा बहवो ननृतुरप्सरोगणाः। तदनन्तरमनन्तचमत्कारकर्मणो विश्वकर्मणः कौशलादासप्रयोजनमभिनववैडूर्यसंनिभशाड्वलच्छन्नाम्, अपरिमितबहुपचेलिमफलभरविनमितकपित्थपनसबीजपूरकामलकसहकारविपुलशाखाशतकृतप्रच्छायशीतलवलाम्, उत्तरकुरुसमागतलोको-

त्तरवनकलितदिव्योपभोगाम् , उभयतटगततरुगणपरि-
णामनिपतितबहुलकुसुमकिञ्जल्कपुञ्जपिञ्जरितमन्दाकि-
नीतरङ्गशीकरानुषङ्गिसमीरणपरिहृतपरिश्रमाम् , मणिख-
चितशातकुम्भस्तम्भसहस्रनिर्मितविशालचतुःशालसुन्दर-
मन्दुराराजशालिकाम् , अभ्रंकषशुभ्रशिखररम्यहर्म्यप्रा-
सादवलभिनिबद्धमणितोरणाम् , पदे पदे दिव्यचन्दनरस-
समुक्षितभित्तिभिर्महार्हौपबर्हमृदुलतल्पोपशोभितस्फ-
टिकमयशयनासनैः सदनैरुपशोभिताम् , अवाङ्मनसगो-
चरविचित्रचमत्काराम् , मनोहराम् , तत्तादृशीं विश्वक-
र्मनिर्माणचातुरीमवलोकयन् , क्रमेण भगवता भरद्वाजेन
समादिष्टः नूतननवरत्नखचितसोपानसीमगोपानसीमनोह-
रसौधशिखरम् , उपकल्पितराजाधिराजोचितसिंहासनम्,
अतिनिबिडजनसंचारनीरन्ध्रनिरुद्धमार्गसंरक्षणविचक्ष-
णकञ्चुकिकलिताभटरवप्रदर्शितपदवीविकासम् , महेन्द्र-
मन्दिरोपमम् , विराजमानराजमन्दिरं निजपरिवारेण
सह प्रविवेश भरतः । ततस्तदद्भुतसदनसंविधाननिध्यान-
जनितकौतुकैः मन्त्रिभिः शारदसमयमुदितसुधाकरमण्ड-
लपाण्डरमातपत्रम् , तन्मरीचिनिचयरुचिरे चामरे च स-

ऋयामं श्रीरामचन्द्रं भद्रासनाय विनिवेद्य स्वयमपि सचिवासने निविशमानो भरतः क्षणादेव मुनिशासनादुपागता नवसुधारसमधुरपायसकर्दमाः सरितः सुवर्णमणिमौक्तिकप्रवालादिदिव्यभूषणभूषिताः सरसिजासनधनाधिनाथप्रेषिताः विंशतिविंशतिसहस्रसंख्याकाः दिव्यवारसुन्दरीः क्षिप्रमद्राक्षीत्। अथ तेषु दर्शनमात्रेणैव पुरुषोन्मादकारिरूपधेयेषु नन्दनवनागतेषु अलम्बुसाद्यप्सरोगणेषु नृत्यत्सु महाराजभरतोपकण्ठे गायत्सु नारदतुम्बुरुगोपप्रमुखेषु गन्धर्वराजेषु नन्दनचैत्ररथगताखिलमाल्येषु प्रयागभूमिमागतेषु भरद्वाजतपोमहिम्ना चित्रमिदमेकमुदजृम्भत। यत्खल्वमी बिल्वशाखिनः स्थावरा अपि मृदङ्गवादकताम्, अश्वत्थशाखिनो नर्तकताम्, सरलतालतिलकनक्तमालकाश्च कुब्जवामनतामङ्गीचक्रुः। अपि च किंशुकामलकजम्बूमल्लिकामालतीप्रभृतिका लतिकाः सकलयुवजनहृदयहरिणवागुरायमाणनवयौवनालंकृताम्, प्रमदाकृतिमवलम्ब्य विलासमन्थरमितस्ततः संचरन्त्यः सादरं भो भो बुभुक्षिताः यावदपेक्षं भक्षयत पायसम्, भो भोः सुराभिलाषिणः पिबत सुराघटान्, मांसार्थिनः खा-

दत मांसानि इति परितोषितारतरमुद्घुष्यन्त्यः, कांश्चिद्-भ्यञ्जनसंजनितादरानञ्जसा समभ्यज्य मञ्जुलेषु सरित्तीरनिकुञ्जेषु स्नापयन्त्यः, प्रतिपुरुषमपि सम्प्राप्ता वाराङ्गनाः कलाचिकावहनवीटिकावितरणचरणसंवाहनादि शुश्रूषया परिचरन्त्यः महीतल एव तस्य बलस्य निरर्गलं सौवर्गसुखं प्रदर्शयामासुः । तदनु निरवद्यहृद्यमद्यनिषेवणमुषितधिषणाः कैश्चन पुरुषैरिक्षुखण्डमधुलाजखण्डशर्कराचणकादिभिः संभोजितगजहयखरोष्ट्रकाः सैनिकाः घनघनसारमृगमदकुङ्कुमपङ्कसंकलितचन्दनसंरूषितावयवाः, समुन्नतपृथुलकुचकुम्भसंघर्षणमुखकमलचुम्बनसरसभाषणादिसमुदञ्चितकिलकिञ्चिताभिरप्सरोभिः काञ्चनमयमञ्चेषु पञ्चेषुवशंगताः दैवादतर्कितोपनतमप्राकृतं सुखमनुभवन्तः न गमिष्यामोऽयोध्यां नाक्रमिष्यामोऽयोध्यां नाक्रमिष्यामो दण्डकावनम् अस्तु कुशलं महाराजभरतस्य भरतस्य भवतु च तथा सुखम् महाराजरामभद्रस्येति प्रमदवशादुच्चावचानि वचनानि मुञ्चन्तः किमयं स्वर्ग एवास्माभिरुपभुज्यते किमानन्दभूम्ना अयमेवापवर्ग इति मनसा वितर्कयन्तः कतिचनमदिरा-

स्वादसमुदितमदवशादत्यन्तं नृत्यन्तः हसन्तश्चाट्टहासं गायन्तो विविधगानवाद्यानि परिधावन्तो निष्कारणमुच्छिद्न्दन्तः प्रसूनमाल्यानि चिरमासांबभूवुः । अथ कथंचन किंचिदिव विगलितमदपारवश्याः चेटादयश्चपलाशयतया समन्तादुद्वीक्ष्य भक्ष्यराशीन् अक्षुधिता अपि भक्षयित्वा परां तृप्तिमभ्यागमन् । इत्थमानिरतमुनिसाधारणाश्चर्यतपश्चर्याधुर्यस्य मुनेस्तपोबलेन संपादितैः सकलकामैरुपतर्पिताः भरतानुयायिनः परितोऽपि प्रमुदितकुञ्जराश्वखरोष्ट्रगोमृगपशुपक्षिगणं क्वचिदपि अदृश्यमानकचराम्बरास्तमितक्षुत्क्षामगन्धम् असंभावितरजोधूसरकेशनखम् आजवाराह्णनिष्ठानवरसंचयाधिष्ठितं फलनिर्यूहनिर्यद्धूपगन्धादिवासितम् अतिमधुरपायसकर्दमितकूपं सकलजनविविधमनोरथपरिपूरणनिकामनिपुणकामधेनुकं सततनिष्पन्दमानमधुरमधुरासवासारवर्षदुर्दिननिखिलशाखिकदम्बकं क्वचन रुचिरमैरेयपूरपूरितवापिकासमीपनिविष्टसुमृष्टमांसनिचयम् क्वचिदपि प्रतप्तपिठरजठरपाच्यमानरुन्यहरिणबर्हिणचरणायुधादिमांसम् दधिमधुघृतदुग्धादिपरिपूरितशातकुम्भकुम्भकरम्भिकास्थालीसहस्रपरिस्थगित-

स्थलम् क्वचिदपि च पचेलिमकपित्थरसालफलसुमहा- नदीपरिसरपरिहृश्यमानमृदुलशर्करापूरसैकतम् तत्र तत्र च नखंपचलघुविमलसलिलवाहिन्नाहिनीतीरघटितविशा- लस्फटिकसोपानवीथिकासु क्वचिदुल्लसितमल्लिगन्धफली- कुसुमगन्धिततैलपूरितभृङ्गारशोभितम्, क्वचिदपि निर्णे- जनचूर्णसंपूर्णकनकचषकालंकृतम् क्वचिदपि निक्षिप्तरद- नशोधनसाधनधवलखदिरसमिल्लुतासंचयम् क्वचिदनेकव- र्णविभक्तिचित्रितचित्रकम्बलस्थापितपत्रोर्णराजिराजितम् क्वचिदपि हाटकघटितसंपुटकोदरनिक्षिप्तचन्दनक्षोदम् क- चिदपि शरदम्बराडम्बरविडम्बिपरिशोधितादर्शदर्शनीयम् क्वचिदपि संनिहितमसृणपादुकायुगलपरंपरम् क्वचिदपि वधूजनप्रसादनकनककङ्कतकूर्चमञ्जुलाञ्जनकरण्डमण्डित- म् क्वचिदपि समरकामुकमहावीरकमनीयकार्मुकशरभरि- तशराधिविचित्रतनुत्रशोभितम् क्वचित्क्वचिदुत्फुल्लकह्लारस- रसीरुहवीथिकासंचरत्समदसारसारसितमेदुरैर्निजसह- चरीचञ्चुपुटाञ्चलकण्डूयनसुखितकारण्डवचक्रवाककुलैः स्फटिकमणिमुकुरोदरसलिलविसृत्वरदरदलितारविन्दमक- रन्दबिन्दुचन्द्रकप्रकरैः क्रीडासरोभिरुपशोभितं स्वप्रेऽप्य-

दृष्टचरम् अश्रुतपूर्वमपूर्वरूपं परितोषितस्य मुनेराश्रमोद्देश-
मवलोकयन्तः किं महानयं विलोक्यते स्वप्नः किमुताय-
मस्माभिरनुभूयते चित्तविभ्रमः किमुत केनापि प्रयुक्तेऽयं
शाम्बरी माया किमिदं गन्धर्वपुरार्वजृम्भितम् भवतु यथा-
कथंचित् अस्तु तदिदं सत्यमाचन्द्रतारकम् । अहो मह-
दिदं संविधानमातिथ्यविधेः अहो तपःप्रभावो भरद्वाज-
मुनेः अहो कौशलं विश्वकर्मणः अहो जनुरद्य सफलम-
स्माकमिति मिथः कथयन्तः सर्वेऽप्यानन्दविस्मयस्तब्धहृ-
दयाः संजज्ञिरे ॥ द्विनवतितमे— ततः प्रभातायां रजन्यां
हुताग्निहोत्रं भरद्वाजमासाद्य रामसंदर्शनसमुत्सुकश्च मम
कतरेण मार्गेण गमनमतिसुकरं कियद्दूरं तदाश्रमः क वा
वर्तते तदाख्यातुमर्हति भवानित्यवदत् । इतः त्रिषु योज-
नेषु चित्रकूटोगिरिरतिरम्यकाननः तत्परिसरे समारचितां
पर्णशालामधिवसति रामभद्रः तदनेनैव सव्यदक्षिणमा-
र्गेण सेनां संचालयेति वदन् कौसल्याप्रमुखराजदारैः
पीड्यमानचरणकमलः तद्विशेषज्ञानाय भरतमपृच्छत् ।
ततः इयं कौसल्या रामजननी इयमपरा लक्ष्मणशत्रुघ्नज-
ननी सुमित्रा इयमपि,

क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीम् ।
ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपिणीम् ॥

यतोमूलं हि पश्यामि व्यसनं महदात्मनः ।
मम तां मातरं विद्धि नृशंसां पापनिश्चयाम् ॥

इति वदन्तं भरतम्,

प्रत्युवाच महाबुद्धिरिदं वचनमर्थवत् ।
न दोषेणावगन्तव्या कैकेयी भरत त्वया ॥

रामप्रव्राजनं ह्येतत्सुखोदर्कं भविष्यति ।

ततस्तदाज्ञामप्यादाय आमन्त्र्य बलाध्यक्षानारोप्य चोत्तमयानेषु मातृः समारुह्य शिबिकां सकलबलपरिवृतः चित्रकूटमार्गाभिमुखः प्रतस्थे ॥ त्रिनवतितमे— ततो महर्षिसमादिष्टेन मार्गेण संतीर्य नदीनदान् अतिक्रम्य चाश्रमोपवनानि व्यक्तं प्राप्ताः स्म तं देशं भरद्वाजो य मब्रवीत् इति कुलपुरोहितं वसिष्ठमभिधाय तदनुमत्या रामलक्ष्मणगवेषणाय चतुरांश्चारान् संचारयामास ॥ चतुर्नवतितमे— रामोऽपि तत्र चित्रकूटगिरौ जनकजामनोविनोदनरमणीयधरणीधरशिखरगतान् विविधवनभूमिभा-

गान् प्रदर्शयन् इदमवोचत् ।

न राज्याद्भ्रंशनं भद्रे न सुहृद्भिर्विना भवः ।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ॥

अनेन वनवासेन मया प्राप्तं फलद्वयम् ।
पितुश्चानृण्यता धर्मे भरतस्य प्रियं तथा ॥

इदमेवाहृतं प्राहु राज्ञि राजर्षयः परे ।
वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः ॥

इति ॥ पञ्चनवतितमे— ततोऽवतीर्य चित्रकूटशिखरात् शुभसलिलां मन्दाकिनीं प्रदर्शयन्

मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ।
लक्ष्मणश्चैव धर्मात्मा तन्निदेशे व्यवस्थितः ॥

त्वं चानुकूला वैदेहि प्रीतिं जनयतो मम ।
नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह ॥

इत्यभिधाय रम्यं गिरिवरमारुरोह ॥ षण्णवतितमे— अथ कदाचित् चित्रकूटशिखरमारूढो रामभद्रः सुनिष्टप्तेन स्वादुना पिशितेन जानकीं विनोदयन् भरतानुयायि-

सेनागजतुरगपदातिकलितकोलाहलाकर्णनभयचकितप-
लायमानवनमहिषवराहमृगयूथदर्शनानुमितैरराजमृगयावि-
हारो लक्ष्मणमाहूय किंनिमित्तोऽयमकाण्ड एव मृगयूथ-
पलायनमित्यवधारयतु भवानित्यवोचत्। ततः समुन्नतं
सालवृक्षमारुह्य लक्ष्मणो दिक्षु विदिक्षु च चक्षुर्विक्षिपन्
उत्तरस्यां दिशि रथगजतुरगपदातिसमाकुलां महतीं चमू-
मवलोक्य रामाय निवेदयामास। अथ कस्येयं चमू-
रिति वदन्तं रामभद्रं कोविदारध्वजानुमितभरतागमः
सरोषमिदमुवाच—

संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम्।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः॥

असौ हि सुमहान्स्कन्धो विटपी च महाद्रुमः।
विराजति महासैन्ये कोविदारध्वजो रथे॥

गृहीतधनुषौ चावां गिरिं वीर श्रयावहे।
अथ वेहैव तिष्ठाव संनद्धावुद्यतायुधौ॥

अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत्।
त्वया राघव संप्राप्तं सीतया च मया तथा॥

भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकारिणां त्यागे न ह्यधर्मो विधीयते ॥

इत्यवादीत् । अनेन त्यक्तधर्मस्य पूर्वापकारिणो वधे दोषो नास्तीति सूचितम् । तथा चापस्तम्बः— 'यो हि स्वार्थे आसिक्रान्तं हन्ति मन्युरेव मन्यु स्पृशति न तस्मिन्दोष इति पुराणे' इति ॥ सप्तनवतितमे— ततो भरतसमागमनसंजातकोपकलुषितान्तःकरणं लक्ष्मणमाश्वासयन् रामभद्रः सदयमिदमाचष्टे—

किमत्र धनुषा कार्यमसिना वा सचर्मणा ।
महेष्वासे महाप्राज्ञे भरते स्वयमागते ॥

पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमागतम् ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥

अनेन लोकापवादकरं कर्म नरकाद्यायमिति सूचितम् । तथा च वनपर्वणि— 'अकीर्तिः कीर्त्यते लोके यस्य भूतस्य कस्यचित् । स पतत्यधमाँल्लोकान्यावच्छब्दः प्रकीर्त्यते' इति । यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् । नाहं तत्प्रतिगृह्णीयां भक्षान्विषकृतानयथा ।' अनेन मित्र-

न्बान्धवादीन्हत्वा तदीयं द्रव्यं न ग्राह्यमित्युक्तम् । तथा च गीतायां कृष्णं प्रति अर्जुनवाक्यम्— 'न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे। न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा । येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥ त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च । एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते । तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान् ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ।' इति ।

> धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ।
> इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ॥
>
> भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण ।
> राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥
>
> यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद ।
> भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ॥

इत्यभिधाय भरतोऽपि पितृभ्यां प्रव्राजितं मामाकर्ण्य

शोकाकुलान्तःकरणः परुषतरं कैकेयीं निर्भर्त्स्य संप्रसाद्य पितरं मामपि प्रसादयितुमागतः स्यात् ।

अस्मासु मनसाप्येष नाहितं किंचिदाचरेत् ।
विप्रियं कृतपूर्वं ते भरतेन कदा नु किम् ॥

कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि ।
भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥

यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥

उच्यमानो हि भरतो बाढमित्येव वक्ष्यति ।
न हि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ॥

अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ।

इत्यवदत् ।

तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते रतः ।
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥

अथ रामो व्रीडासमाक्रान्तहृदयं लक्ष्मणमवगत्य सीतया सह वने वसन्तौ सुखोचितौ मन्यमानो दशरथो गृहान्प्र-

तिनेतुमायाति । एतौ वायुवेगसमौ जवनौ तुरङ्गमौ एष तातस्य शत्रुञ्जयोऽतिवृद्धो नागराजः अत्र हि पाण्डुरमातपत्रमनवलोक्य शङ्काकलङ्कितं मे मनः । तदवतीर्य सालाग्रात् सन्निकटमायातु भवानित्यवदत् । भरतोऽपि आश्रमसंमर्दो मा भूदिति दूरत एव सेनानिवेशं कारयामास ॥ अष्टनवतिनवनवतितमयोः—पदातिरेव भ्रातरमन्विष्यन् भरतश्चित्रकूटसमीपमागम्य तदाश्रमसमुद्गतधूमलेखादर्शनेन संनिहितं तमवगत्य ससंभ्रमं कुलपुरोहितमाहूय सत्वरमानीयतां मातृवर्गः संनिहितोऽयमत्र भवानरविन्दलोचनो रामभद्रः इत्यादिश्याग्रतो गच्छन् इदमेव हि आश्रममुपेयुषो रामभद्रस्य वृक्षे कुशचीरकृतमभिज्ञानमवलोक्य एते मृगमहिषकरीषसंचयाः, इमानि च लक्ष्मणेनाग्रबद्धानि चीराणि, इयमसौ रामचन्द्रावगाहनानुकूला मन्दाकिनी, परिसरो जलार्द्रो लक्ष्मणगमनमार्गः, इयमग्रे महात्मनः तस्य पुण्या पर्णशाला, इमौ चार्करश्मिप्रतीकाशौ शरभरितोदरावक्षय्यौ तूणीरौ, इयं च प्रागुदक्प्रवणा प्रदीप्तपावका विशाला वेदिः इति दर्शयन्नेव

निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम् ।
उटजे राममासीनं जटामण्डलधारिणम् ॥

सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम् ।

तमवलोक्य स बाष्पगद्गदं सकरुणं विलपन्

पादावप्राप्य रामस्य पपात भरतो रुदन् ।
शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् ॥

तावुभौ स समालिङ्गय रामश्चाश्रूण्यवर्तयत् ।

ततः सुमन्त्रेण गुहेन चैव
समीयतू राजसुतावरण्ये ।
दिवाकरश्चैव निशाकरश्च
यथाम्बरे शुक्रबृहस्पतिभ्याम् ॥

शततमे—

जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि ।
भ्रातरं भरतं रामः परिजग्राह बाहुना ॥

आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवः ।
अङ्के भरतमारोप्य पर्यपृच्छत्समाहितः ॥

क्व नु तेऽभूत्पिता तात यदारण्यं त्वमागतः।
न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि ॥

कच्चित्सौम्य न ते राज्यं भ्रष्टं बालस्य शाश्वतम्।

इति। अनेन बालेनाधिष्ठितं राज्यं नश्यतीति सूचितम् ॥ तथा च विदुरनीतौ— 'यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता। मज्जन्ति तेऽवशा राजन्नद्यामश्मप्लवा इव ॥' इति।

कच्चिच्छुश्रूषसे तात पितरं सत्यविक्रमम्।

अनेन पितृशुश्रूषा कर्तव्येति सूचिता ॥ तच्छुश्रूषणफलं राजधर्मे— 'शुश्रूषते यः पितरं न चासूयेत्कदाचन। मातरं भ्रातरं वापि गुरुमाचार्यमेव च ॥ तस्य राजन्फलं विद्धि स्वर्लोके स्थानमर्चितम्। न च पश्येत नरकं गुरुशुश्रूषयात्मवान् ॥' तथा च पितरमाचार्यं चोपक्रम्य मनुः— 'तेषां त्रयाणां शुश्रूषा परमं तप उच्यते' इति तच्छुश्रूषाफलम् ॥

स कच्चिद्ब्राह्मणो विद्वान्धर्मनित्यो महाद्युतिः।
इक्ष्वाकूणामुपाध्यायो यथावत्तात पूज्यते ॥

अनेनोपाध्यायः पूजनीय-इति सूचितम्। तथा च राज-धर्मे—'गुरवोऽर्चयितव्याश्च पुराणं धर्ममिच्छता। येन प्रीणात्युपाध्यायस्तेन स्याद्ब्रह्म पूजितम् ॥'

**कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः।**
**अनसूयुरनुद्रष्टा सत्कृतस्ते पुरोहितः॥**

अनेन पुरोहितः पूजनीय इति सूचितम्। तथा च राजधर्मे—'ऋत्विक्पुरोहिताचार्यान्सत्कृत्यानवमत्य च। यदा सम्यक्प्रगृह्णाति स राज्ञो धर्म उच्यते ॥'

**कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः।**
**हुतं च होष्यमाणं च काले वेदयते सदा॥**

अनेन बहुज्ञेन ऋत्विजा भवितव्यमिति सूचितम्। तथा च मनुः—'नैव कन्या न युवतिर्नाल्पविद्यो न बालिशः। होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा। नरके हि पतन्त्येते जुह्वतः स च यस्य तत् ॥ तस्माद्वैतानकुशलो होता स्याद्वेदपारगः' इति।

**कच्चिद्देवान्पितॄन्मातॄर्गुरून्पितृसमानपि।**
**वृद्धांश्च तात वैद्यांश्च ब्राह्मणांश्चाभिमन्यते।**

अनेन सर्वैः पितृभृत्यगुरुवृद्धवैद्यब्राह्मणानां बहुमानः कर्तव्य इति सूचितम् । तथा च राजधर्मे— 'आदावेव कुरुश्रेष्ठ राज्ञा रञ्जनमिच्छता । देवतानां द्विजानां च वर्तितव्यं यथाविधि ॥ दैवतान्यर्चयित्वापि ब्राह्मणांश्च कुरूद्वह । आनृण्यं याति धर्मस्य श्लोकेन च समश्नुते ॥ धर्मनिष्ठाञ्श्रुतवतो वेदव्रतसमाहितान् । अर्चयित्वा यजेतापि तांस्तान्गुणवतो द्विजान् ॥ प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च । अथ सर्वाणि कुर्वीथाः कार्याणि सपुरोहितः ॥' इति ।

**इष्वस्त्रवरसंपन्नमर्थशास्त्रविशारदम् ।**
**सुधन्वानमुपाध्यायं कच्चित्त्वं तात मन्यसे ।**

अनेनोपाध्यायः पूजनीय इति अनुपदमेव सूचितम् ।

**कच्चिदात्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः ।**
**कुलीनाश्चेङ्गितज्ञाश्च कृतास्ते तात मन्त्रिणः ॥**

**मन्त्रो विजयमूलं हि राज्ञां भवति राघव ।**
**सुसंवृतो मन्त्रधनैरमात्यैः शास्त्रकोविदैः ॥**

अनेन स्वस्य श्रेयसे बहुज्ञो मन्त्रगोप्ता मन्त्री कार्य इति सूचितम्— अयमर्थः प्रागपि प्रपञ्चितः ।

कच्चिन्निद्रावशं नैषीः कच्चित्काले प्रबुध्यसे ।
कच्चिच्चापररात्रेषु चिन्तयस्यर्थनैपुणम् ॥

अनेन यथाकालं स्वापप्रबोधौ कर्तव्यौ अपररात्रे उत्थायार्थागमप्रकारश्च चिन्तनीय इति सूचितम् । तथा च मनुः— 'संविशेच्च यथाकालमुत्तिष्ठेद्विगतक्लमः । एतद्वृत्तिं समातिष्ठेदरोगः पृथिवीपतिः ।' इति । व्यासः— 'आद्ये मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत् ।' इति ।

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह ।
कच्चित्ते मन्त्रितो मन्त्रो राष्ट्रं न परिधावति ॥

अनेनैक एवार्थं न चिन्तयेत् न बहुभिः मन्त्रश्च गोपनीय इति सूचितम् । तथा चोद्योगे—'एकः स्वादु न भुञ्जीत एकः स्वार्थं न चिन्तयेत्' इति । षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णो न भिद्यते । द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति । राजधर्मे—'बुद्ध्या संवृतमन्त्रश्च राज्ञा भवितुमर्हति । यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ॥ स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः ॥' इति ।

कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम् ।
क्षिप्रमारभसे कर्तुं न दीर्घयसि राघव ॥

अनेन राज्ञा अल्पायासकं बहुफलं कार्यं निश्चित्याविलम्बेनैतत्कर्तव्यमिति सूचितम् । तथा चोद्योगे—'कांश्चिदर्थान्नरः प्राज्ञो लघुमूलान्महाफलान् । क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान्' इति ।

कच्चित्तु सुकृतान्येव कृतरूपाणि वा पुनः ।
विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः ॥

अनेन राज्ञा कृतानि कृतप्रायाणि वा कर्माणि अन्ये राजानो जानीयुर्न तु कर्तव्यानीति सूचितम् । तथा चोद्योग एव 'यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे । कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥' इति । कालिदासोऽपि— 'तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च । फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव' इति ।

कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः ।
त्वया वा तव वामात्यैर्बुध्यते तात मन्त्रितम् ॥

अनेन राजमन्त्रितो मन्त्रः परैस्तर्कादिना यथा न ज्ञायते तथा गूढं मन्त्रितव्यमित्ययमर्थः स चानुपदमेव प्रपञ्चितः ।

कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ।
पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् ॥

सहस्राण्यपि मूर्खाणां य उपास्ते महीपतिः ।
अथ वाप्ययुतान्येव नास्ति तेषु सहायता ॥

एकोऽप्यमात्यो मेधावी स्थूललक्षो विचक्षणः ।
राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥

अनेन पण्डित एकोऽपि मन्त्री श्रेयोमूलम् । न मूर्खसहस्रमपीति सूचितम् । तथा च राजधर्मे— 'यस्त्वेको बहुभिः श्रेयान्कामं तेन गणं त्यजेत् । श्रेयसो लक्षणं त्वेतद्विक्रमो यस्य दृश्यते । कीर्तिप्रधानो यश्च स्यात्समये यस्य तिष्ठति । समर्थान्पूजयेद्यश्च स्पर्धे स्पर्धयते च यः ॥ न च कामाद्भयात्क्रोधाल्लोभाद्वा धर्ममुत्सृजेत् । अमानी सत्यवाग्दान्तो जितात्मा मानसंयुतः । स ते मन्त्रसहायः स्यात्सर्वावस्थं परीक्षितः ।' इति ।

कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः ।
जघन्यास्तु जघन्येषु भृत्याः कर्मसु योजिताः ॥

अनेन उत्तममध्यमाधमेषु कर्मसु तादृशा एव भृत्या नियोजनीया इति । तथा चोद्योगे—'त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः । नियोजयेद्यथायोगं त्रिविधेष्वेव कर्मसु' इति । राजधर्मेऽपि—'भृत्या ये यत्र योग्याः स्युस्तत्र स्थाप्याः सुरक्षिताः । आनुरूपाणि कर्माणि भृत्येभ्यो यः प्रयच्छति ॥ स भृत्यगणसंपन्नो राजा फलमुपाश्नुते ॥ शरभः शरभस्थाने सिंहः सिंह इवोर्जितः । व्याघ्रो व्याघ्र इव स्थाप्यो द्वीपी द्वीपी यथा तथा ॥ कर्मस्विहानुरूपेषु न्यसेद्भृत्यान्यथाविधि ॥ प्रतिलोमं न भृत्यास्ते स्थाप्याः कर्मफलैषिणा । यः प्रमाणमतिक्रम्य प्रतिलोमं नराधिपः । भृत्यान्स्थापयतेऽबुद्धिर्न स रञ्जयते प्रजाः' इति ।

अमात्यानुपधातीतान्पितृपैतामहाञ्शुचीन् ।
श्रेष्ठाञ्श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ॥

अनेन कुलपरंपरागताञ्शुचीन्मन्त्रिण उत्तमेषु कार्येषु

नियोजयेदिति सूचितम्। तथा च राजधर्मे— 'भक्तं भजेत नृपतिः सदैव सुसमाहितः। अप्रकीर्णेन्द्रियं प्राज्ञमत्यन्तानुगतं शुचिम्। शक्तं चैवानुरक्तं च युञ्ज्यान्महति कर्मणि।' इति।

कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजितप्रजम्।
राज्यं तवानुजानन्ति मन्त्रिणः कैकयीसुत॥

अनेनोग्रदण्डेनाधिकारिणा उद्वेजितं राष्ट्रं मन्त्रिभिः न सोढव्यमिति सूचितम्। तथा च राजधर्मे—'धर्मज्ञः सचिवः कश्चित्तत्प्रपश्येदतन्द्रितः। जिघांसवः पापकामाः परस्वादायिनः शठाः। रक्षोभ्याधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः॥' इति।

कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा।
उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः॥

अनेन पतितं यजमानं याजका इव तर्जनादिनोपभोक्तारं पुरुषं स्त्रिय इव प्रजाः प्रमादिनं राजानं परिभवन्तीति सूचितम्। तथा च राजधर्मे— 'प्रमादिनं हि राजानं लोकाः परिभवन्त्युत।' इति।

उपायकुशलं वैद्यं भृत्यसंदूषणे रतम् ।
शूरमैश्वर्यकामं च यो न हन्ति स वध्यते ॥

अत्रोक्तविशेषणविशिष्टं भृत्यं यो न हन्यात्स एव वध्यत इति सूचितम् । तथा च कामन्दकः—'तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् । अर्धराज्यहरं भृत्यं यो हन्यात्स हतः स्वयम् ।' इति ।

कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमाञ्शुचिः ।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥

अनेनोक्तगुणविशिष्टः सेनापतिः कार्य इति सूचितम् । तथा च राजधर्मे— 'धर्मशास्त्रार्थतत्त्वज्ञः सन्धिविग्रहको भवेत् । मतिमान्स्मृतिमान्ह्रीमान्रहस्यविनिगूहिता । कुलीनः शीलसंपन्नः शुक्लामात्यः प्रशस्यते । एतैरेव गुणैर्युक्तस्तथा सेनापतिर्भवेत् । व्यूहयन्त्रायुधानां च तत्त्वज्ञो विक्रमान्वितः । वर्षशीतोष्णवातानां सहिष्णुः पररन्ध्रवित् ।' इति ।

बलवन्तश्च कच्चित्ते मुख्या युद्धविशारदाः ।
दृष्टापदाना विक्रान्तास्त्वया सत्कृत्य मानिताः ॥

अनेन बलाध्यक्षाः कृतपरीक्षा एव दानमानादिना सत्कृत्य स्थापनीया इति सूचितम् । तथा च राजधर्मे—'अनीकं ये न भिन्दन्ति भिन्नं संस्थापयन्ति च। समानासनयानास्ते कार्या द्विगुणवेतनाः । देशाधिपतयः कार्याः शताधिपतयस्तथा । ततः सहस्राधिपतिं कुर्याच्छूरमतन्द्रितः ।' इति ।

कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् ।
संप्राप्तकालं दातव्यं ददासि न विलम्बसे ॥

कालातिक्रमणाच्चैव भक्तवेतनयोर्भृताः ।
भर्तुः कुप्यन्ति दुष्यन्ति सोऽनर्थः सुमहान्स्मृतः ॥

अनेन भृत्यानां यथोचितभक्तवेतनदानं यथाकालं कर्तव्यमिति सूचितम् । तथा च मनुः—'राजा कर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च । प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः ।' इति ।

कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः ।
कच्चित्प्राणांस्तवार्थेषु संत्यजन्ति समाहिताः ॥

अनेन स्वाम्यर्थं त्यक्तव्यप्राणभया एव संपादनीया

इति सूचितम् । तथा चोद्योगे—'संग्रामादपयातानां भग्नानां शरणैषिणाम् । पौरुषं दर्शयञ्शूरो यस्तिष्ठेदग्रतः पुमान् ॥ क्रीणीयात्तं सहस्रेण एतन्नीतिमतां मतम्' इति । कामन्दकेऽपि—'प्रियेण दानेन च संगृहीतास्त्यजन्ति रक्ष्याण्यपि जीवितानि ।' राजधर्मेऽपि—'त्यजन्ति दारान्प्राणांश्च मनुष्याः प्रतिपूजिताः ॥'

**कच्चिज्जानपदो विद्वान्दक्षिणः प्रतिभानवान् ।**
**यथोक्तवादी दूतस्ते कृतो भरत पण्डितः ॥**

अनेन प्रत्युत्पन्नमतिश्चतुरो यथोक्तवादी च दूतः संपादनीय इति सूचितम् । तथा च मनुः— 'दूतं चैव प्रकुर्वन्ति सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥' इति ।

**कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।**
**त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥**

अनेन शत्रुपक्षेऽष्टादश तीर्थानि स्वपक्षे तु पञ्चदश बहुभिश्चारैः परस्परमविज्ञातै राज्ञा विज्ञातव्यानीति सूचितम् । तीर्थशब्दार्थमाह हलायुधः—'योनौ जला-

ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैः सदा ।
जितेन्द्रियैर्महोत्साहैर्वृतामार्यैः सहस्रशः ॥

प्रासादैर्विविधाकारैर्वृतां वैद्यजनाकुलाम् ।
कच्चित्समुदितां स्फीतामयोध्यां परिरक्षसे ॥

कच्चिच्चैत्यशतैर्जुष्टः सुनिविष्टजनाकुलः ।
देवस्थानैः प्रपाभिश्च तडाकैश्चोपशोभितः ॥

प्रहृष्टवरनारीकः समाजोत्सवशोभितः ।
सुकृष्टसीमा पशुमान्हिंसाभिः परिवर्जितः ॥

अदेवमातृको रम्यः श्वापदैः परिवर्जितः ।
परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः ॥

विवर्जितो नरैः पापैर्मम पूर्वैः सुरक्षितः ।
कच्चिज्जनपदः स्फीतः सुखं वसति राघव ॥

अनेन पुरराष्ट्ररक्षणं कर्तव्यमिति सूचितम् । तथा च राजधर्मे— 'राज्ञा सप्तैव रक्ष्याणि तानि चैतानि बोध मे । आत्मामात्यश्च कोशश्च दण्डो मित्राणि चैव हि ॥ तथा जनपदाश्चैव पुरं च कुरुनन्दन । एतत्सप्तात्मकं

राज्यं परिपाल्यं प्रयत्नतः ॥ यदा रक्षति राष्ट्राणि यदा दस्यूनपोहति । यदा जयति संग्रामे स राज्ञो धर्म उच्यते ॥' इति ।

कच्चित्ते दयिताः सर्वे कृषिगोरक्षजीविनः ।
वार्त्तायां संश्रितास्तात लोको हि सुखमेधते ॥

तेषां गुप्तिपरीहारैः कच्चित्ते भरणं कृतम् ।
रक्ष्या हि राज्ञा धर्मेण सर्वे विषयवासिनः ॥

अनेन पौरजानपदाः सर्वे जना राज्ञा नियमेन रक्षणीया इति सूचितम् । तथा च मनुः— 'युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ।' इति । राजधर्मेऽपि— 'पौरजानपदाश्चैव गोप्तव्याश्च यथा प्रजाः ।' इति ।

कच्चित्स्त्रियः सान्त्वयसि कच्चित्तास्तेऽनुरक्षिताः ।
कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे ॥

अनेन स्त्रियः दानमानसत्कारैः पोष्याः, तासु विश्वासोऽपि न कर्तव्यः, गुह्यं च न भाषणीयमिति । तथा चोद्योगे— 'आनीर्षुर्गुप्तदारश्चेत् संविभागी प्रियंवदः ।

श्लक्ष्णो मधुरवाक् स्त्रीणां न चासां वशगो भवेत् ॥' इति। रक्षणे उद्योगे— 'पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः। स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः॥' विश्वासो न कर्तव्य इत्यत्रापस्तम्बः— 'दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत्।' इति। भोजनीतौ— 'अर्हन्ति नैव विश्वासमर्थकामपराः स्त्रियः। तासु तत्त्वेन न ब्रूयान्नातिस्निह्येत्सदा सुधीः॥' इति। उद्योगेऽपि— 'स्त्रीषु राजसु सर्पेषु स्वाध्याये शत्रुसेविषु। भोगेष्वायुषि विश्वासं कः प्राज्ञः कर्तुमर्हति॥' इति।

**कच्चिन्नागवनं गुप्तं कच्चित्ते सन्ति धेनुकाः।**
**कच्चिन्न गणिकाश्वानां कुञ्जराणां च तृप्यसि॥**

अनेन गजोत्पत्तिस्थानानि रक्षणीयानि। गजाश्वादिप्राप्तौ तृप्त्या न भवितव्यमिति सूचितम्। तथा च राजधर्मे— 'आकरे लवने शुल्के तले नाम वने तथा। न्यसेदमात्यान्नृपतिः स्वाप्तान्वा पुरुषान्हितान्॥' इति। असंतुष्टौ राजधर्मे— 'न पूर्णोऽस्मीति मन्येत धर्मतः

कामतोऽर्थतः । बुद्धिजो मन्त्रितश्चापि सततं वसुधाधिप ॥’ इति ।

कच्चिद्दर्शयसे नित्यं मनुष्याणां विभूषितः ।
उत्थायोत्थाय पूर्वाह्णे राजपुत्र महारथ ॥

अनेन सर्वाभरणभूषितो राजा प्रत्यहं पूर्वाह्ण एव प्रयोजनापेक्षिणां जनानां चक्षुर्विषयो भूयादिति सूचितम् । तथा चाश्रमवासिके पर्वणि— तथैवालंकृतः काले तिष्ठेथा भूरिदक्षिण ॥’ इति ।

कच्चित्त्न सर्वे कर्मान्ताः प्रत्यक्षास्तेऽविशङ्कया ।
सर्वे वा पुनरुत्सृष्टा मध्यमे वात्र कारणम् ॥

अनेन सेवकैः शिल्पिभिर्वा अतिपरिचितिः अत्यन्तापरिचितिर्वा न कर्तव्या, किं तु मध्यमेनैव वर्तितव्यमिति सूचितम् ।

कच्चित्सर्वाणि दुर्गाणि धनधान्यायुधोदकैः ।
यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥

अनेन दुर्गवर्गो निरर्गलं धनधान्यादिसकलवस्तुसमृद्धः

कर्तव्य इति सूचितम् । तथा च मनुः— दुर्गमुपक्रम्य, 'तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः । ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥' इति ॥

आयस्ते विपुलः कच्चित्कच्चिदल्पतरो व्ययः ।
अपात्रेषु न ते कच्चित्कोशो गच्छति राघव ॥

अनेनाल्पव्ययः कर्तव्यः, अल्पव्ययोऽपि अपात्रे न कर्तव्य इति सूचितम् । राजधर्मे— 'सदैव याचमानेषु तथा दम्भान्वितेषु च । यत्तेषु दक्षिणा दत्ता दावाग्नाविव दुर्हुतम् ।' कामन्दके— 'अपात्रवर्षणं जातु न कुर्यात्सद्भिर्गर्हितम् । अपात्रवर्षणं किं स्यादन्यत्कोशक्षयादृते' इति ।

देवतार्थे च पित्रर्थे ब्राह्मणाभ्यागतेषु च ।
योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः ॥

अनेन देवताद्यर्थेषु नियमेन व्ययः कर्तव्य इति सूचितम् । तथा च कामन्दके— 'धर्मार्थे क्षीणकोशस्य कृशत्वमपि शोभते । सुरैः पीतावशेषस्य शरद्धिमरुचेरिव' इति ।

कच्चिदार्यो विशुद्धात्मा क्षारितश्चोरकर्मणा ।
अपृष्टः शास्त्रकुशलैर्न लोभाद्बध्यते शुचिः ॥

अनेन अनपराधिनं मन्त्रिभिरनालोच्य न दण्डनीयमिति सूचितम् ।

गृहीतश्चैव पृष्टश्च काले दृष्टः सकारणः ।
कच्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ॥

अनेन चोरो धनलोभान्न विसर्जनीय इति सूचितम् । तथा च राजधर्मे—'निहन्यात्सर्वतो दस्यून्न कामात्कस्यचित्क्षमेत्' इति ।

व्यसने कच्चिदाढ्यस्य दुर्गतस्य च राघव ॥

दरिद्रस्य व्यवहारे प्राप्ते लोभादिना व्यवहारो न कर्तव्य इति सूचितम् । अत एव विपक्षे दण्ड उक्तो मनुना—'लोभाद्दण्डसहस्रं तु मोहात्पूर्वं तु साहसम्' इति । उमामहेश्वरसंवादेऽपि—'अधर्मं धर्ममित्याहुर्ये च मोहवशागताः । ते त्वकालहतोद्योगाः संभवन्ति हि मानुषे ॥ निर्होमा निर्वषट्कारास्ते भवन्ति गतायुषः ।' इति ।

यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि राघव ।
तानि पुत्रपशून्घ्नन्ति प्रीत्यर्थमनुशासतः ॥

अनेन परकृतमिथ्यापवादं पुरस्कृत्य तत्प्रीत्यै अनुशासनं न कर्तव्यमिति सूचितम् । तथा च राजधर्मे— 'कामकारेण दण्डं तु यः कुर्यादविचक्षणः । स इहाकीर्तिसंयुक्तो मृतो नरकमाप्नुयात् ॥ न परस्य प्रवादेन परेषां दण्डमर्पयेत् ॥' इति ।

कच्चिद्वृद्धांश्च बालांश्च वैद्यमुख्यांश्च राघव ।
दानेन मनसा वाचा त्रिभिरेतैर्बुभूषसे ॥

अनेन वृद्धादीन्वैद्यान्दानमानसत्कारैर्विभूषयेदिति सूचितम् । तथा च मनुः— 'श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिंचन । महाकुलीनमार्यं च राजा संपूजयेत्सदा ॥' इति ।

कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः ।
उभौ वा प्रतिलोभेन कामेन च न बाधसे ॥

अनेन धर्माधर्मयोः परस्परोपमर्दः कामेन तयोरुप-

मर्दश्च न कर्तव्य इति सूचितम् । तथा च वनपर्वणि— 'सर्वथा धर्मनित्यं तु पुरुषं धर्मदुर्बलम् । त्यजतस्तात धर्मार्थौ प्रेतं दुःखसुखे यथा ॥ अतिवेलं हि योऽर्थार्थी नेतरावनुतिष्ठति । स वध्यः सर्वभूतानां ब्रह्महेव जुगुप्सितः ॥ तस्य धर्मार्थहीनस्य कामतो निधनं ध्रुवम् । कामतो रममाणस्य मीनस्येवाम्भसः क्षये ॥ सर्वार्था धर्ममूलोऽर्थो धर्मश्चार्थपरिग्रहः । इतरेतरयोनीतौ विद्धि मेघोदधी यथा । न धर्मपर एव स्यात् न चार्थपरमो नरः । न कामपरमो वा स्यात् सर्वान्सेवेत पण्डितः ॥' इति । राजधर्मेऽपि— 'कामक्रोधौ पुरस्कृत्य योऽर्थं राजानुतिष्ठति । न स धर्मं न चाप्यर्थं प्रतिगृह्णाति बालिशः ॥' इति ।

**कच्चिदर्थं च धर्मं च कामं च जयतां वर ।**
**विभज्य काले कालज्ञ सर्वान्भरत सेवसे ॥**

अनेन धर्मार्थकामा यथोचितकाले सेवनीया इत्युक्तम् । तथा च वनपर्वणि— 'धर्मं चार्थं च कामं च यथावद्वदतां वर । विभज्य काले कालज्ञ सर्वान्सेवेत पण्डितः ॥'

धर्मं पूर्वं धनं मध्ये जघन्ये काममाचरेत् । अहन्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥' इति ।

कच्चित्ते ब्राह्मणाः शर्म सर्वशास्त्रार्थकोविदाः ।
आशंसन्ते महाप्राज्ञाः पौरजानपदैः सह ॥

अनेन विषयावसिनो ब्राह्मणादयो यथाशर्माशंसेरन् तथा पालनीया इति सूचितम् । तथा च राजधर्मे— 'तस्माद्विजातीन्रक्षेत ते हि रक्षन्ति रक्षिताः । आशीरेषा भवेद्राजन्राज्ञां सम्यक्प्रवर्तताम् ॥' इति ।

नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् ।
अदर्शनज्ञानवतामालस्यं पञ्चवृत्तिताम् ॥

एकचिन्तनमर्थानामनर्थज्ञैश्च मन्त्रणम् ।
निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् ॥

मङ्गलान्यप्रयोगं च प्रत्युत्थानं च सर्वशः ।
कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश ॥

पञ्चवृत्तितां पञ्चेन्द्रियवशतां प्रत्युत्थानं च सर्वशः अनेन एते दोषा राज्ञा वर्जनीया इति सूचितम् ।

दशपञ्चचतुर्वर्गान्सप्तवर्गांश्च तत्त्वतः ।
अष्टवर्गं त्रिवर्गं च विद्यास्तिस्रश्च राघव ॥

इन्द्रियाणां जयं बुद्ध्वा षाड्गुण्यं दैवमानुषम् ।
कृत्यं विंशन्ति वर्गं च तथा प्रकृतिमण्डलम् ॥

यात्रादण्डविधानं च द्वियोनी संधिविग्रहौ ।
कच्चिदेतान्महाप्राज्ञ यथावदनुमन्यसे ॥

अनेन नीतिशास्त्रप्रसिद्धा दशवर्गादयो राज्ञा उपादेयत्वेन हातव्यत्वेन च सूचिताः । तथा च मनुः— 'दश कामसमुत्थानि तथाष्टौ क्रोधजान्यपि । व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् । व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते । व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी नृप ॥' इति । तत्र दशवर्गादयो मनुना दर्शिताः— 'मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाध्वा च कामजो दशको गणः ॥' इति । कामन्दकेनापि 'लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः । मूढोऽनेयोऽत्रमन्ता च सुखच्छेद्यो रिपुर्मतः' इति दशवर्गः । अथ पञ्चवर्गः, अत्र काम-

न्दकः— 'सापत्नं वास्तुजं बीजं वाग्जातमपराधजम् । वैरप्रभेदनिपुणैर्वैरं पञ्चविधं स्मृतम् ॥' इति । संग्राह्योऽपि पञ्चवर्गः; तत्र मनुः— 'औदकं पार्वतं वार्क्षं मैरिणं धान्वनं तथा । शस्तं प्रशस्तमतिथिर्दुर्गं दुर्गोपचिन्तकैः ॥' इति । अथ चतुर्वर्गः, अत्र कामन्दकः— 'साम दानं च भेदश्च दण्डश्चेति चतुर्विधम् ॥' इति । अथ सप्तवर्गः, तत्र कामन्दकः— 'स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं राज्यं सप्ताङ्गमुच्यते ।' इति । अथाष्टवर्गः, तत्र मनुः— 'पैशुन्यं साहसं द्रोहमीर्ष्यासूयार्थदूषणम् । वाग्दण्डयोश्च पारुष्यं क्रोधजोऽपि गणोऽष्टकम् ॥' इति । कामन्दकेऽपि कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरं करादानं शून्यानां च निवेशनम् । अष्टवर्गमिदं प्राहुः स्वस्थचित्तो विवर्धयेत् ॥' इति । अथ त्रिवर्गः, तत्र कामन्दकः— 'वस्तुष्वशक्येषु समुद्यमं च शक्येषु मोहादसमुद्यमं च । शक्येष्वकार्येषु समुद्यमं च त्रीण्येव कार्ये व्यसनं वदन्ति ॥' यद्वा, धर्मार्थकामाः । अथ तिस्रो विद्याः प्रभुमन्त्रोत्साहशक्तयः, त्रयी

वार्ता दण्डनीतिर्वा । अथ षाड्गुण्यम्, षाड्गुण्यं षड्गुणाः, तत्र मनुः— 'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥' इति । दैवमानुषम्, दैवं च मानुषं चैव दैवमानुषं व्यसनम् । हुताशनो जलं व्याधिर्दुर्भिक्षं मरकस्तथा । मरको दस्युप्रभृतिजनितोपद्रवः ॥' इति पञ्चविधं दैवं व्यसनम्; मानुषं परम्, 'आयुक्तकेभ्यश्चोरेभ्यः शत्रुभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम् ॥' आयुक्ताः, अधिकारिणः । कृत्यं कृत्यवर्गं भेद्यवर्गम्; अत्र कामन्दकः— 'अत्तव्यवेतनो लुब्धो मानी चाप्यवमानितः । क्रुद्धश्च कोपितोऽकस्मात्तथा भीतश्च भीषितः ॥ यथाभिलषितैः कामैर्भिन्द्यादेतांश्चतुर्विधान् ।' इति । अथ विंशतिवर्गः असंधेयविंशतिवर्गः कामन्दकः— 'बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बालव्यसनसंकुलः ॥ अदेशस्थो बहुरिपुयुक्तः

काले नयश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलम् ॥' इति । यद्वा, 'राज्यस्त्रीस्थानदेशानां ज्ञातीनां च धनस्य च । अपहारो मदो मानं पीडा वैषयिकी तथा ॥ ज्ञानार्थशक्तिधर्माणां विघातो दैवमेव च । मित्रार्थेश्चावमानश्च तथा बन्धुविनाशनम् ॥ भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् । एकार्थाभिनिवेशत्वमिति विग्रहयोनयः ॥' इति । प्रकृतिमण्डलम्, प्रकृतयो मण्डलं च । प्रकृतयस्तावत्, अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः ॥' इति । मण्डलं तु, अरिर्मित्रमरेर्मित्रं मित्रं मित्रमतः परम् । तथारिमित्रं मित्रं च विजिगीषोः पुरः स्मृतम् ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रान्तस्तदनन्तरम् । असारोपचयश्चैव विजिगीषोस्तु मण्डलम् ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोर्व्यस्तयोर्निग्रहे प्रभुः ॥ मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां निग्रहे प्रभुः ॥' इति । यात्रा, यानम् । तच्च पञ्चविधम् । तथा च कामन्दकः—

'विगृह्य संधाय तथा संभूयाथ प्रसंगतः । उपेक्ष्य चेति निपुणैर्यानं पञ्चविधं मतम् ॥' इति । दण्डविधानं सैन्यविधानम् । द्वियोनी संधिविग्रहौ । द्वयोर्यानासनयोः द्वियोनी कारणभूतौ संधिविग्रहौ । तत्र संधिः, द्वैधीभाव-समाश्रययोर्योनिः । विग्रहस्तु—यानासनयोः । कामन्दकः— 'संधेश्च विग्रहस्यैव द्वैगुण्यमिति चक्षते । यानासने विग्रहस्य रूपं संधेः परं द्वयम्' इति ।

मन्त्रिभिस्त्वं यथोद्दिष्टैश्चतुर्भिस्त्रिभिरेव वा ।
कच्चित्समस्तैर्व्यस्तैश्च मन्त्रं मन्त्रयसे मिथः ॥

अनेन कृत्यजातं सर्वं राज्ञा मन्त्रिभिरालोच्यैव कर्तव्यमिति सूचितम् । तथा च मनुः— 'तैः सार्धं चिन्तयेन्नित्यं सामान्यं संधिविग्रहम् । स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥ तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक् । समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥' इति ।

कच्चित्ते सफला वेदाः कच्चित्ते सफलाः क्रियाः ।
कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥

अनेन वेदादयः फलपर्यवसायिनः कर्तव्या इति सूचितम्। तथा च सभापर्वणि युधिष्ठिरं प्रति नारदः—'अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम्। रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम्॥' इति।

कच्चिदेषैव ते बुद्धिर्यथोक्ता मम राघव।
आयुष्या च यशस्या च धर्मकामार्थसंहिता॥

कच्चित्स्वादु कृतं भोज्यमेको नाश्नासि राघव।
कच्चिदाशंसमानेभ्यो मित्रेभ्यः संप्रयच्छसि॥

अनेन मृष्टमन्नं नैकेन भोक्तव्यमिति सूचितम्। तथा चोद्योगपर्वणि—'एको न मृष्टमश्नीयादेकः स्वार्थान्न चिन्तयेत्॥' इति। तत्रैव—'एकः संपन्नमश्नाति वस्ते वासश्च शोभनम्। योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः॥' अत्र श्रीरामचन्द्रेण स्वसंदर्शनार्थं समागतस्य भरतस्य कुशलप्रश्नव्याजेन सर्वेषां धर्माणां प्रतिपादनात्, महद्भिः स्वेष्टजनस्य समागमे कुशलप्रश्नपूर्वकं धर्मोपदेशः कर्तव्य इति सूचितम्। तथा च सभापर्वणि धर्मपुत्रं प्रति नारदवचनम्। वैशंपायनः—

'अथ तत्रोपविष्टेषु पाण्डवेषु महात्मसु । लोकान्परिभ्रमन्सर्वांस्तत्रागमत्सभामृषिः ॥ नारदः स महातेजा ऋषिभिः सहितस्तदा । सभास्थान्पाण्डवान्द्रष्टुं प्रीयमाणो मनोजवः ॥ सहसा पाण्डवो ज्येष्ठः प्रत्युत्थायानुजैः सह । अभ्यवादयत प्रीत्या विनयावनतस्तदा ॥ सोऽर्चितः पाण्डवैः सर्वैर्महर्षिर्वेदपारगः । धर्मकामार्थसंयुक्तं पप्रच्छेदं युधिष्ठिरम् । नारदः—'कच्चिदर्थाश्च कल्प्यन्ते धर्मे च रमते मनः । सुखानि तव जायन्ते मनश्च न विहन्यते ॥ कच्चिदाचरितां पूर्वैर्नरदेव पितामहैः । वर्तसे वृत्तिमक्षीणां धर्मार्थसहितां त्रिषु ॥ कच्चिदर्थेन वा धर्मं धर्मेणार्थमथापि वा । उभौ चाप्रीतिसारेण न कामेन प्रबाधसे ॥ कच्चिदर्थं च कामं च धर्मं च जयतां वर । विभज्य काले कालज्ञ सदा वरद सेवसे ॥ कच्चिद्राजन्गुणैः षड्भिः सप्तोपायांस्तथानघ । बलाबलं तथा सम्यक्चतुर्दश परीक्षसे ॥ कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर । तथा संधाय कर्माणि अष्टौ भारत सेवसे ॥ कच्चित्प्रकृतयः सप्त न लुप्ता भरतर्षभ । आढ्यास्तथाव्यसनिनः स्वनुरक्ताश्च सर्वशः । कच्चिन्न तर्कैर्दूतैर्वा ये चाप्यपरि-

शङ्किताः ॥ त्वत्तो वा तव वामात्यैर्भिद्यते तात मन्त्रितम् । कच्चित्संधिः यथा कालं विग्रहं चोपसेवसे ॥ कच्चिद्वृत्तिमुदासीने मध्यमे चानुवर्तसे । कच्चिदात्मसमा बुद्धाः शुचयो जीवितक्षमाः ॥ कुलीनाश्चानुरक्ताश्च कृतास्ते वीर मन्त्रिणः । विजयो मन्त्रमूलो हि राज्ञां भवति भारत । सुसंवृतो मन्त्रिवरैरमात्यैः शास्त्रकोविदैः । राष्ट्रं सुरक्षितं तात शत्रुभिर्न च लुप्यते ॥ कच्चिन्निद्रावशं नैषीः कच्चित्काले विबुध्यसे । कच्चिच्चापरतन्त्रेषु चिन्तयस्यर्थमब्रुवन् ॥ कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह ॥ कच्चित्ते मन्त्रितो मन्त्रो राष्ट्रं न परिधावति । कच्चिदर्थान्विनिश्चित्य लघुमूलान्महोदयान् ॥ क्षिप्रमारभसे कर्तुं न विघ्नयसि तादृशान् । कच्चित्सर्वे न कर्मान्ताः परोक्षास्ते विशङ्किताः ॥ सर्वे वा पुनरुत्सृष्टाः संसृष्टं चात्र कारणम् । आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः ॥ कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः । विदुस्ते वीर कर्माणि नानवाप्तानि कानिचित् । कच्चित्कारणिकाः सर्वे सर्वशास्त्रेषु कोविदाः । कारयन्ति कुमारांश्च योधमुख्यांश्च सर्वशः ॥ कच्चित्सहस्रैर्मूर्खाणा-

मेकं क्रीणासि पण्डितम् । पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परम् ॥ कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः । यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ एकोऽप्यमात्यो मेधावी शूरो दान्तो विचक्षणः । राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥ कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च । त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ कच्चिद्द्विषामविदितः प्रतिपन्नश्च सर्वदा । नित्ययुक्तो रिपून्सर्वानीक्षसे रिपुसूदनम ॥ कच्चिद्विनयसंपन्न कुलपुत्रो बहुश्रुतः । अनसूयुरनुप्रष्टा संस्कृतस्ते पुरोहितः ॥ कच्चिदाग्नषु ते युक्तो विधिज्ञो मतिमानृजुः । हुतं च होष्यमाणं च काले वेदयते सदा ॥ कच्चिदङ्गेषु निष्णातो ज्योतिर्विद्याविशारदः । उत्पातेषु च सर्वेषु दैवज्ञकुशलस्तव ॥ कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः । जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः ॥ अमात्यानुपधातीतान्पितृपैतामहाञ्छुचीन् । श्रेष्ठाञ्श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ॥ कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजितप्रजाः । राष्ट्रं तवानुजानन्ति मन्त्रिणो भरतर्षभ ॥ कच्चित्त्वां नावजान-

न्ति याजकाः पतितं यथा । उग्रप्रतिगृहीतारं कामयानमिव स्त्रियः ॥ कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमान्कविः । कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्तव । कच्चिद्बलस्य ते मुख्याः सर्वे युद्धविशारदाः ॥ धृष्टा वदान्या विक्रान्तास्त्वया सत्कृत्य मानिताः । कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् ॥ संप्राप्तकालं दातव्यं ददासि न विकर्षसि । कालातिक्रमणाच्चैते भक्ता वेतनयोर्भृताः ॥ भर्तुः कुप्यन्ति दौर्गत्या सोऽनर्थः सुमहान्स्मृतः । कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः ॥ कच्चित्प्राणांस्तवार्थेषु संत्यजन्ति सदा युधि । कच्चिन्नैको बहूनर्थान्सर्वशः सांपरायिकान् ॥ अनुशास्ति यथाकामं कामात्मा शासनातिगः । कच्चित्पुरुषकारेण पुरुषः कर्म भावयन् ॥ लभते मानमात्मीयं भूयो वा भक्तवेतनम् । कच्चिद्विद्याविनीतांश्च नराञ्ज्ञानविशारदान् ॥ यथार्हं गुणतश्चापि दानेनाभ्युपपद्यसे । कच्चिद्दारान्मनुष्याणां तवार्थे मृत्युमीयुषाम् । व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ॥ कच्चिद्भयादुपरतं क्लीबं रिपुमुपागतम् । युद्धे वा विजितं पार्थ पुत्रवत्परिरक्षसि ॥ कच्चित्त्वमस्याः सर्वस्याः

पृथिव्याः पृथिवीपते। समश्च नाभिशङ्क्यश्च यथा माता यथा पिता ॥ कच्चिद्व्यसनिनं शत्रुं निशम्य भरतर्षभ। अभियासि जवेनैव समीक्ष्य त्रिविधं बलम्। पार्ष्णिमूलं च विज्ञाय व्यवसायं पराजयम्॥ बलस्य तु महाराज दत्त्वा वेतनमग्रतः। कच्चिच्च बलमुख्येभ्यः परराष्ट्रे परंतप ॥ उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः। कच्चिदात्मानमेवाग्रे विजित्य विजितेन्द्रियः॥ परान्जिगीषसे पार्थ प्रमत्तानजितेन्द्रियान्। कच्चित्ते यास्यतः शत्रून्पूर्वं यान्ति स्वनुष्ठिताः॥ साम दानं च भेदश्च दण्डश्च विधिवद्गुणाः। कच्चिन्मूलं दृढं कृत्वा यात्रां यासि विशांपते॥ तांश्च विक्रमसे जेतुं जित्वा च परिरक्षसि। कच्चिदष्टाङ्गसंयुक्ता चतुर्विधबला चमूः॥ बलमुख्यैः सुनीता च द्विषतां प्रतिबर्धिनी। कच्चिल्लवं च मुष्टिं च परराष्ट्रे परंतप॥ अविहाय महाराज निहंसि समरे रिपून्। कच्चित्स्वपरराष्ट्रेषु बहवोऽधिकृतास्तव। अर्थान्समनुतिष्ठन्ति रक्षन्ति च परस्परम्। कच्चिदभ्यवहाराणि गात्रसंस्पर्शनानि च। पेयानि च महाराज रक्ष्यन्तेऽनुमतास्तव। कच्चित्कोष्ठं च कोशं

च वाहनं द्वारमायुधम् ॥ आयश्च कृतकल्याणैः तव भक्तैरनुष्ठितः । कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशांपते ॥ रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान् । कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च ॥ प्रतिजानन्ति पूर्वाह्णे व्ययं व्यसनजं तव । कच्चिदायस्य चार्धेन चतुर्भागेन वा पुनः ॥ पादभागैस्त्रिभिर्वापि व्ययः संशुध्यते तव । कच्चिज्ज्ञातीन्गुरून्वृद्धान्वणिजः शिल्पिनः श्रितान् ॥ अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान् ॥ कच्चिदायव्यये युक्ताः सर्वे गणकलेखकाः ॥ अनुतिष्ठन्ति पूर्वाह्णे नित्यमायव्ययं तव । कच्चिदर्थेषु संप्रौढान्हितकामाननुप्रियान् ॥ नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम् । कच्चिद्विदित्वा पुरुषानुत्तमाधममध्यमान् ॥ त्वं कर्मस्वनुरूपेषु नियोजयसि भारत । कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशांपते ॥ अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठिताः । कच्चिन्न लुब्धैश्चौरैर्वा कुमारैः स्त्रीबलेन वा ॥ त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः ॥ कच्चिद्राष्ट्रे तडागानि पूर्णानि च महान्ति च । भागशो वै निविष्टानि न

कृषिर्दैवमातृका ॥ कच्चिद्बीजं च भक्तं च कर्षकायाव-
सीदते। प्रत्येकं च शतं वृद्ध्या ददास्यृणमनुग्रहम् ॥
कच्चित्स्वनुष्ठिता तात वार्त्ता ते साधुभिर्जनैः। वार्त्तायां
संश्रितस्तावल्लोकोऽयं सुखमेधते॥ कच्चिच्छूराः कृतप्रज्ञाः
पञ्च पञ्चस्वनुष्ठिताः। क्षेमं कुर्वन्ति संहत्य राजन् जन-
पदे तव॥ कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः॥
ग्रामवच्च कृता रक्षा ते च सर्वे तदर्पणाः। कच्चिद्बले-
नानुयाताः समानि विषमाणि च॥ पुराणि चौरा नि-
घ्नन्ति चरन्ति विषये तव। कच्चित्स्त्रियः सान्त्वयसि
कच्चित्ताश्च सुरक्षिताः॥ कच्चिन्न श्रद्दधास्यासां
कच्चिद्गुह्यं न भाषसे। कच्चिच्चारान्निशि श्रुत्वा तत्कार्य-
मनुचिन्त्य च। प्रियाण्यनुभवञ्शेषे विचिन्त्याभ्यन्तरं
जनम्॥ कच्चिद्द्वौ प्रथमौ यामौ रात्र्यां सुप्त्वा विशां-
पते। संचिन्तयसि धर्मार्थौ याम उत्थाय पश्चिमे॥
कच्चिद्दर्शयसे नित्यं मनुष्यान्समलंकृतान्। उत्थाय
काले कालज्ञ सह पाण्डव मन्त्रिभिः॥ कच्चिद्रक्ता-
म्बरधराः खड्गहस्ताः स्वलंकृताः। अभितस्त्वामु-
पासन्ते रक्षणार्थमरिंदम॥ कच्चिद्दण्ड्येषु यमवत्पू-

क्येषु च विशांपते। परीक्ष्य वर्तसे सम्यगप्रियेषु प्रियेषु च ॥ कच्चिच्छारीरमाबाधमौषधैर्नियमेन वा। मानसं वृद्धसेवाभिः सदा पार्थापकर्षसि ॥ कच्चिद्वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः। सुहृदश्चानुरक्ताश्च शरीरे ते हिताः सदा ॥ कच्चिन्न मानान्मोहाद्वा कामाद्वापि विशांपते। अर्थिप्रत्यर्थिनः प्राप्तान्नापास्यसि कथंचन ॥ कच्चिन्न मोहाल्लोभाद्वा विस्रंभात्प्रणयेन वा। आश्रितानां मनुष्याणां वृत्तिं त्वं निरुणत्सि च ॥ कच्चित्पौराणसहिता ये च ते राष्ट्रवासिनः। त्वया सह विरुध्यन्ते परैः क्रीताः कथंचन ॥ कच्चिन्न दुर्बल शत्रुर्बलेन परिपीडितः। मन्त्रेण बलवान्कश्चिदुभाभ्यां वा युधिष्ठिर ॥ कच्चित्सर्वेऽनुरक्तास्त्वां भूमिपालाः प्रधानतः। कच्चित्प्राणांस्तवार्थेषु संत्यजन्ति त्वयादृताः ॥ कच्चित्ते सर्वविद्यासु गुणतोऽर्चा प्रवर्तते। ब्राह्मणानां च साधूनां तव निःश्रेयसे शुभा ॥ कच्चिद्धर्मे त्रयीमूले पूर्वैराचरिते जनैः ॥ वर्तमानस्तथा कर्तुं तस्मिन्कर्मणि वर्तसे। कच्चित्तव गृहेऽन्नानि स्वादून्यश्नन्ति वै द्विजाः ॥ गुणवन्ति गुणोपेतास्तवाध्यक्षं सुदक्षिणम्। कच्चित्त्वं

कुरुषे राजन्वाजपेयांश्च सर्वशः ॥ पौण्डरीकांश्च का-
र्त्स्न्येन यतसे कर्तुमात्मवान् । कच्चिज्ज्ञातीन्गुरून्वृद्धान्दे-
वतांस्तापसानपि ॥ चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च
नमस्यसि ॥ कच्चिच्छोको न मन्युर्वा त्वया चोत्पाद्यतेऽनघ ।
आयुष्या च यशस्या च धर्मकामार्थदर्शिनी ॥ एतया
वर्तमानस्य बुध्या राष्ट्रं न सीदति । विजित्य च महीं राजा
सोऽत्यन्तं सुखमेधते ॥ कच्चिदार्यो विशुद्धात्मा क्षा-
रितश्चोरकर्मणि । अदुष्टः शास्त्रकुशलैर्न लोभाद्वध्यते
शुचिः ॥ दुष्टो गृहीतस्तत्कारी प्राज्ञैर्दुष्टः सकारणः ।
कच्चिन्न मुच्यते स्तेनो द्रव्यलोभान्नरर्षभ ॥ उत्पन्नान्क-
च्चिदाढ्यस्य दरिद्रस्य च भारत । अर्थान्न मिथ्या पश्य-
न्ति तवामात्या हृता धनैः ॥ नास्तिक्यमनृतं क्रोधं
प्रमादं दीर्घसूत्रताम् । अदर्शनं ज्ञानवतामालस्यं क्षिप्त-
चित्तताम् ॥ एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम् ।
निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् ॥ मङ्गल्य-
स्याप्रयोगं च प्रसङ्गं विषयेषु च । कच्चित्त्वं वर्ज-
यस्येतान्राजदोषांश्चतुर्दश ॥ प्रायशो यैर्विनश्यन्ति
कृतमूलोऽपि पार्थिवः । कच्चित्ते सफला वेदाः कच्चि-

ते सफलं धनम् ॥ कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥ युधिष्ठिरः । कथं वै सफला वेदाः कथं वै सफलं धनम् । कथं वै सफला दाराः कथं वै सफलं श्रुतम् ॥ नारदः— अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् । रतिपुत्रफला नारी शीलवृत्तफलं श्रुतम् ॥ वैशम्पायनः— एतदाख्याय स मुनिर्नारदः सुमहातपाः । पप्रच्छानन्तरमिदं धर्मपुत्रं युधिष्ठिरम् । नारदः— कच्चिदभ्यागता दूता वणिजो लोभकारणात् । यथोक्तमपहार्यन्ते शुल्कं शुल्कोपजीविभिः ॥ कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानवाः । उपानयन्ति पुण्यानि उपधाभिर्न वञ्चिताः । कच्चिच्छृणोषि मर्त्यानां धर्मार्थसहिता गिरः ॥ नित्यमर्थविदां तात तथा कर्मानुदर्शिनाम् । कच्चित्ते कृषितन्त्रेषु गोषु पुण्यफलेषु च ॥ धर्मार्थं द्विजमुख्येभ्यो दीयते मधुसर्पिषी । द्रव्योपकरणं किंचित्सर्वदा सर्वशिल्पिषु ॥ चातुर्मास्यवरं सम्यङ्नियतं संप्रयच्छसि । कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि ॥ सतां मध्ये महाराज सत्करोषि च पूजयन् । कच्चित्सूत्राणि सर्वाणि गृह्णासि भरतर्षभ ॥ हस्तिसू-

ऽश्वसूत्राणि ब्रह्मदण्डश्च भारत । विषयोगाश्च सर्वे ते विदिताः शत्रुनन्दनाः ॥ कच्चिदग्निभयाच्चैव सर्पव्यालभयात्तथा । रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि ॥ कच्चिदन्धांश्च पंगूंश्च मूकान्व्यङ्गानबान्धवान् । पितेव पासि धर्मज्ञ तथा प्रव्राजितानपि ॥ षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः । निद्रालस्यं भयं क्रोधो मार्दवं दीर्घसूत्रताम् ॥ एवं यो वर्तते राजा चातुर्वर्ण्यस्य रक्षणे । स विहृत्येह सुसुखी शक्रस्यैति सलोकताम्' इति ॥ एकशततमे—तदनु तदनुजो भरतः कुशलप्रश्नमिषेण नानाविधान्राजधर्मानुपदिशन्तं राममद्रं प्रत्युवाच—

**किं मे धर्माद्विहीनस्य राजधर्मः करिष्यति ।**

अवश्यकर्तव्यज्येष्ठानतिक्रमणरूपधर्माद्विहीनस्य राजधर्मः अकिंचित्कर इत्यर्थः । तदेवाह—

**शाश्वतोऽयं सदा धर्मः स्थितोऽस्मासु नरर्षभ ।**
**ज्येष्ठे पुत्रे स्थिते राजन्न कनीयान्नृपो भवेत् ।**
**सुसमृद्धां मया सार्धमयोध्यां गच्छ राघव ॥**

तदस्मत्कुलश्रेयोऽभिवृद्धये त्वमात्मानमभिषेचय ।

राजानं मानुषं प्राहुर्देवत्वे संमतं मम ।
यस्य धर्मार्थसहितं वृत्तमाहुरमानुषम् ॥

अनेन अमानुषचरित्रत्वाद्राजा देव एव। अदर्शितामानुषचरित्रत्वं च मनुना दर्शितम्—'चन्द्रस्यार्कस्य वातस्य यमस्य वरुणस्य च। इन्द्रस्याग्नेः पृथिव्याश्च तेजो वृत्तं नृपश्चरेत् ॥ वार्षिकांश्चतुरो मासान्यथेन्द्रोऽद्भिः प्रवर्षति। तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥ अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः। तथा हरेत्करं राष्ट्रान्नित्यकर्मव्रतं चरन् ॥ प्रविश्य सर्वभूतानि यथा चरति मारुतः। तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥ यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति। तथा राज्ञा नियन्तव्याः सर्वे तद्धि यमव्रतम् ॥ वारुणेन यथा पाशैर्बध्यते पापकृन्नरः। तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥ परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः। तथा प्रकृतयो यस्मिन्स चन्द्रव्रतिको नृपः ॥ प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु। दुष्टसामन्तहिंस्रश्च तदा-

प्रेयव्रतं स्मृतम् ॥ यथा सर्वाणि भूतानि धरा धारयते समम् । तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥' इति । दशरथोऽपि मयि केकयदेशनिवासिनि, त्वयि चारण्यमाश्रिते, त्वद्विवासनजनितगुरुतरशोकभारविदीर्णहृदयः स्वर्गमार्गं परिष्कृतवान् । उत्तिष्ठ तदधुना पितुरौर्ध्वदेहिकमुदकं कुरु । प्रागेव शत्रुघ्नेन सहाहमुदकमकरवम् ।

प्रियेण खलु दत्तं हि पितृलोकेषु राघव ।
अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥

अत्र, 'पुत्राणां मध्यमो वापि कनिष्ठो ज्येष्ठ एव वा । पितुर्यस्तु प्रियतमः सर्वं तेनैव कारयेत् ॥' इति ऋष्यशृङ्गवचनपर्यालोचनया सत्यपि ज्येष्ठे प्रियपुत्रस्यैव पितुरौर्ध्वदेहिकाधिकारप्रतिपादनेन प्रियज्येष्ठपुत्रदत्तं पितुरक्षय्यं भवतीति अनुक्तसिद्धम् ॥ द्विशततमे—

पितृमरणसमाकर्णनसमाधिकशोकसंतप्तहृदयो रामभद्रः चात्रगारिकानिसृष्टकुलिशसदृशं भरतवदनविनिर्गतं वचनमाकर्ण्य परशुसनिकृत्तसालपोत इव भूमौ निपपात ।

तदनु तदनुजाः कशाघातपरिश्रमेण प्रसुप्तं गजराजमिव नयनजेन जलेन सिषिचुः । अथ मुहूर्तात्संज्ञामुपलभ्य उत्फुल्लारविन्दसमाकाराभ्यां नयनाभ्यां मुहुर्मुहुरुष्णमास्रमुत्सृजन्,

उवाच भरतं वाक्यं धर्मात्मा धर्मसंहितम् ।
किं करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते ॥

कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ।
किं नु तस्य मया कार्यं दुर्जातेन महात्मनः ॥

यो मृतो मम शोकेन मया चापि न संस्कृतः ।
अहो भरत सिद्धार्थो येन राजा त्वयानघ ॥

शत्रुघ्नेषु च सर्वेषु प्रेतकृत्येषु संस्कृतः ।

अनेन पितुः चरमसंस्कारकर्तैव धन्य इति सूचितम् । सोऽहमिदानीं लोकान्तरगते पितरि,

निवृत्तवनवासोऽपि अयोध्यां गन्तुं नोत्सहे ।

हा जनकनन्दिनि श्वशुरेण विना कृतासि । लक्ष्मण

त्वमपि पितृविहीनः कथमिदानीं वर्तिष्यस इति सकरुणं परिदेवयमानं रामभद्रमवलोक्य तदनुजाः,

अब्रुवन् जगतीभर्तुः क्रियतामुदकं पितुः ।

अथ श्वशुरवियोगेन खिद्यमानमानसां सीतां सान्त्वयित्वा,

आनयेङ्गुदिपिण्याकं चीरमाहर चोत्तरम् ।
जलक्रियार्थं तातस्य गमिष्यामि महात्मनः ॥

सीता पुरस्ताद्व्रजतु त्वमेनामभितो व्रज ।
अहं पश्चाद्गमिष्यामि गतिर्ह्येषा सुदारुणा ॥

इति रामो लक्ष्मणमभिधाय अनुजैः सह मन्दाकिनीतीरपरिसरमभिससार। अत्र अपः स्नानार्थं गच्छतायं विधिः सूचितः । तथा चापस्तम्बः— 'उदकोपस्पर्शने आरोहणे इति सर्वत्र कनिष्ठकप्रथमा अनुपूर्वा इतरे स्त्रीयोगे' इति ।

ते तु तीर्थं ततः कृच्छ्रादुपगम्य यशस्विनः ।
सिषिचुस्तूदकं राज्ञे तत्रैतत्ते भवत्विति ॥

प्रगृह्य च महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन्वचनमब्रवीत् ॥

एतत्ते राजशार्दूल विमलं तोयमक्षयम् ।
पितृलोकं गतस्यार्थे मद्दत्तमुपतिष्ठतु ॥

इति यथाविधि जलाञ्जलिमदात् । तं विधिमाहापस्तम्बः— 'एकवाससो दक्षिणामुखाः सकृदुपमज्ज्योत्तीर्य वासः पीडयित्वोपविशन्ति । एवं त्रिस्तत्प्रत्ययं तिलमिश्रमुदकमुत्सिञ्चेत्' इति । अत्र कृतौर्ध्वदेहिकस्यापि पितुः रामेण निवापोदकदानात् अन्यैरपि देशान्तरस्थैः पुत्रैः कृतौर्ध्वदेहिकस्यापि पितुः निवापोदकदानादि कर्तव्यमिति सूचितम् । तथा श्लोकगौतमः— 'दहनादिसपिण्डान्तं कनिष्ठाद्यैः कृतं यदि । पित्रोर्देशान्तरज्येष्ठस्तच्छ्रुत्वा श्रवणाद्दतः ॥ कुर्यात्क्षौरादि शोके वा रात्रौ श्रुत्वा पराहतः । उत्पकेशो दशाहं तं दद्यात्त्रिंशाहमेव वा ॥ तिलोदान्युत्पकेशादि ततः कुर्यात्' इति ।

ततो मन्दाकिनीतीरात्प्रत्युत्तीर्य स राघवः ।
पितुश्चकार तेजस्वी निवापं भ्रातृभिः सह ॥

ऐङ्गुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे ।
न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् ॥
इदं भुङ्क्ष्व महाराज प्रीतो यदशना वयम् ।

ननु अनेन वचनेन स्नानसमनन्तरमेव रामेण पिण्ड-दानं कृतमिति प्रतिपादितम् । तत्किं दशाहमध्ये कर्तव्य-पिण्डदानात्मकम्, उत सपिण्डीकरणात्मकम्? नाद्यः, दशाहमध्यकर्तव्यपिण्डदानस्य कृतौर्ध्वदेहिकविषये पुनरा-वृत्तिप्रतिषेधात् । तथा च स्मृत्यन्तरे— 'मुख्यकर्ता विदे-शस्थः कालेऽकाले श्रुतो यदि । तिलवारि प्रकुर्वीत पि-ण्डदानं विवर्जयेत् ॥' काले एकोद्दिष्टसमये अकाले तद-नन्तरम् इति । न द्वितीयः— 'पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥' इति पैठीनसिवचनपर्यालोचनया श्रवणदिनप्रभृतिदशाहपर्यन्तमाशौचसत्त्वेन 'सर्वेषामेव व-र्णानामाशौचान्ते सपिण्डनम्' इति कात्यायनवचनपर्यालो-चनया आशौचान्ते कर्तव्यस्य सपिण्डीकरणस्य श्रवण-दिन एव अशुद्धेन कर्तुमशक्यत्वात् इति चेन्न । सपिण्डी-

करणप्रतिपादक एवायं पिण्डशब्दः। न च शुद्ध्यनन्तरकर्तव्यस्य सपिण्डीकरणस्य श्रवणदिन एव कथमनुष्ठानमिति वाच्यम्। व्रतिनः क्रियावतो राज्ञो रामभद्रस्य सद्यः शुद्धत्वेन श्रवणदिने स्नानसमनन्तरमेव कर्तुमशक्यत्वात्। तथा च दक्षः— 'गदार्थं यो विजानाति वेदमङ्गैः समन्वितम्। संकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकम्। राजर्त्विग्दीक्षितानां च बाले देशान्तरं तथा॥ व्रतिनां सत्रिणां चैव सद्यः शौचं विधीयते।' इति। दशाहसूतकं तु 'अस्नात्वा च जपो हुत्वा भुङ्क्ते दत्त्वा च यो द्विजः। एवंविधस्य विप्रस्य दशाहं सूतकं भवेत्॥' इति वचनात् स्नानाद्यभाववत्पुरुषविषयम्। 'वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा' इत्युपक्रम्य 'कलौ युगे त्विमान्धर्मान् वर्ज्यानाहुर्मनीषिणः। दशाह एव विप्रस्य सपिण्डमरणे सति॥ कल्पान्तराणि कुर्वाणः कलौ व्यामोहकिल्बिषी।' इति हारीतः। 'न कर्तव्यं न कर्तव्यं सद्यः संकोचनं कलौ।' इत्यादिवचनावगतोऽयं संकोचनिषेधस्तु कलियुगविषयः। परमपुरुषस्य कल्याणचरित्रस्य रामभद्रस्य तु त्रेतायुगवर्तित्वात्सद्यः शुद्धिर्भवत्येव। नन्वेवमपि भर-

तेन प्रागेव सपिण्डीकरणस्य कृतत्वेन कथं रामेण पुनः करणमिति चेन्न । 'यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु । तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः' इत्यादिशास्त्रपर्यालोचनया देशान्तरस्थेन ज्येष्ठपुत्रेण कृतौर्ध्वदेहिकस्यापि पितुः प्रेतशब्दं विहाय पुनः सपिण्डीकर्तव्यत्वात् । न च सपिण्डीकरणस्य ब्राह्मणभोजनसापेक्षत्वात् इह च पिण्डदानमात्रश्रवणात् कथमिदं सपिण्डीकरणरूपमिति वाच्यम्, उदाहृतवचनपर्यालोचनया सपिण्डीकरणस्यावश्यकर्तव्यत्वेन तदनुरोधात् । अत्रत्यपिण्डदानशब्दस्य ब्राह्मणभोजनोपलक्षकत्वसंभवात्,

ऐङ्गुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे ।
न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् ॥
यदन्नः पुरुषो लोके तदन्नास्तस्य देवता ॥

इति । अनेन पुरुषस्य वर्णाश्रमोचितं यादृशमन्नं लब्धं स्वादु वा अस्वादु वा तदेव देवतातिथिपितृभ्यो देयमिति सूचितम् । देवताशब्दश्च देवपितृमनुष्यसाधारणसंप्रदानमात्रपरः अत्रैव पिण्डदानोद्देश्ये पितरि देवताशब्दप्रयो-

गात् । तथा तैत्तरीये वैश्वदेवग्रहब्राह्मणे 'एतस्मिन्वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते' इत्यनुक्रान्तेषु मनुष्यादिषु वाक्यशेषे 'एतावतीर्वै देवताः ताभ्य एवैनं सर्वाभ्यो गृह्णाति' इति देवताशब्दप्रयोगात् मनुष्यादि-साधारणो देवताशब्दः । तथा च मनुः— 'यज्ञदत्तयेत्ततो दद्यात् बलिभिक्षां च शक्तितः । अम्मूलफलभिक्षाभिर-र्चयेदाश्रमागतान् ॥' इति । यज्ञः पुरुषस्तु तच्छेष इत्यर्थः । तथा च गीतासु— 'इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् ॥' इति । देवलोऽपि —'देवार्थे ब्राह्मणार्थे वा पचमानो न लिप्यते । अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ॥ नात्मार्थं पचयेदन्नं नात्मार्थं घातयेत्पशून् ।' इति । मनुरपि— 'भैक्षमन्नं गृहस्थस्य वर्णिनो भैक्षमेव च । आत्मार्थे पक्वमन्नं च स्वमांससदृशं भवेत् ॥' इति । आपस्तम्बोऽपि— 'अ-तिथीनेवाग्रे भोजयेद्बालान्वृद्धान्रोगसंबन्धान् स्त्रीश्चान्त-र्वत्नीः' इति 'शेषभोज्यतिथीनां स्यान्न रसान्गृहे भुञ्जीत

नावशेषमतिथिभ्यो नात्मार्थमभिरूपमन्नं पाचयेत्' इति च। बोधायनोऽपि—'भोजयेदतिथीनन्तर्वत्नीरनन्तरं बालवृद्धांस्तथा दीनान्व्याधितांश्च विशेषतः। अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्ते यथाविधि॥ भुञ्जानोऽपि न जानाति न स भुङ्क्ते न भुज्यते। पितृदेवतभृत्यानां मातापित्रोर्गुरोस्तथा॥ वाग्यतोऽथ समश्नीयादेष धर्मो विधीयते।' स एव—'न त्वेव कदाचिददत्त्वा भुञ्जीत' अथाप्यत्रान्नगीतौ श्लोकावुदाहरन्ति—'यो मामदत्त्वा पितृदेवताभ्यो भृत्यातिथीनां च सुहृज्जनस्य। संपन्नमश्नन्विषमत्ति मोहात्तमद्म्यहं तस्य च मृत्युरस्मि॥ हुताग्निहोत्रः कृतवैश्वदेवः पूज्यातिथीन्भृत्यजनावशिष्टम्। तुष्टः शुचिः श्रद्दधदत्ति यो मां तस्यामृतं स्यां स च मां भुनक्ति॥' याज्ञवल्क्योऽपि—'अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम्। स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मनः॥' इति। बृहदारण्यके—'एकमस्य साधारणमितीदमेवास्य तत्साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमाद्यते स एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रं ह्येतत्' इति। तथा आग्रयणे श्रुतिः—'आनीतो वा एष देवानां य आहिताग्निरदन्नस्य

देवा अन्नं यदकृत्वाग्रायणं नवस्याश्नीयात्। देवेभ्यो भागं प्रतिकल्प्यमद्यादार्तिमाच्छेंत्' इति। बोधायनोऽपि—'अनाहिताग्नेराग्रयणं कृत्वा वैश्वदेवं कृत्वा ब्राह्मणेभ्यो दत्त्वा प्राशनमेवमेतेन सर्वासामौषधीनामाग्रयणं व्याख्यातम्, अथ फलानां मूलानां भक्ष्याणां ब्राह्मणेभ्यो दत्त्वा प्राशनमेव पुष्पाणाम् अन्येषां च नवानां ब्राह्मणेभ्यो दत्त्वोपयोगः' इति। अथ वा यादृशमन्नं मृष्टमश्नाति पुरुषः देवता अप्यविशेषेण तदन्नाः न तत्र भेदः कार्य इति सूचितम्। तथा च देवलः— 'मृष्टमन्नं स्वयं भुक्त्वा कदन्नन्तु ततो नरः। ब्राह्मणं भोजयेन्मूर्खो नरके चिरमावसेत्॥' इति। वसिष्ठोऽपि— 'मांसमन्नं तथा शाकं गृहे यच्चोपपादितम्। न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत्॥' इति। देवलः— 'अघृतं भोजयद्विप्रं यो गृहे सर्पिषि सर्पिषी। परत्र निरयं घोरं गृहस्थः प्रतिपद्यते॥' इति। मनुः— 'नैव स्वयं तदश्नीयादतिथिं यन्न भोजयेत्। धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनम्॥' इति। संवर्तः—'यस्त्वेकपङ्क्त्या विषमं ददाति स्नेहाद्भयाद्वा यदि वार्थहेतोः। क्रूरं दुराचारमनात्मवन्तं ब्रह्मघ्नमेनं मुनयो

वदन्ति ॥ पङ्क्तिभेदी पृथक्पाकी नित्यं वै यतिनिन्दकः। ब्राह्मणे निन्दकश्चैव आदेशी वेदविक्रयी ॥ षडेते ब्रह्महन्तारो गतिस्तेषां न विद्यते।' इति। मार्कण्डेयपुराणे— 'एकपङ्क्त्या च ये विप्रमथवेतरवर्णजाम्। विषमं भोजयन्तीह विड्भुजस्त इमे नृप ॥' इति। अथ वा पुरुषस्य यदप्रतिषिद्धमन्नं तदेव देवताभ्यो देयमिति सूचितम्। तथा च भरद्वाजः— 'यदार्याणामभोजनीयं न तेऽन्नं देवान्यजेत' इति। कात्यायनः—'शिष्टभक्ष्यप्रतिषिद्धं दुष्टम्' इति। आपस्तम्बोऽपि— 'यदार्याणामभोजनीयं स्यात् न तेन यजेत' इति तत्र अत्र भक्षणप्रतिषिद्धं जातिदुष्टं, क्रियादुष्टं, संसर्गदुष्टं, निमित्तदुष्टं, कालदुष्टं, परिग्रहदुष्टं, पर्युषितम् इति सप्तविधम्। तत्र जातिदुष्टस्योदाहरणमाह विष्णुपुराणे— 'राजमाषानणूंश्चात्र मसूरांश्च विवर्जयेत्।' मनुः— 'आविकं संधिनीक्षीरं विवत्सायाश्च गोःपयः। आरण्यानां च सर्वासां मृगीणां महिषीर्विना ॥' इति। शङ्खः— सर्वासां द्विस्तनीनां क्षीरमभोज्यमाजवर्ज्यम्।' इति। आपस्तम्बोऽपि— 'सर्वं मद्यमपेयं तथैलकं पय उष्ट्रीक्षीरमृगीक्षीरसंधिनीक्षीर-

यमसूक्षीराणीति धेनोश्चानिर्दशायास्तथा कीलालौष-
धीनां च करञ्जपलण्डुपरालीका यच्चान्यत्परिचक्षते क्या-
कभोज्यमिति हि ब्राह्मणमेकखुरोष्ट्रगवयग्रामसूकरशरभ-
गवां कुक्कुटो विकिराणां प्लवः प्रतुदां क्रव्यादो हं-
सभासचक्रवाकसुपर्णाश्च कुञ्चक्रौञ्चवार्ध्राणसलक्ष्मण-
वर्जं पञ्चनखानां गोधाकच्छपश्वाविद्‌चर्यकखड्गशशपू-
तिखषवर्जमभक्ष्यश्चेटो मत्स्यानां सर्पशीर्षी मृदुरः क्र-
व्यादो ये चान्ये विकृता यथा मनुष्यशिरसः' इति।
संधिनी गर्भिणी कीलालौषध्यः सुरासंधानद्रव्यं करंज-
पलंडुपलालीकाः रक्तश्वेतकृष्णलशुनं क्याकुश्छत्राकम्।
तथा च मनुः– 'लशुनं गृञ्जनं चैव पलण्डुं कवकानि च।
अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च। लोहितान्वृ-
क्षनिर्यासान्व्रश्चनप्रभवांस्तथा॥ शेलुं गव्यं च पीयूषं
प्रयत्नेन च वर्जयेत्।' इति। धर्मसुधानिधौ— 'अलाबुं
गृञ्जनं चैव पलण्डुं पिण्डमूलकम्। गान्धारककरम्भाणि
लवणान्यौषराणि च॥ आरक्तानपि निर्यासान्प्रत्यक्षलव-
णानि च। व्रश्चनप्रभवं सर्वं हिङ्गुद्रव्यं विनैव तु॥
भूतृणां शिग्रुकां चैव ब्राह्मणो नैव भक्षयेत्।' इति।

आपस्तम्बः— 'विलपनं मथितं पिण्याकं मधु मांसं च वर्जयेत्कृष्णधान्यं शूद्रान्नं ये चान्ये नाश्यसंमता हविष्य-मनृतं क्रोधं येन च क्रोधयेत् । स्मृतिमिच्छन्यशो मेधां स्वर्गं पुष्टिं द्वादशैतानि वर्जयेत्' इति । गौतमः— 'उद्धृतस्नेहविलयनमथितपिण्याकप्रभृतीनि चात्तवीर्याणि नाश्नीयात् ।' इति । मनुः— 'छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् । पलण्डुं गृञ्जनं चैव मत्स्यान् जग्ध्वा पतेद्द्विजः ॥ अमत्यैतानि षड्जग्ध्वा कृच्छ्रं चान्द्रायणं चरेत् । यतिचान्द्रायणं चापि शेषेषूपवसेदहः ॥' इति । देवलः — 'कण्डूरं श्वेतवृन्ताकं कूष्माण्डं च विवर्जयेत् । ये भक्षयन्ति पिण्याकं ते वै निरयगामिनः ॥' इति । संग्रहे— 'तण्डुलाम्भःकणं तद्वदन्नविस्रावमेव च । दग्धशाकोदनादीनि सर्वथा परिवर्जयेत् ॥' इति । क्रियादुष्टत्वे, आपस्तम्बः— 'पदा वोपहतं सिचा वा शुना वा पोत्रेण वा स्पृष्टं मनुष्यैरवघ्रातम्, अन्यैर्वा मेध्यैः' इति । मनुः— 'भ्रूणघ्नावेक्षितं चैव संघुष्टं चाप्युदक्यया । पतत्रिणावलीढं च शुना संस्पृष्टमेव च ॥ गवा चान्नमवघ्रातं घुष्टान्नं च विशेषतः ।' इति । आपस्तम्बः— 'ना-

पणीयमन्नमश्नीयात्तथा रसानाम्, आममांसमधुलवणानीति परिहाप्य' इति। बोधायनः—'ओदनं तु पुनः पक्वं नारिकेलरसं तथा। तथा तोयमभूमिष्ठं ब्राह्मणो नैव भक्षयेत्॥' इति। आपणीयनिषेधस्यापवादमाह शङ्खः—'अपूपाः सक्तवो धानास्तक्रं दधि घृतं मधु। एतत्पण्येषु भोक्तव्यं भाण्डलेपो न चेद्यदि।' संसर्गदुष्टे आपस्तम्बः—'अप्रयतेनोपहृतमप्रयतं न त्वभोज्यं अप्रयतेन तु शूद्रेणोपहृतमभोज्यं यस्मिंश्चान्ने केशः स्यादन्यद्वामेध्य अमेध्यैरवमृष्टं कीटो वाऽमेध्यसेवी मूषकलाङ्गवेति। मूषकला मूषिकापूरीषं अङ्गं वा पुच्छादि। मनुः—'मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन। केशकीटावपन्नं च पदास्पृष्टं च कामतः॥' इति। स्मृतिसारे—'क्षीरे तु लवणं दत्तमुच्छिष्टेऽपि च यद्घृतम्। स्नानरजकतीर्थेषु ताम्ये गव्यं सुरासमम्॥' इति। वृद्धहारीतः—'संस्कांस्यं नालिकेलाम्बु कांस्ये च रसमैक्षवम्। ताम्रपात्रे घृतं गव्यं क्षीरं च लवणान्वितम्॥ घृतं लवणसंयुक्तं सुराकल्पं विवर्जयेत्। प्रत्यक्षलवणं नाद्यात् अन्नं परगृहागतम्॥' इति। स्मृत्यन्तरे—'नालिकेरोदकं कांस्ये

ताम्रे पात्रे च संस्थितम् । मधु ताम्रस्थितं गव्यं मलतुल्यं घृतं विना ॥' इति । संसर्गस्यापवादमाह मनुः— 'पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् । केशकीटावपन्नं च मृत्प्रक्षेपेण शुध्यति ॥' इति । बोधायनः— 'एवं सिद्धहविषां महतांश्ववायसप्रभृत्युपहतानां तं देशं पुरुषान्नमुत्सृज्य पवमानः सुवर्जन इत्येतेनानुवाकेनाभ्युक्षणम् ।' इति । निमित्तदुष्टे आपस्तम्बः— 'यस्य कुले म्रियेत न तत्रानिर्दशभोक्तव्यं तथामुत्थितायां सूतिकायामन्तःशवे च' इति । अन्तःशवे ग्रामे शवे सति । स एव 'हिंसार्थेनासिना मांसं छिन्नमभोज्यम् ।' इति । उशना— 'यस्तेषामन्नमश्नाति सकृदेवापि कामतः । तदाशौचनिवृत्तौ तु स्नानं कृत्वा विशुध्यति ॥ यावत्तदन्नमश्नाति दुर्भिक्षाभिहतो नरः । तावन्त्यहान्यशुद्धः स्यात्प्रायश्चित्तं ततश्चरेत् ॥' इति । कालदुष्टे मनुः— 'वीर्यहानिर्यशोहानिः प्रज्ञाहानिस्तथैव च । भवेद्यस्मात्ततो रात्रौ धात्री यत्नेन वर्जयेत् ॥ धानाः खादेन्न च तथा दधिसक्तूंस्तथा निशि । सर्वं च तिलसंबन्धं नाद्यादस्तमिते रवौ ॥ प्रतितिक्तार्द्रकं दधि च श्राणां तिलशाकानि निश्यदन् ॥

त्यज्यते रूपवाक्श्रीभिः पुष्पितक्षीरताद्यथा ।' इति । स्मृत्यन्तरे— 'भानुवारे दिवारात्रं सप्तम्यां च तथैव च । धात्रीफलं नरः खादन्नलक्ष्मीको भवेत्सदा ॥' इति । स्मृतिसारे— 'आमलक्याः फलं चैव जम्बीरं तिन्त्रिणीफलम् । प्रज्ञाप्रतापलक्ष्मीवान्सदैतद्वर्जयेन्निशि ॥' इति । अस्यापवादमाह, आग्नेयपुराणे— 'कल्याणे चोत्सवे विष्णोर्ब्राह्मणानां समागमे । तिथिवारनिषिद्धं यत्र दोषस्तस्य भक्षणे ॥' इति । परिग्रहदुष्टे आपस्तम्बः— 'चिकित्सकस्य मृगयोः शल्यकृन्तस्य पाशिनः । कुलटायाः षण्ढकस्य च तेषामन्नमनाद्यम् ॥' इति । स एव— 'प्रकृत्या ब्राह्मणस्य भोक्तव्यमिति प्रायश्चित्तवति प्रायश्चित्तं कर्म न सेवते । सङ्घान्नमभोज्यं परिक्रुष्टं च सर्वेषां च शिल्पजीविनाम् ॥ ये शस्त्रमाजीवन्ति ये चाधिं भिषग्वार्धुषिको दीक्षितोऽक्रीतराजकोऽग्नीषोमीयसंस्थायामेव हुतायां वा वपायां दीक्षितस्य भोक्तव्यं यज्ञार्थे वा निर्दिष्टे शेषाद्भुञ्जीरन्निति हि ब्राह्मणम् । क्लीबो राज्ञां प्रेषकरोऽहविर्याजी चार्यविधिना च प्रव्रजितो यश्चाग्नीनपास्यति यश्च सर्वान्विवर्जयते सर्वान्नी

च श्रोत्रियो निराकृतिर्वृषलीपतिर्मत्त उन्मत्तो बद्धोऽणिकः प्रत्युपविष्टो यश्च प्रत्युपवेशयते तावन्तं कालम्' इति । सङ्घान्नं गणान्नं, परिकुष्टं उच्चैराक्रुष्टं, आधिः स्वगृहे परान्वासयित्वा तेभ्यो भृतिग्रहणं, अहविर्याजी रक्तादिना याजी, चारी चरः, अविधिना प्रव्रजितः अविधिना संन्यासं कृतवतः, निराकृतिः निःस्वाध्यायः, अणिकः पुत्राच्छ्रुतग्राही। अस्यापवादमाह गौतमः— 'एधोदकयवसमूलफलमधु अभयमभ्युद्यतशय्यासनावसथयानपयोदधिशफरिप्रियङ्गुस्रक्मार्गशाकान्यप्रणोद्यानि सर्वेषां पितृदेवगुरुभृत्यभरणे चान्यत् ।' इति । बोधायनः— 'खलक्षेत्रेषु यद्धान्यं कूपवापीषु यज्जलम् । अभोज्यादपि तद्भोज्यं यच्च गोष्ठगतं पयः ॥' इति । पर्युषिते आपस्तम्बः— 'कृतान्नं पर्युषितमखाद्यापेयानाद्यं शुक्तं च ।' मनुः— 'शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च । स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥' गौतमः— 'भावदुष्टं शुक्तं केवलमदधि न भोज्यमित्यर्थः । पर्युषितापवादमाह मनुः— 'यत्किंचित्स्नेहसंयुक्तभक्ष्यभोज्यमगर्हितम् । तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् ॥

चिरस्थितमपि त्वाद्यं स्नेहयुक्तं द्विजातिभिः । यवगोधूमकं सर्वं पयसश्चैव विक्रियः।' इति। याज्ञवल्क्यः– 'अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् । अस्नेहा अपि गोधूमयवगोरसविक्रिया ॥' इति । आपस्तम्बः— 'फाणितपृथुकतण्डुलकरम्भभरुजसक्तुशाकमांसपिष्टक्षीरविकारौषधिवनस्पतिमूलफलवर्जं शूक्तं चापरयोगम् ।' इति । फाणितः इक्षुरसः करम्भः दधिसक्तुसमूहः भरुजः भृष्टयवः क्षीरविकारो दध्यादि । गौतमः—'पर्युषितमशाकभक्तस्नेहमांसमधूनि' इति। शङ्खः—ऋजीषपक्वं भक्ष्यं स्यात्सर्पियुक्तमिति स्थितिरिति । एवमादिप्रतिषिद्धभक्षणे दोषमाह मनुः— 'अनभ्यासेन वेदानीमाचारस्य च वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ' इति । व्यासोऽपि— 'अभक्ष्यभक्षणाच्चित्तमशुद्धं भवति स्वतः । तस्मादभक्ष्यं यत्नेन दूरतः परिवर्जयेत् ॥' इति । अभक्षनिवृत्तौ फलमाह स एव— 'अभक्ष्यस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् । आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः ॥' इति । तदनु पर्णशालाभ्यर्णमागम्य सकरुणं विलपतां तेषां भ्रातृणां गिरिवरगुहासु प्रतिध्वनिसमा-

कर्णनेन विदितभरतसमागमवृत्तान्तेषु सैनिकेषु कतिचन गजवाजिरथैरन्ये नरयानैरपरे पादचारेणैव त्वरिततरं समागम्य पर्णशालाभ्यर्णमध्यासीनं रामचन्द्रमभिगम्य सबाष्पकण्ठा बभूवुः । तानपि स्वागतासनपरिष्वङ्गदानादिना यथाधिकारं परिगृह्य रामः समाश्वासयामास ॥

त्र्यधिकशततमे— अथ भरताज्ञया कुलपुरोहितं वसिष्ठं पुरस्कृत्य रामचन्द्रदर्शनतर्षया द्रुततरमभिचङ्क्रमतीषु राजपत्नीषु संजातशोकशल्या कौसल्या सुमित्रामिदमवोचत्— 'अयि सुमित्रे रामभद्राय अनुदिनमुदकमाहरतो लक्ष्मणस्येयं पदपङ्क्तिः, अयमसौ इङ्गुदीपिण्याकमयो दक्षिणाग्रेषु कुशेषु रामभद्रेण प्रत्तः पिण्डः, इयमग्रे लक्ष्मणनिर्मिता विशाला पर्णशाला, अयमग्रे परिपूर्णचन्द्रवदनो मन्नयनानन्दकरो रामचन्द्रः, तदेहि गच्छाव त्वरिततरम्' इति परिक्रम्य सकलसपत्नीभिः सह रामसमीपमाजगाम । अथ मातृदर्शनसमनन्तरमेव ससंभ्रममुत्थाय यथाक्रममभिवादयन्तं रामभद्रम्,

ताः पाणिभिः शुभस्पर्शैर्मृद्वङ्गुलितलैः शुभैः ।
प्रममार्जू रजः पृष्ठाद्रामस्यायतलोचनाः ॥

तदनु कृताभिवादने लक्ष्मणे समनन्तरमाभिवन्दमानां जनकनन्दिनीमवलोक्य कौसल्या सकरुणमिदमब्रवीत्—

विदेहराजस्य सुता स्नुषा दशरथस्य च ।
रामपत्नी कथं दुःखं संप्राप्ता निर्जने वने ॥
मुखं ते प्रेक्ष्य मां शोको दहत्यग्निरिवाश्रयम् ।
भृशं मनसि वैदेहि व्यसनारणिसंभवः ॥

अथ कुलपुरोहितं वसिष्ठमप्यभिवाद्य तेन सहैव समुपविष्टे रामभद्रे मन्त्रिभिः पुरप्रधानैः सैनिकेतरैरपि धर्मप्रधानपुरुषैः सह भरतोऽपि समुपाविशत् ॥ चतुरधिकशततमे— तदनु गुरुवत्सलं वक्तुकामं भरतमवगम्य विनिमित्तोऽयमखिलबलेन सहागमनसंभ्रमः, कुतो वा प्राज्यं राज्यं परित्यज्य कृष्णाजिनजटाधारणमिति वदन्तं रामचन्द्रं प्रति विनयेन प्राञ्जलिर्भरतः समुदाजहार । आर्य पापसमाचारया कैकेय्या वञ्चितो दशरथः स्वयशोहरं कर्म कृतवान् । अतः सेयमनार्या राज्यफलमप्राप्य स्वकर्मफलमनुभविष्यति । भवानपि पितृपैतामहीं महीं परिपालयितुं प्रसादमभिकाङ्क्षन्तीनां प्रकृतीनामना-

थानां मातॄणां च मनोरथान्पूरयितुं दासभूतं मां च दयया रक्षितुं स्वात्माभिषेचनेन प्रसादं कर्तुमर्हसीत्यभिधाय पदयोर्निपपात ।

तं मत्तमिव मातङ्गं निश्वसन्तं पुनः पुनः ।
भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥

कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ।
राज्यहेतोः कथं पापमाचरेत्त्वद्विधो जनः ॥

न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन ।
न चापि जननीं बाल्यात्त्वं गर्हितुमर्हसि ॥

कामकारो महाप्राज्ञ गुरूणां सर्वदानघ ।
उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥

वने वा चीरवसनं सौम्य कृष्णाजिनाम्बरम् ।
राज्ये वापि महाराजो मां वासयितुमीश्वरः ॥

यावत्पितरि धर्मज्ञ गौरवं लोकसत्कृतम् ।
तावद्धर्मभृतां श्रेष्ठ जनन्यामपि गौरवम् ॥

त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम् ।
वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥

एवं कृत्वा महाराजो विभागं लोकसंनिधौ ।
आदिश्य स महातेजा दिवं दशरथो गतः ॥

स च प्रमाणं धर्मात्मा राजा लोकगुरुस्तव ।
पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि ॥ इति ॥

पञ्चाधिकशततमे— इति सशोकमभिभाषमाणानां तेषामतिखेदेन सा रात्रिरत्यवर्तत । प्रभातायां रजन्यामुदिते च दिनकरमण्डले निर्वर्तितजपहोमादिनैयत्यिकविधिर्भरतः सविनयमुपसृत्य राममद्रमेवमुवाच—

सान्त्विता मामिका माता दत्तं राज्यमिदं मम ।
तद्ददामि पुनस्तुभ्यं भुङ्क्ष्व राज्यमकण्टकम् ॥

खर इव जात्यश्वस्य पतत्रीव पतगराजस्य प्रबलरयभिन्नजलसेतुसंनिभराज्यखण्डसंरक्षणविचक्षणस्य भवतो गतिमहमनुगन्तुमशक्तोऽस्मि ।

सुजीवं नित्यशस्तस्य यः परैरुपजीव्यते ।
राम तेन तु दुर्जीवं यः परानुपजीवति ॥

अनेन परानुपजीविनः बहूपजीव्यस्य पुरुषस्य जीवनं

श्लाघ्यमित्युक्तम् । तथा च दक्षः— 'सुजीवति स एवैको बन्धुभिश्चोपभुज्यते । जीवन्तोऽपि मृतास्त्वन्ये पुरुषाः स्वोदरंभराः' इति । तदतिप्रयत्नसंवर्धितः सुपुष्पितस्तरुरिव न भवान्फलमविदर्शयन् इष्टजनान् संतापयितुमर्हति । तदधुनैव च तुरगबलपरिवृतः स्वनगरमभिगम्यात्मानमभिषेचयेति नानाविधनयवचनशतानुनीतोऽपि पित्राज्ञापरिपालनैकतानमानसो रामचन्द्रः तमेवम् ,

नात्मनः कामकारोऽस्ति पुरुषोऽयमनीश्वरः ।
इतश्च परतश्चैनं कृतान्तः परिकर्षति ॥

अनेन पुरुषः स्वेच्छया न कर्म करोति किं तु दैवाधीन एवेत्युक्तम् । तथा चोद्योगपर्वणि— 'जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥' इति ।

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥

अत्र निचयो वृद्धिः, समुच्छ्रयः औन्नत्यम्, संयोगः

इष्टवस्तुभिः, जीवितं जीवनम्, एतेषां चतुर्णामन्ते क्ष-याद्यवश्यंभाव उक्तः ।

यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् ।
अनेन पतनान्ताः समुच्छ्रया इत्ययमंशो व्याख्यातः ।
एवं नरस्य जातस्य नान्यत्र मरणाद्भयम् ॥

आत्मानमनुशोच त्वं किमन्यमनुशोचसि ।
आयुस्ते ह्रीयते यस्य स्थितस्य च गतस्य च ॥

नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते रवौ ।
आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम् ॥
अनेन मरणान्तं च जीवितमित्ययमंशो व्याख्यातः ।

यथा काष्ठं च काष्ठं च समेयातां महार्णवे ।
समेत्य च व्यपेयातां कालमासाद्य कंचन ॥

एवं भार्याश्च पुत्राश्च ज्ञातयश्च धनानि च ।
समेत्य व्यवधावन्ति ध्रुवो ह्येषां विनाभवः ॥
अनेन संयोगा विप्रयोगान्ता इत्ययमंशो व्याख्यातः ।

एवं पूर्वैर्गतो मार्गः पितृपैतामहो ध्रुवः ।
तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ॥

एवं संक्षेपविस्तराभ्यां प्रपञ्चितेषु पूर्वैरप्यनतिक्रमणीयेषु निचयादिषु प्राप्तेषु हर्षविषादादिकं न कर्तव्यमित्युक्तम् । तथा च गीतायाम्—'अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि । अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्तनिधनान्येव तत्र का परिदेवना' इति । एवं पूर्वैर्गतो मार्गः पितृपैतामहो ध्रुवः । तमापन्नः कथं शोचेत्यस्य स राजापि विहितदक्षिणान् अनेकमखानाहृत्य अर्थिसार्थसमीहितप्रपूरणेन च निरतिशयं धर्मं संपाद्य बान्धवमित्रभृत्यादिस्वेष्टजनानपि समुचितभाग्यप्रदानोपचारवचनशतैः समाहितान्तरङ्गान्विधाय परिपाल्य च पुत्रनिर्विशेषं प्रकृतीः ब्रह्मलोकनिवासिनीं दैवीं संपदमवाप ।

तं तु नैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति ।
त्वद्विधो मद्विधश्चापि श्रुतिमान्बुद्धिमत्तर ॥

एते बहुविधाः शोका विलापरुदिते तथा।
वर्जनीया विशेषेण सर्वावस्थासु धीमता॥

न मया शासनं तस्य त्यक्तुं न्याय्यमरिंदम।
तत्त्वयापि सदा मान्यं स वै बन्धुः स नः पिता॥

तदधुना पितृवचनपरिपालनमेव गरीयान्धर्म इति निश्चित्य भवता मया च राज्यपरिपालनं दण्डकारण्यवासश्च कर्तव्यः।

धार्मिकेणानृशंसेन नरेण गुरुवर्तिना।
भवितव्यं नरव्याघ्र परलोकं जिगीषता॥

तदधुनैव सहसा विनिवर्तस्वेति बभाषे॥ षडधिकशततमे—तदनु तदनुजो भरतस्तमेवमवादीत्, सकलवृद्धजनोपदेशनिरस्तसमस्तसंशयस्य निखिलनिगमागमविचाराचारां धर्मसमृद्धां गिरमुदाहरतो भवतो दूरत एव दुःखलेशवार्तापि—

यथा मृतस्तथा जीवन्यथासति तथा सति।
यस्यैष बुद्धिलाभः स्यात्परितप्येत केन सः॥

अनेन सर्वसमदर्शिनः क्वापि परितापो न भवतीति सूचितम् ।

धर्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् ।
हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥
कथं दशरथाज्जातः शुद्धाभिजनकर्मणः ।
जानन्धर्ममधर्मिष्ठं कुर्यां कर्म जुगुप्सितम् ॥

तथा प्रियजनसंतोषणाय धर्मविहीनमसदृशमतिनिर्घृणं कर्म कृतवन्तं तातमपि दैवतमिति न परिगर्हामि ।

अन्तकाले हि भूतानि मुह्यन्तीति पुरा श्रुतिः ।
राज्ञैवं कुर्वता लोके प्रत्यक्षा सा श्रुतिः कृता ॥
साध्वर्थमभिसंधाय क्रोधान्मोहाच्च साहसात् ।
तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् ॥
पितुर्हि समतिक्रान्तं पुत्रो यः साधु मन्यते ।
तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥

अनेन पित्रा अन्यथा कृतमपि कुकर्म समीकर्तुरेव पुत्रस्य पुत्रत्वमिति सूचितम् । तथा च बृहदारण्यके— 'सपद्यनेन किंचिदक्ष्णयाकृतं भवति स एतस्मात्पुत्रो

पितॄञ्श्राद्धेऽतिथीनन्नैर्भूतानि बलिकर्मणा ॥' इति। भारतेऽपि— 'यथा मातरमाश्रित्य वर्तन्ते सर्वजन्तवः। तथैव गृहिणं सर्वे वर्तन्त इतराश्रमाः ॥ स्वाध्याये नित्ययुक्तः स्याद्दैवे चैव ह कर्मणि। दैवे कर्मणि युक्तो हि बिभर्तीदं चराचरम् ॥ अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते।वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इति। आदिपर्वण्यपि—'अस्य काव्यस्य कवयो न समर्था विशेषणे। साधोरिव गृहस्थस्य शेषास्त्रय इवाश्रमाः ॥' शान्तिपर्वण्यपि युधिष्ठिरं प्रत्यर्जुनवाक्यम्— 'आश्रमांस्तुलया सर्वान्धृतानाहुर्मनीषिणः। एकतश्च त्रयो राजन्गृहस्थाश्रम एकतः' इति। मोक्षधर्मे— 'तद्धि सर्वाश्रमाणां मूलमुदाहरन्ति गुरुकुलवासिनः परिव्राजका ये चान्ये संकल्पितव्रतनियमधर्मानुष्ठायिनस्तेषामप्यत एव भिक्षाबलिसंविभागा वर्तन्ते। वानप्रस्थानां च द्रव्योपस्कार इति प्रायशः खल्वेते साधवः साधुपथ्योदनाः स्वाध्यायप्रसङ्गिनस्तीर्थाभिगमनदेशदर्शनार्थं पृथिवीं पर्यटन्ति। तेषां प्रत्युत्थानाभिगमनाभिवादनानसूयावाक्प्रदानसुखशय्यासनसुखशयनाभ्यवहारसत्क्रिया चेति। भ-

वति चात्र श्लोकः— 'अतिथिर्यस्य भग्नाशो गृहात्प्रति निवर्तते। स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥' अपि चात्र यज्ञक्रियाभिर्देवताः प्रीयन्ते, निवापादिना पितरो विद्याभ्यासश्रवणधारणेन ऋषयः, अपत्योत्पादनेन प्रजापतिरिति। श्लोकौ चात्र भवतः—वत्सलयाः सर्वभूतेभ्यः श्राव्याः श्रोत्रसुखा गिरः। परितापोपघातश्च पारुष्यं चात्र गर्हितम् । अवज्ञानमहंकारो दम्भश्चैव विगर्हितः । अहिंसा सत्यमक्रोधः सर्वाश्रमगतं तपः ॥ अपि चात्र माल्याभरणवस्त्राभ्यङ्गनित्योपभोगनृत्तगीतवादित्रश्रुति-सुखनयनाभिरामदर्शनानां प्राप्तिर्भक्ष्यभोज्यलेह्यपेयचो-ष्याणामभ्यवहार्याणां विविधानामुपभोगः स्वविहार-संतोषः कामसुखावाप्तिरिति। 'त्रिवर्गगुणनिर्वृत्तिर्यस्य नित्यं गृहाश्रमे । स सुखान्यनुभूयेह शिष्टानां गति-माप्नुयात् ॥ उञ्छवृत्तिर्गृहस्थो यः स्वधर्मचरणे रतः। त्यक्तकर्मसुखारम्भः स्वर्गस्तस्यातिदुर्लभः । इति । विष्णुपुराणेऽपि— 'निवापेन पितॄनर्चयज्ञैर्देवांस्तथाति-थीन् । अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥ बलिकर्मणा च भूतानि वात्सल्येनाखिलं जगत्। प्राप्नोति

लोकान्पुरुषः निजकर्मसमार्जितान् ॥ भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः । ते चाप्यत्रैव तिष्ठन्ति गार्हस्थ्यं तेन वै परम् । वेदाहरणकार्येण तीर्थस्नानाय वै प्रभो । अटन्ति पृथिवीं विप्राः पृथिवीदर्शनाय च । अनिकेता ह्यनाहारा यत्र सायंग्रहास्तु ये । तेषां गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च ॥' इति ।

श्रुतेन बालस्थानेन जन्मना भवतोऽप्यहम् ।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥
अथैतत्पृष्ठतः कृत्वा वनमेव भवानितः ।
गमिष्यति गमिष्यामि भवता सार्धमप्यहम् ॥

इति वदन्पदयोर्निपपात । तदनु तदनुयायिजनोऽपि निखिलजनशुभरतेन भरतेन नानाविधानुनयसप्रणामप्रसादयाचनादिभिः प्रसाद्यमानमपि रामभद्रं पितृवचनपरिपालनैकतानमानसमवलोक्य न यास्ययोध्यामिति दुःखितोऽभवत् स्थिरप्रतिज्ञत्वमवेक्ष्यहर्षितः सप्ताधिकशततमे—केकयवंशसंभूतायां कैकेय्यां राजसत्तमाद्दशरथात् उत्पन्नस्य तव नेदमतिचमत्कारकारि वचनम् । किंतु,

पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् ।
मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ॥

दैवासुरे च संग्रामे जनन्यै तव पार्थिवः ।
संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः ॥

तदधुना तव जनन्या संप्रार्थितो नरेन्द्रः, निखिलमहीमण्डलसंरक्षणाय त्वां नियुक्तवान् मामपि चतुर्दशवर्षाणि वने वासाय ।

सोऽहं वनमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः ।
भवानपि तथेत्येव पितरं सत्यवादिनम् ॥

ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् ।
श्रूयते हि पुरा तात श्रुतिर्गीता यशस्विना ॥

गयेन यजमानेन गयेष्वेव पितॄन्प्रति ।
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥

तस्मात्पुत्र इति प्रोक्तः पितॄन्यत्पाति वै सुतः ।
एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः ॥

तेषां वै समवेतानामपि कश्चिद्गयां व्रजेत् ।

अनेन गयायां श्राद्धकरणमतिप्रशस्तमिति सूचितम् ।

तथा च विष्णुपुराणे— 'गयामुपेत्य यः श्राद्धं करोति पृथिवीपते। सफलं तस्य तज्जन्म जायते पितृतुष्टिदम्॥' इति। तन्माहात्म्यमपि तत्रैव, श्रूयते चापि पितृभिर्गाथा गीता महीपते। इक्ष्वाकोर्मनुपुत्रस्य कलापोपवने पुरा। अपि नस्ते भविष्यन्ति कुले सन्मार्गशीलिनः॥ गयामुपेत्य ये पिण्डान्दास्यन्त्यस्माकमादरात्।' इति। ब्रह्मकैवर्तेऽपि— 'गयाशीर्षे यदा पिण्डं नाम्ना येषां प्रकुर्वते। नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः। तत्राक्षय्यवटो नाम त्रिषु लोकेषु विश्रुतः॥ पितॄणां तत्र वै दत्तमक्षय्यं भवति प्रभो। वटवृक्षं समासाद्य शाकेनाप्युदकेन वा॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता।' इति। उशना अपि— 'गयायामक्षयं श्राद्धं प्रयागेऽमरकण्टके। गायन्ति पितरो गाथां कीर्तयन्ति मनीषिणः। एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः॥ तेषां च समवेतानां यद्येकोऽपि गयां व्रजेत्। गयां प्राप्यानुषङ्गेण यदि श्राद्धं समाचरेत्। तारिताः पितरस्तेन स याति परमां गतिम्॥ वनपर्वण्यपि—शुक्लकृष्णावुभौ पक्षौ गयां यो योऽवसेन्नरः।

पुनात्यासप्तमं राजन्कुलं नास्त्यत्र संशयः । एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥ इति । तत्रैव—तपस्विजनजुष्टां च ततो वेदिं प्रजापतेः । जग्मुः पाण्डुसुता राजन्ब्राह्मणैः सह भारत ॥ ततो महीधरं जग्मुर्धर्मज्ञेनाभिसंस्थितम् । राजर्षिणा पुण्यकृता गयेनानुप्रपद्यते ॥ नगो गयशिरो यत्र पुण्या चैव महानदी । वानीरमालिनी रम्या नदी पुलिनशोभिता । दिव्यं पवित्रकूटं च पवित्रधरणीधरम् ॥ ऋषिजुष्टं सुपुण्यं च तीर्थं ब्रह्मसरोत्तमम् । अगस्त्यो भगवान्यत्र गतो वैवस्वतं प्रति । सर्वासां सरितां चैव समुद्भेदो विशां पते । यत्र संनिहितो नित्यं महादेवः पिनाकधृक् ॥ तत्र ते पाण्डवा वीराश्चातुर्मास्यैस्तथेजिरे । ऋषियज्ञेन महता यत्राक्षय्यवटो महान् । अक्षय्यो देवयजने अक्षय्यं यत्र वै फलम् ॥ ते तु तत्रोपवासांस्तु चक्रुर्निश्चितमानसाः ॥' इति । गयामाहात्म्येऽपि—'यन्नाम्ना पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतम् ॥ शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे । उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥' इति ।

एवं राजर्षयः सर्वे प्रतीता राजनन्दन ।
तस्मात्त्राहि नरश्रेष्ठ पितरं नरकात्प्रभो ॥

त्वं राजा भव भरत स्वयं नराणां
वन्यानामहमपि राजराण्मृगाणाम् ।
गच्छ त्वं पुरवरमद्य संप्रहृष्टः
संहृष्टस्त्वहमपि दण्डकान्प्रवेक्ष्ये ॥

शत्रुघ्नः कुशलमतिस्तु ते सहायः
सौमित्रिर्मम विदितः प्रधानमित्रम् ।
चत्वारस्तनयवरा वयं नरेन्द्रं
सत्यस्थं भरत चराम मा विषादम् ॥

अष्टोत्तरशततमे— वैदिकसार्वभौमोऽपि जाबालिः पिताज्ञया वनं प्रस्थितस्य रामस्य वैदिकमार्गेण निवर्तनोपायमपश्यन् अवैदिकमार्गमेव तदुपायं मन्वानः प्रत्यक्षमेव प्रमाणं देह एव आत्मेति वदतश्चार्वाकस्य मतमवलम्ब्य

उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः ।
साधु राघव मा भूत्ते बुद्धिरेवं निरर्थिका ॥

प्राकृतस्य नरस्येव ह्यार्यबुद्धेर्मनस्विनः।
कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित्॥

यदेको जायते जन्तुरेक एव विनश्यति।
तस्मान्माता पिता चेति राम सज्जेत यो नरः॥

उन्मत्त इति स ज्ञेयो नास्ति कश्चिद्धि कस्यचित्।
यथा ग्रामान्तरं गच्छन्नरः कश्चित्क्वचिद्वसेत्॥

उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि।
एवमेव मनुष्याणां पिता माता गृहं वसु॥

आवासमात्रं काकुत्स्थ सज्जन्ते नात्र सज्जनाः।
पित्र्यं राज्यं परित्यज्य स नार्हसि नरोत्तम॥

आस्थातुं कापथं दुःखं विषमं बहुकण्टकम्।
समृद्धायामयोध्यायामात्मानमभिषेचय॥

एकवेणीधरा हि त्वा नगरी संप्रतीक्षते।
राजभोगाननुभवन्महार्हान्पार्थिवात्मज॥

विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे।
न ते कश्चिद्दशरथस्त्वं च तस्य न कश्चन॥

अन्यो राजा त्वमन्यश्च तस्मात्कुरु यथोच्यते।
बीजमात्रं पिता जन्तोः शुक्लं रुधिरमेव च ॥

संयुक्तमृतुमन्मात्रा पुरुषस्येह जन्म तत्।
गतस्य नृपतिस्तत्र गन्तव्यं यत्र तेन वै ॥

प्रवृत्तिरेषा मर्त्याणां त्वं तु मिथ्या विहन्यसे।
अथ धर्मपरा ये ये तांस्ताञ्शोचामि नेतरान् ॥

ते हि दुःखमिह प्राप्य विनाशं प्रेत्य भेजिरे।
अष्टका पितृदैवत्यमित्ययं प्रसृतो जनः ॥
अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति।
यदि भुक्तमिहान्येन देहमन्यस्य गच्छति।
दद्यात्प्रवसतां श्राद्धं न तत्पथ्यशनं भवेत् ॥
दानसंवनना ह्येते ग्रन्था मेधाविभिः कृताः।
यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज ॥
स नास्ति परमित्येव कुरु बुद्धिं महामते।
प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु ॥

अत्रास्मिन्सर्गे 'अष्टकापितृदैवत्य इत्ययं प्रसृतो जनः। अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति' इति अत्र

सर्वश्राद्धप्रकृतिभूताष्टकाग्रहणेन सर्वाण्यपि श्राद्धान्युपलक्षितानि। अष्टकायाः प्रकृतित्वं च बोधायनसूत्रेणावगम्यते। तथा हि अष्टका विधाय 'एवमेव मासिश्राद्धमपरपक्षस्यान्यतमेऽहनि क्रियेत। एतावदेव नाना नान्नाष्टका होमो भवति' इति। श्राद्धप्रकारमाहाश्वलायनः— 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा पूर्वेद्युः पितृभ्यो दद्यादोदनं कृसरं पायसं। चतुःशरावस्यवापूपान् उदीरतामवर उत्परास इत्यष्टकाभिर्हुत्वा यावतीभिर्वा कामयीताथ श्वोभूतेऽष्टकाः पशुना स्थालीपाकेन वा अप्यनडुहो यवसमाहरेदग्निना वा कक्षमुपोषेदेषा मेऽष्टकेति। न त्वेवानष्टकः स्यात्तां हैके वैश्वदेवीं ब्रुवत आग्नेयीमेके सौर्यामेके नक्षत्रदेवतामेके रात्रिदेवतामेके ऋतुदेवतामेके प्राजापत्यामेके इत्यादि। तथा एतेन माघ्यावर्षं प्रोष्ठपद्या अपरपक्षे मासि मासि चैवं पितृभ्योऽयुक्षु प्रतिष्ठापयेन्नवावरान्भोजयेदयुजो वा युग्मान् वृद्धिपूर्तेषु अयुग्मानितरेषु' इति। बोधायनोऽपि—'अष्टकाहोमस्तैषे मास्यपरपक्षस्याष्टम्यां क्रियेतैवं माघ एवं फाल्गुने यदि विहृतो यद्युवै

समस्त उपरिष्टान्माव्याः पौर्णमास्या अपरपक्षस्य सप्त-म्यामष्टम्यां नवम्यामिति क्रियेत। अपि वा अष्टम्यामेव श्वः करिष्यामीति ब्राह्मणानामन्त्रयते योनिगोत्रश्रुतवृ-त्तसंपन्नानसंबन्धानित्येके कामं संबन्धानपि श्रुतवृत्तसंप-न्नान् श्रुतवृत्तयोर्हि स्वधा निधीयत इत्युपदिशन्ति। तान् श्वोभूते श्मश्रुकर्माभ्यञ्जनस्नानैर्यथोपपादं संपूज्य स्वयमा-प्लुत्य शुचौ समे देशे देवयजनोल्लेखनप्रभृत्या प्रणीताभ्यः कृत्वा बर्हिरादाय गामुपाकरोति पितृभ्यस्त्वा पितामहेभ्य-स्त्वा प्रपितामहेभ्यस्त्वा जुष्टामुपाकरोमि। तूष्णीमित्येके। अथैनामद्भिः प्रोक्षति पितृभ्यस्त्वा पितामहेभ्यस्त्वा प्रपि-तामहेभ्यस्त्वा जुष्टां प्रोक्षामीति। तूष्णीमित्येके। तामत्रैव प्रतीचीनशिरसं दक्षिणापदीं संज्ञपन्ति। तस्यै संज्ञप्ताय आद्भिरभिषेकं प्राणानाप्याययति तूष्णीम् वपामुत्खिद्य हृदय-मुद्धरति। प्रज्ञातानि चावदानानि तान्येतेष्वेव शूलेषूप-निष्क्र्यैतस्मिन्नेवाग्नौ श्रापयन्ति पृथङ्मांसं चोदनं च अपूपांश्च श्रपयन्ति। अन्यांश्च विशेषान् सर्वं सिद्धं समा-नीय अयुग्मान्ब्राह्मणान्सुप्रक्षालितपाणिपादानप आच-मय्य सदर्भोपक्लृप्तेष्वासनेषु प्राङ्मुखानुपवेशयति। उदङ्-

मुखान्वा । यदि प्राङ्मुखान्दक्षिणापवर्गः । यद्युदङ्मुखा-न्प्रागपवर्गः । प्राप्नोतु भवान् प्राप्नोतु भवान् इति । प्राप्नु-वानि प्राप्नुवानीति ते प्रत्याहुः । अथैनांस्तिलमिश्रा अपः प्रतिग्राहयति अमुष्मै स्वधा नमोऽमुष्मै स्वधा नम इति त्रिस्तिलोदकान्दद्यात् । भुक्तवत्सु च तृतीयम् अथैनान्व-स्त्रगन्धपुष्पधूपदीपमाल्यैर्यथोपपाद्यं संपूज्य पृच्छत्युद्ध्रिय-तामग्नौ च क्रियतां काममुद्ध्रियतां काममग्नौ च क्रियता-मिति इतरे प्रत्याहुरपि चाग्नौ करिष्यामीति कुरु-ष्वेतीतरे प्रत्याहुः । अथ अभ्यनुज्ञातः परिधानप्र-भृत्याग्निमुखात्कृत्वा शूनायां वपायां पञ्चस्रुवाहुतीर्जु-होति । तत्पुरस्ताद्व्याख्यातम् । त्रेधा वपां वि-च्छिद्य औदुम्बर्या दर्व्या जुहोति । तत्पुरस्ताद्व्याख्यातम् । अथाष्टका होमं जुहोति 'इयमेव सा या प्रथमा व्यौच्छत्' इति पञ्चदश 'इयुष्टे ये पूर्वतरामपश्यन्' इत्येकाम् । संवत्स-रस्य प्रथमानमित्येकाम् ताः सप्तदश । अथापूपमष्टधा वि-च्छिद्य त्रीण्यवदानानि वपायाःकल्पेन हुत्वा अथेतराणि ब्राह्मणेभ्यो दत्वा अत्रैतान्यवदानानि इडासूने प्रतिच्छाद्यौ-दनं मांसं यूषमित्याज्येन समुदायुत्यौदुम्बर्या दर्व्या उपघातं

दक्षिणार्धे जुहोति पितृभ्यः स्वधा नमः स्वाहा पितामहे-भ्यः स्वधा नमः स्वाहा प्रपितामहेभ्यः स्वधा नमः स्वाहा मातृभ्यः स्वधा नमः स्वाहा पितामहीभ्यः स्वधा नमः स्वाहा प्रपितामहीभ्यः स्वधा नमः स्वाहा। मातामहेभ्यः स्वधा नमः स्वाहा मातुः पितामहेभ्यः स्वधा नमः स्वाहा मातुः प्रपितामहेभ्यः स्वधा नमः स्वाहा। माता-महीभ्यः स्वधा नमः स्वाहा मातुः पितामहीभ्यः स्वधा नमः स्वाहा मातुः प्रपितामहीभ्यः स्वधा नमः स्वाहा। आचार्येभ्यः स्वधा नमः स्वाहा आचार्यपत्नीभ्यः स्वधा नमः स्वाहा गुरुभ्यः स्वधा नमः स्वाहा गुरुपत्नीभ्यः स्वधा नमः स्वाहा सखिभ्यः स्वधा नमः स्वाहा सखिपत्नीभ्यः स्वधा नमः स्वाहा ज्ञातिभ्यः स्वधा नमः स्वाहा ज्ञाति-पत्नीभ्यः स्वधा नमः स्वाहा अमात्येभ्यः स्वधा नमः स्वाहा अमात्यपत्नीभ्यः स्वधा नमः स्वाहा सर्वेभ्यः स्वधा नमः स्वाहा सर्वाभ्यः स्वधा नमः स्वाहा इति। अग्नये कव्य-वाहनाय स्विष्टकृते स्वधा नमः स्वाहेति दक्षिणार्धपूर्वार्धे। मांसौदनं पात्रेषूद्धृत्य विशेषानुपनिक्षिप्य हुतशेषेण संसृ-ज्य दक्षिणाग्रेषु दर्भेषु सादयित्वा दक्षिणाग्रैर्दर्भैः प्रच्छाद्या-

भिमृशति । पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे अमृतं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोमि अक्षितमसि मा पितॄणां पितामहानां प्रपितामहानां क्षेष्टाः अमुत्रामुष्मिँल्लोके' इति । अथतानि ब्राह्मणेभ्य उपनिक्षिप्य ब्राह्मणस्याङ्गुष्ठेना नखेनानुदिशति अमुष्मै स्वधा नम इति भुञ्जानान्समीक्षते प्राणे निविष्टोऽमृतं जुहोमीति पञ्चभिः ब्रह्माणि मात्मामृतत्वायेत्यात्मानं न च तत्र ऊर्ध्वं निरीक्षते ह्रीका हि पितर इति विज्ञायते सर्वैः कामैस्तर्पयन् स्वधायुक्तानि ब्रह्माणि अभिश्रावयेत् । राक्षोघ्नानि नैर्ऋतानि च । तृप्तानप आचम्य आशयेष्वन्नशेषान् संप्राकिरति ये अग्निदग्धा जाता जीवाः येऽप्यदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमिति । संक्षालनेनावकीर्य दक्षिणाभिराराधयति । सुवर्णहिरण्यप्राणिवस्त्रलोहभूमिभाण्डैर्गोऽश्वाजाविकहस्तिदासपुरुषव्रीहियवमाषतिलदण्डोपानच्छत्रकमण्डलुयानासनशयनोपधानैः सर्वोपकरणैर्यथोपपादं संपूज्य अक्षय्यं वाचयित्वोपसंगृह्य स्वधां वाचयित्वोत्थाप्य प्रसाद्य संसाद्य प्रदक्षिणीकृत्य शेषमनुज्ञाप्य एतेनैव यथेतमेत्यान्न-

शेषाग्निवेदयते ते यथा ब्रूयुस्तथा कुर्यात् । तैस्त्वभ्यनुज्ञातो दक्षिणाग्निं दक्षिणाग्रान्दर्भान्संस्तीर्य तेष्वन्नशेषैः पिण्डान्ददाति । पितृभ्यः स्वधा नमः स्वाहा इति चतुर्विंशतिः । संक्षालनेन त्रिरपसव्यैः परिषिञ्चति । ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् तृप्यत इति । जयप्रभृतिसिद्धमाधेनुवरप्रदानात् । आचमने चाग्निमुखे वाभिश्रावणे चोपसंग्रहणेषु च पश्चाद्धोमेषु च यज्ञोपवीतं अथेतरत्र प्राचीनावीतमेव श्वोभूते मांसशेषेण एवमेव श्वोभूते यदि ऽयहं अथ यदि गां न लभते मेषमजं वालभते । आरण्येन वा मांसेन यथोपपन्नेन । खड्गमृगमहिषमेषवराहपृषतशशरोहिशार्ङ्गतित्तिरीकपोतकपिञ्जलवाध्रीणमांसानामक्षय्यं तिलमधुसंसृष्टं तथा मत्स्यस्य शतवलैः क्षीरोदनेन वा सूपोदनेन वा यद्वा भवत्यामेवा मूलफलैर्वा प्रदानमात्रं हिरण्येन वाप्रदानमात्रं अपि वा गोग्रासमाहरेत् अपि वानूचानेभ्य उदकुम्भानाहरेत् । अपि वा श्राद्धमन्त्रानाधीयीत अपि वारण्येऽग्निना कक्षमुपोषेत् । एषामेऽष्टकेति न त्वेवानष्टकः स्यात् सिकता श्राद्धे पवित्रं यद्यध्यवसानाय यद्यन्ववि-

किरणाय कुशाः कुतपो दूर्वा इति श्राद्धे पवित्रं यद्या-
स्तरणाय यदि परिस्तरणाय यच्चोत्पवनाय तिलाः श्राद्धे
पवित्रं यदि दानाय यदि भोजनाय यच्चापां संमार्जनाय
खड्गः श्राद्धे पवित्रं यदि मांसं यच्चास्थिमयं पात्रं दौहित्रः
श्राद्धे पवित्रं यदि भोक्ता यदि परिवेष्टा यच्चाभिश्रावयिता
इत्यष्टकाहोमो व्याख्यातः । एवं मासिश्राद्धमपरपक्ष-
स्येतीति । खादिरगृह्येऽपि— 'ऊर्ध्वमाग्रहायण्यास्तिस्र-
स्तमिस्राष्टम्योऽष्टका इत्याचक्षत इत्यादि । आपस्तम्बोऽपि
— या माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी
ज्येष्ठया संपद्यते तामेकाष्टके त्याचक्षते इति । एवमन्यान्य-
पि श्राद्धानि दर्शितानि । विष्णुपुराणे—'ब्रह्मेन्द्ररुद्रनास-
त्यसूर्याग्निवसुमारुतान् । विश्वेदेवान्पितृगणान्वयांसि म-
नुजान्पशून् ॥ सरीसृपानृषिगणान्यद्वा भूतसंज्ञितम् ।
श्राद्धं श्रद्धान्वितः कुर्वन्प्रीणयत्यखिलं हि तत् ॥ मासि
मास्यसिते पक्षे पञ्चदश्यां नरेश्वर । तथाष्टकासु कुर्वीत
काम्यं कालं शृणुष्व मे ॥ श्राद्धार्हमागतं द्रव्यं विशिष्ट-
मथ वा द्विजम् । श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने
तथा । विषुवे चापि संप्राप्ते ग्रहणे शशिसूर्ययोः । सम-

स्तेष्वपि भूपाल राशिचक्रे तु गच्छति । नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने । इच्छा श्राद्धानि कुर्वीत नव सस्यागमे तथा ॥ अमावास्या यदा मैत्र विशाखास्वातियोगिनी । श्राद्धे पितृगणस्तृप्तिमप्राप्नोत्यष्टवार्षिकीम् । अमावास्या यदा पुष्ये रौद्रे चर्क्षे पुनर्वसौ । द्वादशाब्दं तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः । वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छता । वारुणी चाप्यमावास्या देवानामपि दुर्लभा । नवस्वर्क्षेष्वमावास्या यदैतेष्ववनीपते । ददाति तृप्तिद श्राद्धं पितॄणां शृणु चापरम् ॥ वैशाखमासस्य सिता तृतीया नवम्यथो कार्तिकशुक्लपक्षे । नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे । उपप्लुवे चन्द्रमसो रवेश्च तिस्रोऽष्टकास्वप्ययनद्वये च ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदन्ति । माघासिते पञ्चदशी च कंचिदुपैति योगं सह वारुणेन । ऋक्षेण कालः स वरः पितॄणां स ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ । काले धनिष्ठा यदि नाम तस्मिन् भवन्ति भूपाल

तदा पितृभ्यः। दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैः। तथैव चेद्भाद्रपदास्तु पूर्वाः काले यदा तत्क्रियते पितृभ्यः। श्राद्धं परां तृप्तिमुपैति तेन युगं समग्रं पितरः स्वपन्ति॥ गङ्गां शतद्रूं यमुनां विपाशां सरस्वतीं नैमिषगोमतीं वा। गतोऽवगाहार्चनमादरेण कृत्वा पितॄणां दुरितानि हन्ति। गायन्ति चैतत्पितरः सदा नवर्षामघातृप्तिमवाप्य भूयः। माघासितान्ते शिवतीर्थतोयैर्यास्याम तृप्तिं तनयादिदत्तैः॥ चित्तं च वित्तं च नृणां विशुद्धं शस्तश्च कालः कथितो विधिश्च। पात्रं यथोक्तं परमा च भक्तिं नृणां प्रयच्छन्त्यभिवाञ्छितानि' इति। अपि धन्यकुले जायादस्माकं मतिमान्नरः। अकुर्वन्वित्तशाठ्यं यः पिण्डान्नो निर्वपिष्यति। रत्नवस्त्रमहायानं सर्वभोगादिकं वसु। विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति। अन्नेन वा यथाशक्ति कालेऽस्मिन्भक्तिनम्रधीः। भोजयिष्यति विप्राग्र्यांस्तन्मात्रविभवो नरः। असमर्थोऽन्नदानस्य धान्यमामं स्वशक्तितः॥ प्रदास्यति द्विजाग्रेभ्यः स्वल्पाल्पां वापि दक्षिणाम्। तत्राप्यसामर्थ्ययुतः

करामाग्रस्थितांस्तिलान् ॥ प्रणम्य द्विजमुख्याय कस्मैचिद्भूप दास्यति । तिलैः सप्ताष्टभिर्वापि समवेतां जलाञ्जलिम् ॥ भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यति । यतः कुतश्चित्संप्राप्य गोभ्यो वापि गवाह्निकम् ॥ अभावे प्रीणयन्नस्माञ्छ्रद्धायुक्तः प्रदास्यति । सर्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः ॥ सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति । न मेऽस्ति वित्तं न धनं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोऽस्मि । तृप्यन्तु भक्त्या पितरो मयैतौ कृतौ भुजौ वर्त्मनि मारुतस्य ॥ एवं श्राद्धं बुधः कुर्यात्पैत्रं मातामहं तथा । श्राद्धैराप्यायिता दद्युः सर्वान्कामान्पितामहाः । त्रीणि श्राद्धे पवित्राणि दौहित्रः कुपविस्तिलाः । रजतस्य तथा दानं तथा संदर्शनादिकम् । वर्ज्यानि कुर्वता श्राद्धं कोपाध्वगमनं त्वरा । भोक्तुरप्यत्र राजेन्द्र त्रयमेतन्न शस्यते । विश्वेदेवा सपितरस्तथा मातामहा नृप । कुलं चाप्यायते सर्वं पुंसा श्राद्धं प्रकुर्वता । सोमाधारः पितृगणः योगाधारस्तु चन्द्रमाः । श्राद्धे योगिनियुक्तस्तु तस्माद्भूपाल शस्यते । सहस्रादपि विप्राणां योगी चेत्पुरतः स्थितः ॥

सर्वान्भोक्तॄंस्तारयति यजमानं तथा नृप । अपि नस्ते भविष्यन्ति कुले सन्मार्गशालिनः । गयामुपेत्य ये पिण्डान्दास्यन्त्यस्माकमादरात् ॥ अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम् । पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च' इति । गौतमीये-अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् पञ्चमीप्रभृति वापरपक्षस्य यथा श्राद्धं सर्वस्मिन् वा द्रव्यदेशब्राह्मणसंनिधाने वा कालनियमः शक्तितः । प्रकर्षेद्गुणसंस्कारविधौ नभस्य नवावरान् भोजयेदयुजो यथोत्साहं वा' इति । श्राद्धे देयानि ब्रह्मपुराणे-धेनुं श्राद्धेषु यो दद्याद्दृष्टिं कुम्भोपदोहनाम् । गावस्तमनुतिष्ठन्ति गवां पुष्टिं तथैव च । गन्धवन्ति विचित्राणि कुसुमानि शुभानि च । पूजयित्वा तु पात्राणि श्राद्धे सत्कृत्य दापयेत् ॥ गन्धवाहा महानद्यः सुखानि विविधानि च । दातारमुपतिष्ठन्ते सुनार्यश्च पतिव्रताः शयनासनं च दानानि भूमयो वाहनानि च । श्राद्धेष्वेतानि यो दद्यात्सोऽश्वमेधफलं लभेत् । सर्पिः पूर्णानि पात्राणि श्राद्धे सत्कृत्य दापयेत् ॥ कुम्भक्षीरदुहां शश्वत् सहस्रं लभते गवाम् । रम्यानावसथान्दत्त्वा राजसूयफला-

र्थमाक् । तथाभरणसंपूर्णां सोपधानां स्वलंकृताम् । शय्यां च विविधां दत्त्वा द्विजोऽग्निष्टोमभाग्भवेत् । दासीदासं च विविधं तथैवोष्ट्रमजाविकम् ॥ हस्त्यश्वरथदानं च श्राद्धकर्मणि नित्यशः । तिलांश्च विविधां दत्त्वा लभते फलमक्षयम् ॥ पितृकर्मणि युक्तस्तु शालिशोभनकृद्भवेत् । कूपारामतटाकानि सत्रयोषिद्गृहाणि च ॥ दत्त्वा तु मोदते स्वर्गे नित्यमाचन्द्रतारकम् । स्वास्तीर्णं शयनं दत्त्वा श्राद्धे रत्नविभूषितम् । पितरस्तस्य तुष्यन्ति स्वर्गं चानन्त्यमश्नुते । पट्टकौशेयपत्रोर्णं तथा प्रच्छदकम्बलान् । अजिनं रौरवं पट्टं प्रवेणुं मृगरोमजम् ॥ दत्त्वा चैतानि विप्रेभ्यो भोजयित्वा यथाविधि । प्राप्नोति श्रद्दधानस्तु वाजपेयस्य तत्फलम् । कौशेयं क्षौममग्र्यं च दुकूलमहतं तथा । श्राद्धेष्वेतानि यो दद्याल्लोकानाप्नोत्यनुत्तमान्' इति । श्राद्धस्वरूपं चोक्तं ब्रह्माण्डपुराणे— 'देशकाले च पात्रे च श्रद्धया विधिना च यत् । पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्' इति । तच्च द्विविधं पार्वणैकोद्दिष्टभेदात् । उभयोः स्वरूपमपि पुराणे दर्शितम्

त्रीनुद्दिश्य तु यच्छ्राद्धं पार्वणं तत्प्रकीर्तितम् । एक-मुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रचक्षते ॥' इति । द्विविध-मपि पुनस्त्रिविधम् । नित्यं नैमित्तिकं काम्यं चेति । विश्वामित्रेण तु द्वादशविधत्वमुक्तम्—नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् । पार्वणं चेति विज्ञेयो गोष्ठं शुद्ध्यर्थमष्टमम् । कर्माङ्गं नवमं प्रोक्तं दैविकं दशमः स्मृतम् ॥ यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम् ॥ इति । नित्यमित्यहरहः श्राद्धमुच्यते । नैमित्तिकमित्ये-कोद्दिष्टम् । तदाह पारस्करः—अहन्यहनि यच्छ्राद्धं त-न्नित्यमिति कीर्तितम् । वैश्वदेवविहीनं तदशक्त उदकेन तु । एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्यकमुच्यते । तदप्य-युग्मं कर्तव्यं ब्राह्मणान्भोजयेद्विजान् ॥ इति काम्यश्राद्धं नाम अभिमतार्थसिद्ध्यर्थम् । वृद्धिश्राद्धं तु पुराणे उक्तम् । पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् । द्वादशेऽहनि क्रियमाणं सपिण्डीकरणं प्रसिद्धम् । पर्वणि क्रियमाणं पार्वणम् विशिष्टब्राह्मणसमागमे क्रियमाणं गोष्ठं श्राद्धम् । श्राद्धदेशश्चोक्तः स्मृतिसंग्रहे—'दक्षिणाप्रवणादेशे ती-र्थादौ वा गृहेऽपि वा । भूसंस्कारादिसंयुक्ते श्राद्धं कुर्या-

त्प्रयत्नतः। स्वभूमौ च नदीतीरे देशे कालाद्यदूषिते। स्थलीषु गिरिपृष्ठे च सरःस्वायतनेषु च॥ गोष्ठेषु च विविक्तेषु तुष्यन्ति पितरः सदा।' इति। आषाढ्यादि पञ्चमापरपक्षस्य कन्यास्थार्कान्वितत्वेन प्रशस्ततोक्ता जाबालिना। 'आगतेऽपि रवौ कन्यां श्राद्धं कुर्वीत सर्वदा। आषाढ्यपञ्चमः पक्षः प्रशस्तः पितृकर्मसु। पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा॥ प्राप्नोति पञ्चमो दत्त्वा श्राद्धं कामान्यथापरान्॥' इति। अत्र आषाढीप्रभृति पञ्चमपक्षत्वेनैव प्रशस्तत्वं कन्यास्थार्कान्वितत्वेन च प्रशस्ततरत्वम्। तथा च बृहन्मनुः— आषाढीमवधिं कृत्वा यः पक्षः पञ्चमो भवेत्। तत्र श्राद्धं प्रकुर्वीत कन्यास्थार्को भवेन्न वा। कन्यास्थार्कान्वितस्य प्रशस्ततरत्वं च पुराणे दर्शितम्। पक्षान्तरेऽपि—'कन्यास्थे रवौ श्राद्धं प्रशस्यते कन्यागते पञ्चमे तु विशेषेणैव कारयेत्' इति। पञ्चमापरपक्षस्य विशिष्टफलमाह मार्कण्डेयः— कन्यागते सवितरि दिनानि दश पञ्च च। पार्वणेनैव विधिना तत्र श्राद्धं विधीयते॥ प्रतिपद्धनलाभाय द्वितीया हि प्रजाप्रदा। परवीरान् तृतीया च चतुर्थी शत्रुनाशिनी॥ श्रियं

प्राप्नोति पञ्चम्यां षष्ठ्यां पूज्यो भवेन्नरः । गाणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमाम् ॥ स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामता । वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः ॥ द्वादश्यां हेमलाभं च प्राप्नोति पितृपूजकः । प्रजां मेधां पशून्पुष्टिं स्वातन्त्र्यं बुद्धिमुत्तमाम् ॥ दीर्घमायुस्तथैश्वर्यं कुर्वाणस्तु त्रयोदशीम् । अवाप्नोति न संदेहः श्राद्धं श्रद्धापरो नरः ॥ युवानः पितरो यस्य मृता शस्त्रेण वै तथा । तेन कार्यं चतुर्दश्यां तेषामृद्धिमभीप्सताम् ॥ श्राद्धं कुर्वन्नमावास्यायां चैकः पुरुषः शुचिः । सर्वान्कामानवाप्नोति स्वर्गं चात्यन्तमश्नुते ॥ इति । एवं बहुविधसूत्रपुराणादिषु महाफलत्वेन आवश्यिकत्वेन च प्रपञ्चितमखिलमप्यष्टकादिश्राद्धम् । 'जातं सर्वं अत्रोपद्रवभूतमेव अन्यभुक्तेनान्नेनान्यस्य तृप्त्यसंभवात् । अन्यथा प्रवसन्तमुद्दिश्य ब्राह्मणभोजनात् प्रवसतस्तृप्त्या पथ्यशनग्रहणं सर्वलोकसिद्धं विलुप्यते । अतोऽनर्थकमेव श्राद्धमिति । अयमर्थः यदि भुक्तमिहान्येन देहमन्यस्य गच्छति । दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत् ॥ इत्यनेनोक्तः । अनं संवनना ह्येते ग्रन्था मेधाविभिः कृताः ॥'

इति । यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज ॥ अत्र यजस्वेत्यनेन देवगुर्वादिपूजाविधायकशास्त्रजातं देहीत्यनेन दानशास्त्रं कृत्स्नं दीक्षस्वेत्यनेन च क्रतुबोधकशास्त्रजातं तपस्तप्यस्वेत्यनेन तपोविधायकशास्त्रजातं संत्यजेत्यनेन सर्वसङ्गपरित्यागविधायकशास्त्रजातं च परवित्तापहरणाय परिकल्पितत्वादप्रमाणमेवेति उक्तम् । तत्र देवपूजाविधायकशास्त्राणि च स्मृतिषु बहुलमुपलभ्यन्ते । तत्र पराशरः— 'संध्यास्नानं जपो होमो देवतानां च पूजनम् । आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने ॥' इति । मरीचिरपि—'विधाय देवतापूजां प्रातर्होमादनन्तरम् ।' इति । हारीतोऽपि—'कुर्वीत देवतापूजां जपयज्ञादनन्तरम् ॥' इति । कूर्मपुराणेऽपि— 'निष्पीड्य स्नानवस्त्रं वै सम्यगाचम्य वाग्यतः । स्वैर्मन्त्रैरर्चयेद्देवान् गन्धपुष्पैस्तथाम्बुभिः ॥' इति । नृसिंहपुराणेऽपि—'पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत्' इति । शिवविष्ण्वोः पूजाप्रकारमाह बोधायनः— 'अथातो महापुरुषस्य अहरहः परिचर्याविधिं व्याख्यास्यामः अथातो महादेवस्य परिचर्याविधिं व्याख्यास्यामः'

इत्यादिना । तदकरणे प्रत्यवायः कूर्मपुराणेऽभिहितः— 'यो मोहादथ वालस्यादकृत्वा देवतार्चनम् । भुङ्क्ते स याति नरकं सूकरेष्वभिजायते ॥' इति । शिव-पूजायाः फलमाह नन्दी—'यः प्रयच्छेद्गवां लक्षं दोग्ध्रीणां वेदपारगे । एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम्' इति । आग्नेयेऽपि—'अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः । यत्कृत्वा मुनयः सर्वे परं निर्वाण-माप्नुवन् ॥ अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च । षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् । अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् । प्रति-मास्वल्पबुद्धीनां योगिनां हृदये हरिः' । एवं दानविष-येऽपि तत्र शाकलसंहितायाम्—'उच्चा दिवि दक्षि-णावन्तो अस्थुर्ये अश्वदाः सह वै सूर्येण हिरण्यदा अमृ-तत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः' । यजुर्वेदे-ऽपि—'दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति । दानेनारातीरपानुदन्त दानेन द्विष-न्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितम् । तस्माद्दानं परमं वदन्ति' इति । सामवेदेऽपि—'दानेन सर्वा-

न्कामानवाप्नोति चिरंजीवित्वं ब्रह्मचारी रूपवान् अ-
हिंस्र उपपद्यते ' इति । गौतमोऽपि— 'समद्विगुणसा-
हस्त्रानन्त्यफलानि आब्राह्मणब्राह्मणश्रोत्रियवेदपारगेभ्यः
गुर्वर्थनिवेशौषधार्तवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोग-
वैश्वजितेषु द्रव्यसंविभागोबहिर्वेदि भिक्षमाणेषु कृतान्न-
मितरेषु ।' इति । मनुरपि— 'दानधर्मं निषेवेत नित्यं
नैमित्तिकपौष्टिकम् । परितुष्टेन भावेन पात्रमासाद्य श-
क्तितः ॥ यत्किंचिदपि दातव्यं याचिते नानसूयया । अ-
दाता पुरुषस्त्यागी धनं संत्यज्य गच्छति ॥ दातारं कृपणं
मन्ये मृतोऽप्यर्थं न मुञ्चति ॥' इति । स्कान्देऽपि—
'ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न दीयते । इच्छानु-
रूपो विभवः कदा कस्य भविष्यति ॥' तदिदं दानं
चतुर्विधमित्याह व्यासः— 'नित्यं नैमित्तिकं काम्यं
विमलं चेति कथ्यते । अहन्यहनि यत्किंचिद्दीयतेऽनुप-
कारिणे ॥ अनुद्दिश्य फलं तस्याद्ब्राह्मणाय तु नित्यकम् ।
यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ॥ नैमित्तिकं
तदुद्दिष्टं दानं सद्भिरनुष्ठितम् । अपत्यविजयैश्वर्यस्वर्गार्थं
यत्प्रदीयते । दानं तत्काम्यमाख्यातमृषिभिर्धर्मचिन्तकैः ॥

ईश्वरप्रीणनार्थं यद्ब्रह्मविद्भ्यः प्रदीयते ॥ चेतसा भक्तियु-
क्तेन दानं तद्विमलं शुभम् ॥' गीतायां तु सात्त्विकराजस-
तामसभेदेन दानत्रैविध्यमुक्तम्—'दातव्यमिति यद्दानं दीयते-
ऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृ-
तम् ॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते
चपरिक्लिष्टं तद्राजसमुदाहृतम् ॥' इति । प्रदेयाविशेषेण
फलविशेषानाह मनुः— 'वारिदस्तृप्तिमाप्नोति सुखमक्ष-
य्यमन्नदः । गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूप्यमुत्त-
मम् ॥ वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः । अन-
डुहः श्रियं जुष्टां गोदो ब्रध्नस्य विष्टपम् ॥ यानशय्याप्रदो
भार्यामैश्वर्यमभयप्रदः । धान्यदः शाश्वतं सौख्यं ब्रह्मदो
ब्रह्मसार्ष्टिताम् ॥ सर्वेषां तु प्रदानानां ब्रह्मदानं विशि-
ष्यते । वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् । येन
येन तु भावेन यद्यद्दानं प्रयच्छति । तत्तत्तेनैव भावेन
प्राप्नोति प्रतिपूजितः ॥' इति । संवर्तोऽपि— 'औषधं
स्नेहमाहारं स्नेहाढ्यं सपरिच्छदम् । यः प्रयच्छति
रोगिभ्यः स भवेद्व्याधिवर्जितः ॥ देवागारे द्विजातीनां
दीपं दत्त्वा चतुष्पथे । सविज्ञानेन संपन्नश्चक्षुष्मांश्च

सदा भवेत्॥' इति । मत्स्यपुराणे सूतः—'अथातः संप्रवक्ष्यामि दानधर्मानुकीर्तनम्। दानधर्मेऽपि यत्प्रोक्तं विष्णुना प्रभविष्णुना ॥ यत्तु षोडशधा प्रोक्तं वासुदेवेन भूतये । पुण्यं पवित्रमायुष्यं सर्वपापहरं शुभम् । पूजितं दैवताभिश्च ब्रह्मविष्णुहरादिभिः ॥ आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितम् । हिरण्यगर्भदानं च ब्रह्माण्डं तदनन्तरम् ॥ कल्पपादपदानं च गोसहस्रं च पञ्चमम् । हिरण्यकामधेनुश्च हिरण्याश्वं तथैव च ॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा । पञ्चलाङ्गलकं तद्वद्धारादानं तथैव च । द्वादशं विश्वचक्रं च ततः कल्पलतात्मकम् ॥ सप्तसागरदानं च रत्नधेनुस्तथैव च । महाभूतघटस्तद्वत्षोडशः परिकीर्तितः' इति । नृसिंहपुराणेऽपि—'हिरण्यगोप्रदानेन निरहंकारमाप्नुयात् । भूदानेन तु शुद्धेन लभते शान्तिसंपदम् ॥ गोदानेन तु यत्स्वर्गं लभते निर्मलं नरः । अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥ द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः । अचिराल्लभते स्वर्गं यत्र गत्वा न शोचति ॥ कपिलागोप्रदानेन परमार्थे महीयते ।' पद्मपुराणेऽपि पुलस्त्यः—'मेरोः प्रदानं

वक्ष्यामि दशधा मुनिसत्तम ॥ यत्प्रदानान्नरो लोकाना-प्नोति सुरपूजितान् ॥ पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च । न तत्फलं तथैतेषु दत्त्वा शैलान्यदश्नुते ॥ प्रथमो धान्यशैलश्च द्वितीयो लवणाचलः । गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ॥ पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः । सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥ रजतो नवमस्तद्वद्दशमः शर्कराचलः ॥' इति। विष्णुधर्मोत्तरे—'तिलपर्वतदानं च तथा लवणपर्वतः । कार्पासश्च गुडश्चैव तथा सर्षपपर्वतः ॥ आषाढे कार्तिके चैव माघे वैशाखयोरपि । पौर्णमास्यां तु दातव्यं दानमेतद्युधिष्ठिर ॥ य एवं कुरुते भक्त्या शैलदानमनुत्तमम् । क्रीडाशैले महारम्ये क्रीडित्वा काममीप्सितम् ॥ धर्मेण पूज्यमानोऽथ शक्रलोकं स गच्छति । शक्रलोकान्नयेदन्ते कुलकोटिशतत्रयम् ॥ पश्चान्महोदये रम्ये शैलराजपुरोत्तमे । रमित्वा वर्षकोटिं तु द्विगुणं परिसंख्यया ॥ भूयो जन्म भवेद्राज्यं भुङ्क्ते निहतकण्टकम्' इति । तत्र अतिदानानि त्रिविधानि । तथा च भारते—'त्रीण्याहुरतिदानानि कन्या पृथ्वी सरस्वती' इति । तत्रैव प्रथमम -

विदानमाह— 'यो ब्रह्मदेयां तु ददाति कन्यां भूमिप्रदानं च करोति विप्रे। ददाति चान्नं विधिवच्च यश्च स लोकमाप्नोति पुरंदरस्य॥ मद्रराजश्च राजर्षिर्दत्त्वा कन्यां सुमध्यमाम्। सुवर्णहस्ताय गतो लोकान्देवैरभिष्टुतान्। लोमपादश्च राजर्षिः शान्तां दत्त्वा सुतां प्रभुः। ऋष्यशृङ्गाय विपुले सर्वकामैरयुज्यत॥' मरीचिरपि— 'गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत्। कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम्' इति। छन्दोगब्राह्मणे तु— 'त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती। नरकादुद्धरन्त्येते जपवापनदोहदानैः' इति। तत्र गोदानं शिवरहस्ये— 'सामान्यं सर्ववर्णानां गवां दानमनुत्तमम्। चतुर्वर्गफलायालं यथावत्सुरसत्तमे' इति। दशधेनुदानं च मात्स्ये— 'प्रथमा गुडधेनुः स्याद्घृतधेनुस्तथापरा। तिलधेनुस्तृतीया स्याच्चतुर्थी जलसंज्ञिता॥ क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा। सप्तमी शर्कराधेनुरष्टमी दधिधेनुका॥ रसधेनुश्च नवमी दशमी स्यात्स्वरूपतः॥ समुपोष्य नरो दद्यात्सप्तम्यां तु दिने रवेः। दिनत्रयं यताहारो याति विष्णोः परं पदम्॥ इह

लोकेऽपि सौभाग्यमायुरारोग्यवर्धनम् । वैष्णवं लोकमाप्नोति मरणं स्मरणं हरेः ॥ अर्बुदं च सहस्राणि दश चाष्टौ च धर्मवित् । न शोकदुःखमाप्नोति दौर्गत्यं जायते न च ॥' इति । ब्रह्माण्डपुराणे तु—'कृष्णा स्वर्गप्रदा ज्ञेया गौरी च कुलवर्धनी । रक्ता रूपप्रदा ज्ञेया पीता दारिद्र्यनाशिनी । कृष्णसारा पुत्रदात्री नीलधर्मविवर्धनी ॥ कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ॥' इति । मत्स्यपुराणेऽपि—'यश्चोभयमुखीं दद्यात्प्रभूतप्रभवां नरः । तद्दिनं पायसाहारं पयसा वापि वा हरेत् । सुवर्णस्य सहस्रेण तदर्धेनापि भामिनी ॥ तस्याप्यर्धं शतं वाथ पञ्चाशच्च ततोऽर्धकम् । यथा शक्त्या प्रकर्तव्यं वित्तशाठ्यविवर्जितम् ॥' इति । याज्ञवल्क्यः उभयतोमुखीस्वरूपं तद्दाने फलं चाह—'यावद्वत्सस्य पादौ तु मुखं योन्यां च दृश्यते । तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥ सवत्सा रोमतुल्यानि युगान्युभयतोमुखी । दीप्ता स्यात्स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥' इति । स्कान्दे—'मुखतोऽर्धं वृषो धर्मो जघनं वृष उच्यते । चक्षुषी चन्द्रसूर्यौ च ब्रह्मा मूर्धानमाश्रितः ॥ जिह्वां च

तस्या वरुणो वायुरन्तश्चरः स्वयम् । पादे विष्णुर्भगश्चैव पूषा शक्रश्च संस्थितः ॥ जङ्घेऽशेषस्तथादित्या ऊरू चैव समाश्रिताः ॥ रुद्राः कर्णौ च नासाग्रं ग्रीवोष्ठौ वसव-स्तथा । आयुधानि खुरास्तस्य चक्रवर्णौ च शृङ्गयोः ॥ अपाने च स्वयं मित्रः पुच्छं शासि स सर्वशः । अस्थीनि पर्वताः सर्वे पुरीषे क्षीरभूच्छिवा ॥ मूत्रं चास्य भवे-द्दिव्याममृतं चापि पावनम् । रोमाणि रश्मयः सर्वे नक्षत्राणि च सर्वशः ॥ ऋषयो देवयज्ञाश्च सत्त्वाश्च सफलानि च । अभवं स्वस्य मांसानि रुधिरं सर्वतो-ऽर्णवाः ॥ सप्तलोका मुखं ह्यासन् तथाप्रतिमतेजसः । हस्ता मरीचयश्चैव मज्जा ह्योषध्य एव च ॥ मन्त्रपूताश्च पशवे यकृत्स्नायूनि वीरुधः । वल्ल्यश्च वृक्षगुल्माश्च तथै-वास्ये नगाः शुभाः ॥ नागास्तस्याभवन्नास्ये वसवश्चैव मेहयोः । आमपक्वाशयौ तस्य तौ देवावश्विनौ स्मृतौ ॥ मेघास्तस्याभवन्वक्षस्तटिन्माला विभूषिताः । पिशाचा राक्षसा यक्षा गन्धर्वाप्सरसस्तथा ॥ सिराधमन्योश्च मदो दर्पश्चैवाभिजज्ञिरे । मानुषा मातरश्चैव भूतानि विविधानि च ॥ रोमकूपा हि तस्यासन्वृषभस्य महा-

त्मनः ॥ एवं स भगवान्देवः परमैश्वर्यसंयुतः। सौर-भेयो महादेवः सर्वदेवमयोऽभवत्। उत्पाद्य सस्यानि तृणं चरन्ति तदेव भूयः सकलं वहन्ति। न भारखिन्नाः प्रवदन्ति किंचिदहो वृषैर्जीवति जीवलोकः ॥' इति। तादृशस्यानडुहो दानमुक्तं महाभारते— 'धृतिकण्ठ-मनड्वाहं सर्वरत्नैरलंकृतम्। दत्त्वा प्रजापतेर्लोकं विशोकः प्रतिपद्यते ॥' इति। द्वितीयमतिदानं भूदानम् तत्र महा-भारते भीष्मः— 'अतिदानेषु सर्वेषु पृथिवीदानमुत्तमम्। अचला ह्यक्षया भूमिर्दोग्ध्री कामानन्नुत्तमान् ॥ दोग्ध्री वासांसि रत्नानि पशून्व्रीहियवांस्तथा। भूमिदः सर्वभू-तेषु शाश्वतीमेधते समाः ॥ यावद्भूम्यामायुपति ताव-द्भूमिद एधते। न भूमिदानादस्तीह परं किंचिद्युधिष्ठिर ॥ भूमिमेव ददुः पूर्वं ये भूमिं भुञ्जतेऽधुना। स्वकर्म चोप-जीवन्ति नरा इह परत्र च ॥ य एनां दक्षिणां दद्यात्पृ-थिवीं पृथिवीपतिः। संग्रामे वा तनुं जह्याद्दद्याद्वा पृथि-वीमिमाम् ॥ इत्येतां क्षत्रबन्धूनां वदन्ति परमाशिषम्। पुनाति दत्ता पृथिवी दातारमिह शुश्रमः। अपि पाप-समाचारं ब्रह्मघ्नमथ वानृतम् ॥ सर्वपापात्पावयति सैव

पापात्प्रमुच्यति । अपि पापकृता राज्ञः प्रतिगृह्णन्ति साधवः ॥ पृथिवीं नान्यदिच्छन्ति पावनं ह्येतदुत्तमम् । घोराश्च वारुणाः पाशा नानुसर्पन्ति भूमिदम् ॥ पितॄंश्च पितृलोकस्थान्देवलोकांश्च देवताः । संतर्पयति शान्तात्मा यो ददाति वसुंधराम् ॥ क्लिश्यमानाय चात्यर्थं वृत्तिहीनाय सीदते । भूमिं वृत्तिकरीं दत्त्वा सत्री भवति मानवः ॥ यथा धावति गौर्वत्सं क्षरन्ती सततं पयः । एवमेतन्महाभाग भूमिर्धावति भूमिदम् ॥ गन्धर्वाप्सरसो यत्र तत्र गच्छन्ति भूमिदाः । मधुसर्पिः प्रवाहिण्यः पयोदधिवहास्तथा ॥ सरितस्तर्पयन्तीह सुरेन्द्रवसुधाप्रदम् । सर्वदा पार्थिवेनेह सततं भूमिमिच्छता ॥ भूर्देया विधिवच्छक्रपात्रे शंसमभीप्सता । अपि कृत्वा नरं पापं भूमिं दत्त्वा द्विजातये ॥ समुत्सृजति तत्पापं जीर्णां त्वचमिमिवोरगः । अग्निष्टोमप्रभृतिभिरिष्ट्वा यज्ञैः सदक्षिणैः ॥ न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥ दाता दशानुगृह्णाति दश हन्ति तथा क्षिपन् । ब्राह्मणाय गृहं दत्त्वा वसूनां लोकमश्नुते ॥ ग्रामदः स्यान्नरपतिः सम्राट् नगरदो भवेत् । समग्रवसुधेशस्तु चक्रवर्ती च राज्यदः ॥

भूमिं क्रीत्वापि यः कुर्याद्देवब्राह्मणसान्नरः । स्वर्गलोकमवाप्नोति पुरुषोऽपि सुदारुणः ॥ षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः ।' इति ॥ बृहस्पतिरपि— 'आस्फोटयन्ति पितरः प्रवाल्गन्ति पितामहाः । भूमिदोऽस्मत्कुले जातः सोऽस्मान्संतारयिष्यति । पृथिव्यपहारे दोष उक्तो भारते— 'पूर्वदत्तां हरन्भूमिं नरकायोपगच्छति । नो ददाति प्रतिश्रुत्य दत्त्वा वा हरते तु यः ॥ तौ बद्धा वारुणैः पाशैस्तप्येते मृत्युशासनात् । विन्ध्याटवीष्वतोयासु शुष्ककोटरवासकः । कृष्णसर्पास्तु जायन्ते ये हरेयुर्वसुंधराम् । पतन्त्यश्रूणि रुदतां दीनानामपि सीदताम् । ब्राह्मणानां हृते क्षेत्रे हन्युस्त्रिपुरुषं कुलम् । अथ विद्यादानं गारुडे— 'दानानामुत्तमं दानं विद्यादानं विदुर्बुधाः । आहुः समस्तविद्यानां श्रियमेवाधिदैवतम् ॥ यथा वरिष्ठो देवानां विष्णुः कारणपूरुषः । यथा स्वयोषित्प्रवरा कमला कमलालया ॥ वायुर्बलवतां श्रेष्ठो यथा ज्योतिष्मतां रविः । जलाशयानां प्रवरो यथा च सरितां पतिः ॥ तथा विद्याप्रदः श्रेष्ठो गरीयांश्च गरीयसाम् । इहामुत्र सुखं क्षेममाहुर्विद्याधनं महत् ।

विद्ययामलया युक्तो मुक्तिं याति स संयमी। विद्यया च सुखं गच्छेद्विद्यया च परां गतिम्। विद्याप्रतिष्ठा भूतानां विद्यायोनिश्च दैवतम्। तस्माद्विद्याप्रदो लोके सर्वदः प्रोच्यते बुधैः॥' इति। बृहस्पतिः—'सहस्रमेव धेनूनां शतं वानडुहां समम्। दशानडुत्समं यानं दशयानसमो हयः। दशवाजिसमा कन्या विद्यादानं च तत्समम्। विद्यादानं परा विद्या ब्रह्मविद्या समीरिता। अतस्तद्दानतो राजन् सर्वदानफलं लभेत्।' इति। पात्रविशेषेण फलविशेषमाह मनुः— 'सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। सहस्रं श्रोत्रिये दानमनन्तं वेदपारगे।' गौतमोऽपि— 'समद्विगुणसाहस्रानन्तफलानि अब्राह्मणब्राह्मणश्रोत्रियवेदपारगेभ्यः' इति। बृहस्पतिरपि— 'श्रोत्रिये चैव साहस्रमाचार्ये द्विगुणं ततः। आत्मनि शतसाहस्रमनन्तं त्वग्निहोत्रिणि॥ आहिताग्निं समाधाय कृशं भृत्यप्रियातिथिम्। वसुधा ये प्रयच्छन्ति नोपसर्पन्ति ते यमम्॥' इति। गुरवे दत्त्वा पश्चात्पात्रानुसारेण अन्येभ्यो देयमित्याह व्यासः—'प्रथमं तु गुरोर्दानं दद्याच्छ्रेष्ठमनुक्रमात्। ततोऽन्येषां च विप्राणां दद्यात्पात्रानुसारतः॥ गुरोरग्रे

तत्पुत्रं तद्भार्यां तत्सुतां तथा । पौत्रं प्रपौत्रं दौहित्रमन्यं वा तत्कुलोद्भवम् । तद्दानातिक्रमे दानं प्रत्युतायोगतिप्रदम्' इति । पात्रतारतम्यमाह मनुः— 'अज्ञेभ्यो ग्रन्थिनः श्रेष्ठाः ग्रन्थिभ्यो धारिणो वराः । धारिभ्यो ज्ञानिनः श्रेष्ठाः ज्ञानिभ्योऽध्यवसायिनः ॥' यमोऽपि-'विद्यायुक्तो धर्मशीलः प्रशान्तः शान्तो दान्तः सत्यवादी कृतज्ञः । स्वाध्यायवान् धृतिमान् गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः । स्वाध्यायाढ्यं योनिमन्तं प्रशान्तं वैतानस्थं पापभीरुं बहुज्ञम् । स्त्रीषु क्षान्तं धार्मिकाणां शरण्यं व्रतैः क्रान्तं तादृशं पात्रमाहुः' । याज्ञवल्क्यः— 'न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तिमिमे चोभे तद्धि पात्रं प्रचक्षते' । विष्णुपुराणे— 'यद्यदिष्टतमं लोके यच्चान्यदपि वा गृहे । तत्तद्गुणवते देयं तदेवाक्षय्यमिच्छता' इति । अपात्रदाननिषेधं तत्र दोषं चाह मनुः— 'न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके नावेदविदि धर्मवित् । त्रिष्वप्येतेषु दत्तं हि विधिनाप्यार्जितं धनम् । दातुर्भवत्यनर्थाय परत्रादातुरेव च । यथा प्लवेनौपलेन निमज्जत्युदके

तस्न्। तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ।' पात्रभूतोऽपि अधर्मविनियोक्त्रे न देयमित्याह स एव— 'पात्रभूतोऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम्। असत्सर्मं नियुञ्जीत देयं तस्मै न किंचन॥ संचयं कुरुते यश्च प्रतिगृह्य समन्ततः। धर्मार्थं नोपयुञ्जीत न तं तस्करमर्चयेत्। उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः॥' अथ यज्ञाः— ते च त्रिविधाः, पाकयज्ञाः हविर्यज्ञाः, सोमसंस्थाश्चेति। तत्र अष्टकादयः पाकयज्ञाः, हविर्यज्ञाः ज्योतिष्टोमादयः, सोमाः; तत्र सर्वसोमयागप्रकृतिर्ज्योतिष्टोमः तस्य सप्तसंस्था नित्याः तद्विकृतिभूता अपि पुनः क्रतवस्त्रिविधाः एकाहाहीनसत्रभेदात्, ते च छन्दोगब्राह्मणे चतुर्भिरध्यायैरेकाहास्त्रिभिरहीनाः त्रिभिश्च सत्राणि इति क्रमेणोक्ताः; आर्षेयककल्पेऽपि तेनैव क्रमेण प्रतिपादिताः। क्षुद्रकल्पे तु एकाहाहीनसत्राणां काम्यनैमित्तिकगुणविकारेण भेदा उक्ताः। अभिजित्, विश्वजित्, महाव्रतम्, चत्वारः साहस्राः, षट् साद्यस्काः, चत्वारो व्रात्यस्तोमाः, षडग्निष्टुतः, सौमिकचातुर्मास्यानि, उपहव्यः, ऋतपेयः, शुनाशीर्यः, वैश्यस्तोमः, तीव्रसुत्, वाजपेयः, राजसूयः,

राट्, विराट्, औपसद्ः, सर्वतोमुखः, पुनस्तोमः, चतुष्टोमौ द्वौ उद्भिद्वलभिदौ, अपचितिपक्षिस्तोमौ, ऋषभः, गोसवः, मरुत्स्तोमः, इन्द्राग्न्योःकुलायः, इन्द्रस्तोमः, इन्द्राग्न्योःस्तोमः, निधनौ, संदंशः, वज्रः इति एकाहाः। अथ अहीनाः ज्योतिष्टोमातिरात्रः, सर्वस्तोमातिरात्रः, अप्तोर्यामः, नवसप्तदशातिरात्रः, विषुवदतिरात्रः, गोष्टोमातिरात्रः, आयुष्टोमातिरात्रः, अभिजिदतिरात्रः, विश्वजिदतिरात्रः, त्रिवृदतिरात्रः, पञ्चदशातिरात्रः, सप्तदशातिरात्रः, एकविंशातिरात्रः, इति त्रयोदशातिरात्राः। अङ्गिरसांद्विरात्रः, कापिवनद्विरात्रः, चैत्ररथद्विरात्रः। गर्गत्रिरात्रः, अश्वत्रिरात्रः, वैदत्रिरात्रः, छन्दोगपवमानत्रिरात्रः, तुर्वसुत्रिरात्रः, पराकत्रिरात्रः, इति षट् त्रिरात्राः। चतुर्वीर चतूरात्रः, जामदग्न्य चतूरात्रः, वशिष्ठस्य चतूरात्रः, विश्वामित्र संजय चतूरात्रः इति चत्वारश्चतूरात्राः। देवानां पञ्चरात्रः, पञ्चशारदीयपञ्चरात्रः, व्रतमध्यकपञ्चरात्रः, इति त्रयः पञ्चरात्राः। अथ षड्रात्रास्त्रयः— ऋतूनां षड्रात्रः, त्रिकद्रुक षड्रात्रः, अभ्यासङ्ग्य षड्रात्र इति। सप्त सप्तरात्राः— सप्तर्षिसप्तरात्रः,

प्राजापत्यसप्तरात्रः, छन्दोगपवमानसप्तरात्रः, जामदग्न्य-सप्तरात्रः, ऐन्द्रसप्तरात्रः, जनकसप्तरात्रः, पृष्ठस्तोम सप्त-रात्रः । नवरात्रौ द्वौ—आयुष्कामनवरात्रः पशुकाम-नवरात्रः इति । चत्वारो दशरात्राः— त्रिकद्रुक-दशरात्रः, कुसुरुबिन्ददशरात्रः, छन्दोमदशरात्रः, पूर्द-शरात्रः इति। पौण्डरीकएकादशरात्रः इत्यहीनाः। द्वाद-शाहस्तावत् द्विविधः अहीनसत्रभेदात् । तावुभौ द्विविधौ व्यूढसमूढभेदात्। द्वे त्रयोदशरात्रे षड्विंशोक्तंतृतीयम्; त्रीणि चतुर्दशरात्राणि; चत्वारि पञ्चदशरात्राणि; षोडश सप्तदश अष्टादश एकोनविंशति विंशति रात्राणि पञ्च; द्वे एकविंशतिरात्रे; द्वाविंशतिरात्रः; त्रयोविंशतिरात्रः; चतुर्विंशतिरात्रे द्वे; पञ्चविंशतिषड्विंशति सप्तविंशति अष्टाविंशति एकान्नत्रिंशत् त्रिंशकदेकत्रिंशद्द्वात्रिंशद्रात्राणि; त्रीणि त्रयस्त्रिंशद्रात्राणि; चतुस्त्रिंशत् पञ्चत्रिंशत् षट्त्रिंशत् सप्तत्रिंशत् अष्टात्रिंशत् एकान्नचत्वारिंशच्चत्वारिंशद्रात्राणि; सप्त एकान्नपञ्चाशद्रात्राणि एकषष्टिरात्रः शतरात्रः; गवामयनम्, आदित्यानामयनम्, अङ्गिरसामयनम्, दृतिवातवतोरयनम्, कुण्डपायिनामयनम्, तापश्चितामयनम्, प्रजा-

पतेर्द्वादशसंवत्सरम्, इति सत्राणि । एवमेते एकाहा-हीनसत्रा ब्राह्मणोक्ताः । आर्षेयकल्पे एकादशभिर-ध्यायैः क्लृप्ताः क्रतवः । अथ क्षुद्रकल्पोक्ताः— 'ग्रा-मकामयज्ञः प्रजाकामयज्ञः पश्वादिभेषजकामयज्ञः श्रैष्ठ्यकामयज्ञः मिथः शत्रुभूतबहुयजमानयज्ञः सुहृ-द्भूतबहुयजमानकयज्ञः दीक्षितमृतयज्ञः ज्योगामयावि-यज्ञः अभिशस्यमानयज्ञः राजयज्ञः राष्ट्रे ऋद्धिकामयज्ञः द्वियजमानकयज्ञः वृष्टिकामयज्ञः गोकामयज्ञः इति प्राप्तपदा अग्निष्टोमभेदाश्चतुर्दश । आभिचारयज्ञः पशु-कामयज्ञः ज्योगामयावियज्ञः प्रतिष्ठाकामयज्ञः प्रजाका-मयज्ञः लोककामयज्ञौ द्वौ भ्रातृव्ययज्ञः विभ्रष्टयज्ञः इति ब्राह्मसामिका नव योनैर्यज्ञः यज्ञायज्ञीय बहिष्पव-मानक एकः ऋद्धिकामोक्थ्यः पशुकामउक्थ्यः अन्नाद्य-काम उक्थ्यः ज्येष्ठकाम उक्थ्यः इत्युक्थ्यभेदाः सप्त । प्रतिष्ठाकामयज्ञः स्वर्गकामयज्ञः श्रुत्यसंध्यकसामकपशुका-मयज्ञः इति पञ्चयज्ञः । अवकीर्णवप्रायश्चित्तयज्ञः, अति-स्रुवे प्रायश्चित्तयज्ञः, संसवप्रायश्चित्तयज्ञः, सोमापहरणप्राय-श्चित्तयज्ञः, कलशाहरणप्रायश्चित्तेऽनु सोमाति सोमाति-

रेकप्रायश्चित्तानि त्रीणि, अतिरात्रादतिरेके एकः सत्रिणां मध्ये दीक्षितप्रमीतियज्ञः' इति प्रायश्चित्तक्रतवः त्रयोवर्णकल्पा ब्राह्मणराजन्यवैश्यभेदात् । उभयसामाभिजित्प्रतिरूपः उभयसामविश्वजित्प्रतिरूपौ द्वौ ऋषभप्रतिरूपास्त्रयः पुरोहितयज्ञौ द्वौ यज्ञायज्ञीयानुरूप एकः षोडशसामाग्निष्टोमौ द्वौ। अथाष्टौ गर्भियज्ञः तलवकारिशाखोक्तज्योतिष्टोमभेदा एकत्रिंशत् एकादशाग्निष्टोमाः पञ्चाशदत्यग्निष्टोमाः पञ्चोक्थ्याः पञ्च षोडशिनः पञ्चातिरात्राः। अथ प्रबर्हयज्ञाः आवापवानग्निष्टोमः श्रीस्तोमाश्चत्वारः वाचस्तोम एकः ब्रह्मसामपृष्ठकाहौ द्वौ इति ज्योतिर्विकारः। अथ पृष्ठ्यषडहविकाराः—पृष्ठ्यस्तोमः, नानापृष्ठ्यः, परोक्षपृष्ठ्यः, सर्वपरोक्षपृष्ठ्यः, उभयपरोक्षपृष्ठ्यः, अन्वाहार्यपृष्ठ्यः, अनन्तरावेव ईषद्विकृतावष्टमनवमौ, पुरस्ताज्ज्योतिःषडहः, उपरिष्टाज्ज्योतिःषडहः, बृहद्रथन्तरपुरस्ताज्ज्योतिःषडहः, बृहद्रथन्तरउपरिष्टाज्ज्योतिःषडहः, परोक्षापकर्षपृष्ठ्यःषडहः, प्रत्यक्षापकर्षपृष्ठ्यः षडहः, परोक्षप्राक् पृष्ठ्यःषडहः, प्रत्यक्षप्राक्पृष्ठ्यःषडहः, बृहद्रथन्तरपृष्ठ्यःषडहः, अनुगृहीतपृष्ठ्यःषडहः, बृहद्र-

थंतरपृष्ठ्यो अनुगृहीतपृष्ठ्यः षडहः, बृहद्रथंतरपृष्ठ्यो अनु हीतपरोक्षपृष्ठ्यः षडहः, नानापृष्ठ्यो अनुगृहीतबृहद्रथंतर-पृष्ठ्यः षडहः नानापृष्ठ्योऽनुगृहीतबृहद्रथंतरपरोक्षपृष्ठ्यः ष-डहः इति द्वाविंशत् प्रभेदाः। एवं पृष्ठ्यस्तोमविश्वजिदतिरा-त्रः नानापृष्ठ्यविश्वजिदतिरात्रः इत्येवंप्रकारेण विश्वजिद-तिरात्रा द्वाविंशतिभेदाः। अथ भरतद्वादशाहाः चत्वारः तत्र प्रथममाहापस्तम्बः— द्वादशाग्निष्टोमा रथंतरसामनः सभरतद्वादशाह इति उभयतोऽतिरात्रा दशाग्निष्टोमा रथंतरसामानः सभरतद्वादशाह इति उभयतोऽतिरात्रा दशाग्निष्टोमा द्वितीयः व्यत्यासेन रथंतरबृहत्पृष्ठका उभ-यतोऽतिरात्राः मध्यतो दशाग्निष्टोमाः तृतीयः अभितः षोडशमन्तौ अतिरात्रौ अभितोग्निष्टोमौ अष्टौ मध्य उक्था इति चतुर्थः द्वादशाग्निष्टोमा बृहत्पृष्ठानाकसदामय-नम् द्वादशोक्थ्यास्तद्विश्वेषां देवानामयनम् । द्वादशषोड-शिमतः तदिन्द्रस्यायनं द्वादशातिरात्रद्यावापृथिव्योः संव-त्सरप्रवर्हद्वादशाहः । अथ त्र्यम्बिकद्वादशाहः तत्र प्रथमः अतिरात्रावभितो मध्यतो गो आयुषोरावृत्तिः अतिरा-त्रावभितोऽष्टौ गायुषी ज्योतिष्टोमे प्रथमदशमेऽहनीति

द्वितीयः अतिरात्रावभितः त्रिकद्रुकमूर्ध्वानुपयान्ति ज्योतिष्टोमदशममहः इति तृतीयः एवमभितः त्रिरात्रं ज्योतिर्दशकमित्येकः अभितोऽतिरात्रा आयुषां दशकमिति तृतीयः एवंप्रकारेण यावन्तोऽहीनैकाहाः तावन्तो द्वादशाहाः अन्नाद्यकामद्वादशाहः प्रजाकामद्वादशाह इत्येवमादिप्रकारेण अनन्ता द्वादशाहाः शाखान्तरे विहिताः । क्षुद्रकल्पे क्लृप्ताः तदुक्तं चतुर्दशप्रातिपादनिवेक ब्रह्मसामतः यज्ञायज्ञीयबहिष्पवमानोऽपरः क्रतुः सप्तोक्थ्य विकृताः पञ्चसंधिभेदाद्वाचरिताः ॥ साम्युस्थितावभिव्युष्टाववर्वाक् स्तुत्यागतिष्टवौ । संसवेऽपहृते सोमे एकैकः क्रतु रिच्यते ॥ विशीर्णे कलशे द्वौ तु त्रयः सवनभेदतः । सोमातिरेकतः प्रोक्ता एको रात्र्यतिरेकतः ॥ प्रमीते दीक्षिते ग्रामभेदने वर्णभेदतः त्रयः कल्पास्तु वर्णानां द्वावग्निष्टोमसामतः । अनुष्टुभिर्बृहद्वन्तो माध्यंदिनरथंतरः ॥ षट्कल्पिताः पुरोधेच्छोर्द्वे यज्ञीयानुरूपकः । एकोऽष्टौ गर्भिणः सप्तप्रणर्हाः सवनादितः ॥ दशाहा द्वादशाहाभ्यामेक आवापवानथ । वाचस्तोमास्तु चत्वारो द्वौ पृष्ठब्रह्मसामतः ॥ एकं कल्पोदि-

त्रैकाहाः पञ्चाशीतिप्रभेदतः । द्वाविंशतिस्तु षडहाः पृष्ठतः कल्पितास्तथा ॥ अनन्ता द्वादशाहाश्च भरतप्रमुखास्तथा' इति । तपोविषये मनुः— 'तपोमूलमिदं सर्वं दैवं मानुषकं सुखम् । तपो मध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः॥ ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् । वैश्यस्य तपो वार्ता तपः शूद्रस्य सेवनम् ॥ ऋषयः संशितात्मानः फलमूलानिलाशनाः । तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् ॥ औषधान्यगदो विद्या दैवी च विविधा स्थितिः । तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम् ॥ यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् । तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ महापातकिनश्चैव शेषाश्चाकार्यकारिणः । तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥ कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च । स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥ यत्किंचिदेनः कुर्वन्ति मनोवाक्कायकर्मभिः । तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः । तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः ॥ इज्याश्च प्रतिगृह्णन्ति कामान्संवर्धयन्ति च । प्रजापतिरिदं शास्त्रं तपसैवासृज-

त्मसुः ॥ तथा च वेदानृषयस्तपसैव प्रपेदिरे । इत्येवं तपसो देवा माहाभाग्यं प्रचक्षते ॥ सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्य उद्भवा' इति । आनुशासनिकेऽपि तपसां विशेषः तत्फलविशेषश्च दर्शितः— 'स्थण्डिलेषु शयनानां गृहाणि शयनानि च । चीरवल्कलसंवीते वासांस्याभरणानि च ॥ वाहनानि च यानानि योगात्मनि तपोधने । अग्निपूपशयानस्य राज्ञः पौरुषमेव च ॥ रसानां प्रतिसंहारे सौभाग्यमनुगच्छति । आमिषप्रतिसंहारे पशून्पुत्रांश्च विन्दति ॥ अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत् । सततं चैकशायी यः स लभेतेप्सितां गतिम् ॥ वीरासनं वीरशय्यां वीरस्थानमुपागतः । अथ यास्यस्य वै लोकाः सर्वकामगमास्तथा । धनं लभेत दानेन मौनेनाज्ञां विशांपते । उपभोगांश्च तपसा ब्रह्मचर्येण जीवितम् । रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ॥ फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् । प्रायोपवेशिनो राजन्सर्वत्र सुखमुच्यते । गवाढ्यः शाकदीक्षायां स्वर्गगामी तृणाशनः । स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् । स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमम् ॥

सलिलाशी भवेद्यस्तु सदाग्निः संस्कृतो द्विजः । मनुं साधयतो राज्यं नाकपृष्ठमनाशके ॥ उपवासं च दीक्षायामभिषेकं च पार्थिव । कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ॥ अधीत्य सर्ववेदान्वै सद्यो दुःखाद्विमुच्यते । मानसं हि चरन्धर्मं स्वर्गं लोकमुपाश्नुते । तत्रैव स्थलान्तरे उमामहेश्वरसंवादे देवदेव उवाच— ‘ उपवासव्रतैर्दान्ता ह्यहिंस्राः सत्यवादिनः । संसिद्धाः प्रेत्य गन्धर्वैः सह मोदत्यनामयाः । मण्डूकयोगशयनो यथान्यायं यथाविधि । दीक्षां चरति धर्मात्मा स नागैः सह मोदते । शष्पं मृगमुखोच्छिष्टं यो मृगैः सह सेवते ॥ दीक्षितो वै मुदा युक्तः संगच्छत्यमरावतीम् । शैवालं शीर्णपर्णं वा तद्व्रती यो निषेवते ॥ शीतयोगवहो नित्यं स गच्छेत्परमां गतिम् । वायुभक्षोऽम्बुभक्षो वा फलमूलाशनोऽपि वा ॥ यक्षेष्वैश्वर्यमादाय मोदतेऽप्सरसां गणैः । अग्नियोगवहो ग्रीष्मे विधिदृष्टेन कर्मणा । तीर्त्वा द्वादशवर्षाणि राजा भवति पार्थिवः ॥ आहारनियमं कृत्वा मुनिर्द्वादशवार्षिकम् । मनुं संसाध्य यत्नेन राजा भवति पार्थिवः । देहं चानशने त्यक्त्वा स स्वर्गे सुखमेधते ॥

स्थण्डिले शुद्धमाकाशं परिगृह्य समन्ततः। प्रविश्य च मुदा युक्तो दीक्षां द्वादशवार्षिकीम् ॥ स्थण्डिलस्य फलान्याहुर्यानानि शयनानि च। गृहाणि च महार्हाणि चन्द्रशुभ्राणि भामिनी ॥ आत्मानमुपजीवन्यो नियतो नियताशनः। देहं वा शयने त्यक्त्वा स स्वर्गं समुपाश्नुते ॥ आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम्। त्यक्त्वा महार्णवे देहं वारुणं लोकमश्नुते। आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् ॥ अश्मना चरणौ भित्वा गुह्यकेषु स मोदते। साधयित्वात्मनात्मानं निर्द्वन्द्वो निष्परिग्रहः ॥ तीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोहराम्। स्वर्गलोकमवाप्नोति देवैश्च सह मोदते ॥ आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम्। हुत्वाग्नौ देहमुत्सृज्य वह्निलोके महीयते ॥ यस्तु देवि यथान्यायं दीक्षितो नियतो द्विजः। आत्मन्यात्मानमाधाय निर्ममो धर्मलालसः ॥ तीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोऽनुगाम्। अरणीसहितं स्कन्दे बध्वा गच्छत्यनावृतः। वीराध्वा निरतो नित्यं वीरासनगतस्तथा। वीरस्थायी च सततं स वीरगतिमाप्नुयात्। स शक्रलोकगो नित्यं

सर्वकामपुरस्कृतः । दिव्यपुष्पसमाकीर्णो दिव्यचन्दनभूषितः । सुखं वसति धर्मात्मा दिवि देवगणैः सह ॥ वीरलोकगतो वीरो वीरयोगवहः सदा । सत्त्वस्थः सर्वमुत्सृज्य दीक्षितो नियतः शुचिः ॥ वीराध्वानं प्रपद्येद्यस्तस्य लोकाः सनातनाः । कामगेन विमानेन स वै चरति छन्दतः ॥ शक्रलोकगतः श्रीमान्मोदते च निरामयः ।' इति । संन्यासविषये मनुः— 'चतुर्थमायुषो भागं संगं त्यक्त्वा परिव्रजेत् । आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ॥ भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते । ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः । अधीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः ॥ इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् । अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् ॥ अनिष्ट्वा चैव यज्ञैस्तु मोक्षमिच्छन्व्रजत्यधः । प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ॥ आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् । यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् । तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः । यस्मादण्वपि भूतानां द्विजान्नोत्पाद्यते भयम् । तस्य देहाद्विमुक्तस्य

भयं नास्ति कुतश्चन ॥ अगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः। समुपोढेषु कामेषु निरपेक्षः परिव्रजेत्। एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः। सिद्धिमेकस्य पश्यन्हि न जहाति न हीयते। अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ॥ उपेक्षको संचयिको मुनिर्भावसमन्वितः। कपालं वृक्षमूलानि कुचेलमसहायता ॥ समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन। न चैनं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्। सप्तद्वारावतीर्णां च न वाचमनृतां वदेत् ॥ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः। आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया। नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ न तापसैर्ब्राह्मणैर्वा वयोभिरपि पाश्वभिः। आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंविशेत्। क्लृप्तकेशनखश्मश्रुर्दण्डी कुसुप-

वाङ्शुचिः ॥ विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन्' इति । भारते चातुराश्रम्येऽपि परिव्राजकानां पुनराचारा विमुच्याग्निधनकलत्रपरिबर्हणं सर्वेष्वात्मानं स्नेहपाशानवधूय परिव्रजन्ति समलोष्टाश्मकांचनास्त्रिवर्गवृत्तेष्वसक्तबुद्धयः । अरिमित्रोदासीनानां तुल्यदर्शनाः स्थावरजरायुजाण्डजस्वेदजोद्भिज्जानां भूतानां वाङ्मनःकर्मभिरनभिद्रोहिणः अनिकेताः पर्वतपुलिनवृक्षमूलदेवतायतनान्यनुचरन्तो वासार्थमुपेयुर्नगरं ग्रामं वा नगरे पञ्च च रात्रिकाः ग्रामे चैकरात्रिकाः प्रविश्य च प्राणरक्षणार्थं द्विजातीनां भवनान्यसंकीर्णकर्मणामुपतिष्ठेयुः । पात्रपतितायाचितभैक्षाः कामक्रोधदर्पलोभमोहकार्पण्यदम्भपरिवादाभिमानहिंसानिवृत्ता इति । भवन्ति चात्र श्लोकाः—अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः । न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् । कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति । विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिताग्निनां संव्रजते हि लोकान् ॥ विष्णुपुराणेऽपि—पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप । चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतकल्मषः ॥ मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तु-

षु। जरायुजाण्डजादीनां वाङ्मनःकर्मभिः क्वचित्॥ युक्तः कुर्वीत न द्रोहं सर्वसंगं च वर्जयेत्। प्राणयात्रानिमित्तं च व्यङ्गारे भुक्तवज्जने॥ काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद्गृहान्। एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे। त्रैवर्गिकांस्त्यजेत्सर्वानारम्भानवनीपते॥ कृत्वाग्निहोत्रं स्वशरीरसंस्थं शरीरमग्निं स्वमुखे जुहोति। विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिताग्निनां स व्रजति स्म लोकान्। मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसंकल्पितबुद्धियुक्तः। अनिन्धनज्योतिरिव प्रशान्तः स ब्रह्मलोकं श्रयते द्विजातिः'। इति। यतिधर्मान्हेयानुपादेयांश्च संगृह्याह मेधातिथिः—श्रद्धया परयोपेतः परमात्मपरायणः। स्थूलसूक्ष्मशरीराभ्यां वियुक्तो दशषट्कवित्॥ त्रिदण्डी कुण्डिकां कन्थां भैक्ष्यभाजनमासनम्। कौपीनाच्छादनं वासः षडेतानि परिग्रहेत्॥ स्थावरं जङ्गमं बीजं तैजसं विषमायुधम्। षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत्। रसायनं क्रियां वादं ज्योतिषं क्रयविक्रयम्॥ विविधानि च शिल्पानि वर्जयेत्परदारवत्। भिक्षाशनं जपः स्नानं ध्यानं शौचं सुरार्च-

नम् ॥ कर्तव्यानि षडेतानि कर्तव्यं नृपदण्डवत् ॥ नटादिप्रेक्षणं द्यूतं प्रमदां सुहृदं तथा ॥ भक्ष्यां भोज्यमुदीक्ष्यां च षण्ण पश्येत्कदाचन । स्कन्धावारे खले सार्धे पुरे ग्रामेऽप्यसद्गृहे ॥ न वसेत्तु यतिः सायं षट्सु स्थानेषु कर्हिचित् । रागं द्वेषं मदं मायां दम्भं मोहं मनागपि । षडेतानि यतिर्नित्यं मनसापि न चिन्तयेत् । मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च । दिवा स्वापं च यानं च यतीनां पतनानि षट् ॥ संयोगं च वियोगं च वियोगस्य च साधनम् । जीवेश्वरप्रधानानां स्वरूपाणि विचिन्तयेत् ॥ आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः । दिवा स्वापो वृथा जल्पो यतेर्बन्धकराणि षट् ॥ एकाहात्परतो ग्रामे पञ्चाहात्परतः पुरे । वर्षाभ्योऽन्यत्र च स्थानमासनं तदुदाहृतम् ॥ उक्तानां यतिपात्राणामेकस्यापि न संग्रहः । भिक्षोर्भैक्ष्यभुजश्चापि पात्रलोपः स उच्यते ॥ गृहीतस्य त्रिदण्डादेर्द्वितीयस्य परिग्रहः । कालान्तरोपभोगार्थं संचयः परिकीर्तितः ॥ शुश्रूषालाभपूजार्थं यशोर्थं वा परिग्रहः । शिष्याणां न तु कारुण्यात्स ज्ञेयः शिष्यसंग्रहः ॥ विद्यादीनां प्रकाशत्वादविद्या रात्रिरुच्यते ।

विद्याभ्यासे प्रमादो यः स दिवा स्वाप उच्यते ॥ आध्यात्मिकीं कथां हित्वा भैक्षचर्यासु यो रतिम् । अनुग्रहं पथि प्रश्नं वृथा जल्पोऽन्य उच्यते ॥ अजिह्वः पण्डकः पङ्गुरन्धो बधिर एव च । मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ॥ इदं मृष्टमिदं नेति योऽश्नन्नपि न सज्जते । हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥ अद्यजातं यथा नारीं तथा षोडशवार्षिकीम् । शतवर्षां च यो दृष्ट्वा निर्विकारः स पण्डकः ॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च । योजनान्न परं याति सर्वदा पङ्गुरेव सः ॥ तिष्ठतो गच्छतो वापि यस्य चक्षुर्न दूरतः । चतुर्युगाद्भुवं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते ॥ हिताहितं मनोरामं वचः शोकावहं तु यत् । श्रुत्वा यो न शृणोतीव बधिरः स प्रकीर्तितः ॥ सांनिध्यविषयाणां यः समर्थो विकलेन्द्रियः । सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते ॥ विशेषमाह मनुः— 'एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे । भैक्षप्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने । वृत्तेराराबसंबाधे भिक्षां नित्यं यतिश्चरेत् ॥ भिक्षा च पञ्चविधा ; तथा चोशनाः—

'माधुकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। तात्कालिकोपपन्नं च भैक्षं पञ्चविधं स्मृतम्' इति । संन्यासिनः चतुर्विधाः; तदाह संवर्तः— 'चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ । हंसः परमहंसश्च यो यः पश्चात्स उत्तमः ॥ वैराग्यभेदेन व्यवस्था दर्शिता पुराणे— विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ॥ अशक्ते बहूदको तीव्रतरा या हंससंज्ञिते । मुमुक्षुः परमहंसे च साक्षाद्विज्ञानसाधनः ॥ तत्र कुटीचकवृत्तिः स्कान्दे दर्शिता— 'कुटीचकस्तु संन्यस्य यः स्वसद्मनि नित्यशः । भिक्षामादाय भुञ्जीत स्वबन्धूनां गृहेऽथ वा ॥ शिखायज्ञोपवीती स्यात्त्रिदण्डी सकमण्डलुः' इति । बोधायनोऽपि— 'कुटीचकः परित्यज्य ज्येष्ठे वेश्मनि नित्यशः ॥ भिक्षां बन्धुभ्य आदाय भुञ्जीता शक्तिसंक्षयात्' इति । बहूदकवृत्तिः पितामहेनोक्ता— 'बहूदकस्तु विज्ञेयः सर्वसंगविवर्जितः । बन्धुवर्गेण रहितः स्वभूमौ नैव संविशेत् ॥ निश्चलः स्थाणुभूतश्च सदा मोक्षपरायणः । न कुट्यां नोदके वासं कुर्याद्वने च चेतसा ॥ नागरे वासनेनान्ने

नास्तरे न त्रिदण्डके। स्वमात्रायां न कुर्याद्वै रागं दण्डादिके यतिः॥' इति। हंसवृत्तिः स्कान्दे— 'हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च। कन्थां कौपीनमाच्छाद्यमङ्गवस्त्रबहिःपटम्॥ एकं तु वैणवं दण्डं धारयेन्नित्यमादरात्। देवतामभेदेन कुर्याद्ध्यानं समर्चयेत्' इति। परमहंसवृत्तिश्च स्कान्दे— 'कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम्। अक्षमालां च गृह्णीयाद्वैणवं दण्डमव्रणम्॥ माधूकरमथैकान्नं परमहंसः समाचरेत्' इति। एवं देवगुर्वादिपूजादानदीक्षातपस्त्यागबोधकशास्त्रजातमखिलमपि दानसंवननरूपतया अप्रमाणमेव। तथा यजस्वेत्यादिना चातुराश्रम्यमप्युपलक्षितम्। तथा हि अत्र यजस्वेत्यनेन प्राथम्याद्ब्रह्मचर्यमुच्यते। ब्रह्मचारिणश्च गुरूपासनं विना देवतान्तरोपासना नास्त्येव। तथा चापस्तम्बः— 'न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति' इति। स एवान्यत्र 'देवमिवाचार्यमुपासीत' इति। श्रुतिरपि— 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति। शैवपुराणेऽपि— 'यो गुरुः स शिवः प्रोक्तः स शिवः स च शंकरः।

शिवविद्यागुरूणां च भेदो नास्ति कथंचन। शिवे मन्त्रे गुरौ यस्य भावना सदृशी भवेत्। भोगो मोक्षश्च सिद्धिश्च शीघ्रं तस्य भवेद्ध्रुवम्। वस्त्राभरणमाल्यानि शयनान्यासनानि च॥ प्रियाणि चात्मनो यानि तानि देयानि वै गुरोः। तोषयेत्तं प्रयत्नेन मनसा कर्मणा गिरा' इति। एवं च देवपूजार्थक 'यज' धातुना ब्रह्मचारिणोऽवश्यकर्तव्यदेवताभूतगुरुपूजाप्रतिपादनात्। अतः यजस्वेत्यनेन ब्रह्मचर्याश्रमोपलक्षणमुक्तम्। देहि दीक्षस्वेत्याभ्यां गृहस्थाश्रम उपलक्षितः, दानदीक्षयोः गृहस्थे प्रधानतया अनुष्ठेयत्वात्। तपस्तप्यस्वेत्यनेन च वानप्रस्थाश्रमः, वानप्रस्थैः प्राधान्येन तपसोऽनुष्ठेयत्वात्। संत्यजेत्यनेन तुरीयाश्रमः, तुरीयाश्रमस्थैः त्यागस्यैव प्राधान्येन कर्तव्यत्वात्। एवं ब्रह्मचर्याश्रमासाधारणगुरुशुश्रूषणादिशास्त्रस्य, गृहस्थाश्रमासाधारणदानादिशास्त्रस्य, वानप्रस्थाश्रमासाधारणतपश्चरणशास्त्रस्य, मोक्षाश्रमासाधारणसर्वसङ्गपरित्यागशास्त्रस्य अप्रामाण्यप्रतिपादनेन चतुर्णामाश्रमाणां तद्धर्माणां च विधायकशास्त्रजातमप्रमाणमित्युक्तं भवति। आश्रमाणां

तद्धर्माणां च विधायकशास्त्रजातं मोक्षधर्मे व्यासशुकसंवादे व्यासः— 'ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः। यथोक्तचारिणः सर्वे गच्छन्ति परमां गतिम्॥ एको वाप्याश्रमानेतान्यो न तिष्ठेद्यथाविधि। अकामद्वेषसंयुक्तः स परत्र विधीयते॥ चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता। एतामारुह्य निःश्रेणीं ब्रह्मलोके महीयते॥ आयुषस्तु चतुर्भागं ब्रह्मचार्यनसूयकः। गुरौ वा गुरुपुत्रे वा वसेद्धर्मार्थकोविदः॥ जघन्यशायी पूर्वं स्यादुत्थाय गुरुवेश्मनि। यच्च शिष्येण कर्तव्यं कार्यं दासेन वा पुनः। कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत पार्श्वतः। किंकरः सर्वकारी स्यात् सर्वकर्मसु कोविदः॥ कर्मातिशेषेण गुरावध्येतव्यं बुभूषता। दक्षिणो नयवादी स्यादाहूतो गुरुमाश्रयेत्॥ शुचिर्दक्षो गुणोपेतो ब्रूयादिष्टमिवान्तरा। चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेन्द्रियः। नाभुक्तवति चाश्नीयादपीतवति न पिबेत्॥ नातिष्ठति तथासीत नासुप्ते प्रस्वपेत च। उत्तानाभ्यां च पाणिभ्यां पादावस्य मृदु स्पृशेत्॥ दक्षिणं दक्षिणेनैव सव्यं सव्येन पीडयेत्। अभिवाद्य

गुरुं ब्रूयादधीष्व भगवन्निति । इदं करिष्ये भगवन्निदं चापि कृतं मया ॥ अहांस्तदपि कर्तास्मि यद्भवान्वक्ष्यते पुनः । इति सर्वमनुज्ञाप्य निवेद्य च यथाविधि । कुर्यात्कृत्वा च तत्सर्वमाख्येयं गुरवे नमः ॥ यांस्तु गन्धान्रसान्वापि ब्रह्मचारी न सेवते । सेवेत तान्समावृत्त इति धर्मेषु निश्चयः । ये केचिद्विस्तरेणोक्ता नियमा ब्रह्मचारिणः ॥ तान्सर्वान्नाचरेन्नित्यं भवेच्चानयगो गुरोः । स एवं गुरवे प्रीतिमुपाहृत्य यथाबलम् ॥ आश्रमादाश्रमेष्वेव शिष्यो वर्तेत कर्मणा । वेदव्रतोपवासेन चतुर्थे चायुषे गते ॥ गुरवे दक्षिणां दत्त्वा समावर्तेद्यथाविधि । धर्मलुब्धैर्युतो दारैरग्नीनुत्पाद्य यत्नतः । द्वितीयमायुषो भागं गृहमेधी भवेद्व्रती ॥ द्वितीयमायुषो भागं गृहमेधी गृहे वसेत् । धर्मलुब्धैर्युतो दारैरग्नीनाहृत्य सुव्रतः ॥ गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः । कुसूलधान्यः प्रथमः कुम्भधान्यस्त्वतः परम् ॥ अश्वस्तनोऽथ कापोतीमाश्रितो वृत्तिमाहरेत् । येषां परः परो ज्यायान्धर्मतो धर्मवित्तमः । षट्कर्मावर्तयत्येकः त्रिभिरन्यः प्रवर्तते ॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः ।

गृहमेधिव्रतान्यत्र महान्तीह प्रचक्षते । नात्मार्थं पाचयेदन्नं न वृथा घातयेत्पशून् ॥ प्राणी वा यदि वाप्राणी संस्कारं यजुषार्हति । न दिवा प्रस्वपेज्जातु न पूर्वापररात्रिषु । न भुञ्जीतान्तरा काले नानृतावाह्वयेत्स्त्रियम् । नास्यानश्नन्गृहे विप्रो वसेत्कश्चिदपूजितः ॥ तथास्यातिथयः पूज्या हव्यकव्यवहाः सदा । वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः । स्वधर्मजीविनो दान्ताः क्रियावन्तस्तपस्विनः । तेषां हव्यं च कव्यं चाप्यर्हणार्थं विधीयते । नखरैः संप्रयातस्य स्वधर्मज्ञापकस्य च ॥ अपविद्धाग्निहोत्रस्य गुरोर्वालीककारिणः । संविभागोऽत्र भूतानां सर्वेषामेव शिष्यते । तथैवापचमानेभ्यः प्रदेयं गृहमेधिना । विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः । अमृतं यज्ञशेषः स्याद्भोजनं हविषा समम् । भृत्यशेषं तु योऽश्नाति तमाहुर्विघसाशिनम् । विघसं भृत्यशेषं तु यज्ञशेषमथामृतम् ॥ स्वदारनिरतो दान्तो ह्यनसूयुर्जितेन्द्रियः । ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः । वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः । मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ॥ दुहित्रा दास-

वर्गेण विवादं न समाचरेत् । एतान्विमुच्य संवादान्सर्वपापैर्विमुच्यते ॥ एतैर्जितश्च जयति सर्वाँल्लोकान्न संशयः । आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ॥ अतिथिस्त्विन्द्रलोकस्य देवलोकस्य चर्त्विजः । जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः । संबन्धिबान्धवा दिक्षु पृथिव्यां मातृमातुलौ ॥ वृद्धबालातुरकृशास्त्वाकाशे प्रभविष्णवः । भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः ॥ छाया स्वा दासवर्गश्च दुहिता कृपणं परम् । तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः । गृहधर्मपरो विद्वान्धर्मशीलो जितक्लमः । न चार्थबद्धः कर्माणि धर्मं वा कंचिदाचरेत् । गृहस्थवृत्तयस्तिस्रस्तासां निःश्रेयसं परम् । परस्परं तथैवाहुश्चातुराश्रम्यमेव तत् । ये चोक्ता नियमास्तेषां सर्वं कार्यं बुभूषता । कुम्भधान्यैरुञ्छशिलैः कापोतीं चास्थितास्तथा ॥ यस्मिंश्चैते वसन्त्यर्हास्तद्राष्ट्रमभिवर्धते । पूर्वापरान्दशापरान्पुनाति च पितामहान् ॥ गृहस्थवृत्तीश्चाप्येता वर्तयेद्यो गतव्यथः ॥ स चक्रधरलोकानां सदृशीमाप्नुयाद्गतिम् । जितेन्द्रियाणामथ वा गतिरेषा विधीयते ॥ स्वर्गलोको गृहस्थानामुदारमनसां

हितः । स्वर्गो विमानसंयुक्तो वेददृष्टः सुपुष्पितः ॥ स्वर्गलोको गृहस्थानां प्रतिष्ठा नियतात्मनाम् । ब्रह्मणा विहिता योनिरेषा यस्माद्विधीयते । द्वितीयं क्रमशः प्राप्य स्वर्गलोके महीयते ॥ अतः परं परमुदारमाश्रमं तृतीयमाहुस्त्यजतां कलेबरम् । वनौकसां गृहपतिनामनुत्तमं शृणुष्व संश्लिष्टशरीरकारिणाम् ॥' इति । 'गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ॥ तृतीयमायुषोभागं वानप्रस्थाश्रमे वसेत् । तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ॥ नियतो नियताहारः षष्ठभक्तोऽप्रमत्तवान् । तदग्निहोत्रं ता गावो यज्ञाङ्गानि च सर्वशः ॥ अफालकृष्टं व्रीहियवं नीवारं विघसानि च । हवींषि संप्रयच्छेत मखेष्वत्रापि पञ्चसु ॥ वानप्रस्थाश्रमेऽप्येताश्चतस्रो वृत्तयः स्मृताः ॥ सद्यः प्रक्षालकाः केचित्केचिन्मासिकसंचयाः । वार्षिकं संचयं केचित्केचिद्द्वादशवार्षिकम् ॥ कुर्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थमेव च । अभ्रावकाशा वर्षासु हेमन्ते जलसंश्रयाः ॥ ग्रीष्मे च पञ्चतपसः शश्वच्च मितभोजनाः । भूमौ विपरिवर्तन्ते तिष्ठन्ति प्रमदैरपि ॥ स्थानासनैर्वर्तयन्ति सवनेष्वभिषि-

ञ्चते । दन्तोलूखलिकाः केचिदश्मकुट्टास्तथापरे ॥ शुक्लपक्षे पिबन्त्येके यवागूं कथितां सकृत् । कृष्णपक्षे पिबन्त्यन्ये भुञ्जते वा यथागमम् । मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः ॥ वर्तयन्ति यथान्यायं वैखानसगतिं श्रिताः । एताश्चान्याश्च विविधा दीक्षास्तेषां मनीषिणाम् ॥ चतुर्थश्चौपनिषदो धर्मः साधारणः स्मृतः । वानप्रस्थाद्गृहस्थाश्च ततोऽन्यः संप्रवर्तते ॥ अस्मिन्नेव युगे तात विप्रैः सर्वार्थदर्शिभिः । अगस्त्यः सप्तऋषयो मधुच्छन्दोऽघमर्षणः ॥ सांकृतिः सुदिवा दण्डिः यथावासोऽकृतश्रमः । अहोवीर्यस्तथा काव्यः ताण्ड्यो मेधातिथिर्बुधः ॥ बलवान्कर्णनिर्वाकः शून्यपालः कृतश्रमः । एनं धर्मं कृतवन्तः ततः स्वर्गमुपागमन् ॥ तात प्रत्यक्षधर्माणस्तथा यायावरा गणाः । ऋषीणामुग्रतपसां धर्मनैपुण्यदर्शिनाम् ॥ अन्ये चापरिमेयाश्च ब्राह्मणा वनमाश्रिताः । वैखानसा वालखिल्याः सैकताश्च तथापरे ॥ कर्मभिस्ते निरानन्दा धर्मनित्या जितेन्द्रियाः । गताः प्रत्यक्षधर्माणः ते सर्वे वनमाश्रिताः ॥ अनक्षत्रास्त्वनाधृष्या दृश्यन्ते ज्योतिषां गणाः । जरया च परिद्यूना व्याधिना परिपीडिताः ॥

चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत्। सद्यस्कारां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ॥ आत्मयाजी आत्मरतिरात्मक्रीडात्मसंश्रयः। आत्मन्यग्नीन्समारोप्य त्यक्त्वा सर्वपरिग्रहान् ॥ साद्यस्कांश्च यजेद्यज्ञानिष्टीश्चैवेह सर्वदा। यदैव याजिनां यज्ञादात्मनीज्या प्रवर्तते ॥ त्रींश्चैवाग्नीन्यजेत्सम्यगात्मन्येवात्ममोक्षणात्। प्राणेभ्यो यजुषः पञ्च षट्प्राश्नीयादकुत्सयन् ॥ केशलोमनखान्वाप्य वानप्रस्थो मुनिस्ततः। आश्रमादाश्रमं पुण्यं पूतो गच्छति कर्मभिः॥ अभयं सर्वभूतेभ्यो दत्त्वा यः प्रव्रजेद्द्विजः। लोकास्तेजोमयास्तस्य प्रेत्य चानन्त्यमश्नुते ॥ सुशीलवृत्तो व्यपनीतकल्मषो न चेह नामुत्र च कर्तुमीहते। अरोषमोहो गतसंधिविग्रहो भवेदुदासीनवदात्मविन्नरः॥ यमेषु चैवानुगतेषु न व्यथेत्स्वशास्त्रसूत्राहुतिमन्त्रविक्रमः। भवेद्यथेष्टागतिरात्मवेदिनि न संशयो धर्मपरे जितेन्द्रिये ॥ ततः परं श्रेष्ठमतीव सद्गुणैरधिष्ठितं त्रीनथ वृत्तिमुत्तमाम्। चतुर्थयुक्तं परमाश्रमं शृणु प्रकीर्त्यमानं परमं परायणम् ॥'

शुक उवाच— वर्तमानस्तथैवात्र वानप्रस्थाश्रमे यथा। योक्तव्योऽत्मा कथं शक्त्या वेद्यं वै काङ्क्षता परम्।

व्यास उवाच— प्राप्य संस्कारमेताभ्यामाश्रमाभ्यां ततः परम् । यत्कार्यं परमार्थं तु तदिहैकमनाः शृणु ॥ कषायं पाचयित्वा तु श्रेणिस्थानेषु च त्रिषु । प्रव्रजेच्च परं स्थानं परिव्राज्यमनुत्तमम् ॥ तद्भवानेवमभ्यस्य वर्ततां श्रूयतां तथा । अनग्निरनिकेतश्च ग्राममन्नार्थमाश्रयेत् ॥ अश्वस्तनविधाता स्यान्मुनिर्भावसमन्वितः । लघ्वाशी नियताहारः सकृदन्ननिषेविता ॥ कपालं वृक्षमूलानि कुचेलमसहायता । उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणम् ॥ यस्मिन्वाचः प्रविशन्ति कूपे त्रस्ता द्विजा इव । न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥ नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित् । ब्राह्मणानां विशेषेण नैव ब्रूयात्कथंचन ॥ यद्ब्राह्मणस्य कुशलं तदेव सततं वदेत् । तूष्णीमासीत निन्दायां कुर्वन्भैषज्यमात्मनः ॥ येन पूर्णमिवाकाशं भवत्येकेन सर्वदा । शून्यं येन विना कीर्णं तं देवा ब्राह्मणं विदुः ॥ येन केनचिदच्छिन्नो येन केनचिदाशितः । यत्रक्वचनशायी च तं देवा ब्राह्मणं विदुः ॥ अहेरिव गणाद्भीता सौहित्यान्नरकादिव । कुणपादिव च स्त्रीभ्यः तं देवा ब्राह्मणं विदुः ॥ न क्रुध्येन्न प्रहृष्येच्च

मानितोऽमानितोऽपि वा। सर्वभूतेष्वभयदं तं देवा ब्राह्मणं विदुः॥ नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निदेशं भृतको यथा॥ अनभ्याहतचित्तः स्यादनभ्याहतवाग्भवेत्। निर्मुक्तः सर्वपापेभ्यो निरमित्रस्य किं भयम्॥ अभयं सर्वभूतेभ्यो भूतानामभयं यतः॥ तस्य मोहाद्विमुक्तस्य भयं नास्ति कुतश्चन। यथा नागपदेऽन्यानि पदानि पदगामिनाम्॥ सर्वाण्येवापि ध्रियन्ते पदजातानि कौञ्जरे। एवं सर्वमहिंसायां धर्मार्थमपि धीयते। अमृतः स नित्यं वसति यो हिंसां न प्रपद्यते। अहिंसकः समः सत्यो धृतिमान्नियतेन्द्रियः॥ शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमाम्। एवं प्रज्ञानतृप्तस्य निर्भयस्य निराशिषः। न मृत्युरतिगो भावः स मृत्युमभिगच्छति॥ विमुक्तं सर्वसंगेभ्यो मुनिमाकाशवत्स्थितम्। अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः॥ जीवितं यस्य धर्मार्थं धर्मो हर्यर्थमेव च। अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः॥ निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्। निर्मुक्तं बन्धनैः सर्वैस्तं देवा ब्राह्मणं विदुः॥ सर्वाणि भूतानि सुखे रमन्ते

सर्वाणि दुःखस्य भृशं त्रसन्ते । तेषां भयोत्पादनजात-खेदः कुर्यान्न कर्माणि हि श्रद्दधानः ॥ दानं हि भूताभय-दक्षिणायाः सर्वाणि दानान्यधितिष्ठतीह । तीक्ष्णां तनुं यः प्रथमं जहाति सोऽनन्त्यमाप्नोत्यभयं प्रजाभ्यः । उत्तान आस्ये न हविर्जुहोति लोकस्य नाभिर्जगतः प्रतिष्ठा । तस्याङ्गमङ्गानि कृताकृतं च वैश्वानरः सर्व-मिदं प्रपेदे ॥ प्रादेशमात्रे हृदि निःसृतं यत्तस्मिन्प्राणा-नात्मयाजी जुहोति । तस्याग्निहोत्रं हुतमात्मसंस्थं सर्वेषु लोकेषु सदेवकेषु ॥ दैवं विधातुं त्रिवृतं सुपर्णं ये विद्युरग्र्यां परमात्मतां च । ते सर्वलोकेषु महीयमाना देवाः समर्त्याः सुकृतं व्रजन्ति ॥ वेदांश्च वेद्यं च विधिं च कृत्स्नमथो निरुक्तं परमार्थतां च । सर्वं शरीरात्मनि यः प्रवेद तस्यैव देवाः स्पृहयन्ति नित्यम् ॥ भूमावसक्तं दिवि चाप्रमेयं हिरण्मयं योऽण्डजमण्डमध्ये । पतत्रिणं पक्षिणम-न्तरिक्षे यो वेद भोग्यात्मनि रश्मिदीप्तः ॥ आवर्तमानम-जरं विवर्तनं षण्णाभिकं द्वादशारं सुपर्व । यस्येदमास्यो-परि याति विश्वं तत्कालचक्रं निहितं गुहायाम् ॥ यः संप्रसादं जगतः शरीरं सर्वान्सलोकानधिगच्छतीह ।

तस्मिन्हि संतर्पयतीह देवान् ते वै तृप्तास्तर्पयन्त्यास्यमस्य ॥ तेजोमयो नित्यमजः पुराणो लोकाननन्तानुभयानुपैति । भूतानि यस्मान्न त्रसन्ते कदाचित्स भूतानां न त्रसते कदाचित् ॥ अगर्हणीयो न च गर्हतेऽन्यान्स वै विप्रः परमात्मानमीक्षेत् । विनीतमोहो व्यपनीतकल्मषो न चेह नामुत्र च सोऽन्तमृच्छति ॥ अरोषमोहः समलोष्टकाञ्चनः प्रहीणकोशो गतसंधिविग्रहः । अपेतनिन्दास्तुतिप्रियश्चरन्नुदासीनवदेष भिक्षुकः ॥' इति । एवं सर्वाश्रमधर्मबोधकशास्त्रप्रामाण्यं सिद्धम् । स नास्ति परमित्यनेन परलोकाभाव उक्तः । 'प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु' इत्यनेन प्रत्यक्षमात्रप्रामाण्यमुक्तम् । गतः स नृपतिस्तत्र गन्तव्यं यत्र तेन वै इत्यनेन भूतचतुष्टयसंघातदेहात्मकः पिता देहारम्भकतत्तद्भूतेषु गत इत्यर्थकेन श्लोकेन 'अथ धर्मपरा ये ये तांस्ताञ्शोचामि नेतरान्। ते हि दुःखमिह प्राप्य विनाशं प्राप्य भेजिरे' इत्यनेन च देहातिरिक्त आत्माभावश्चेत्येवमादयश्चार्वाकमतसिद्धाः पदार्था उक्ताः । ते च इत्थमाचक्षते प्रत्यक्षसिद्धपृथिव्यादिभूतचतुष्टयमेव तत्त्वम् । प्रत्यक्षादृष्टं तु वस्तु ना-

स्त्येव । तदुक्तम्–'लोकायतिकपक्षे तु तत्त्वं भूतचतुष्टयम् । पृथिव्यापस्तथा तेजो वायुरित्येव नापरः ॥ प्रत्यक्षगम्यतैवास्ति नास्त्यदृष्टमदृष्टतः । अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते । क्वापि दृष्टमदृष्टं चेददृष्टं ब्रुवते कथम् । नित्यादृष्टं कथं तत्स्याच्छशशृङ्गादिसंनिभम्' इति । ननु विचित्रसुखदुःखान्यथानुपपत्त्या धर्माधर्मावदृष्टरूपौ स्वीकर्तव्याविति चेन्न । कोकिलकलरवमयूरपिञ्छवैचित्र्यादिवत्स्वभावादेव उपपन्नस्य सुखदुःखवैचित्र्यधर्माधर्मफलकत्वाभावात् । तदुक्तम्–'न कल्प्यौ सुखदुःखाभ्यां धर्माधर्मौ परैरिह । स्वभावेन सुखी दुःखी जनोऽन्यन्नैव कारणम् ॥ शिखिनश्चित्रयेत्को वा कोकिलान्कः प्रकूजयेत् । स्वभावव्यतिरेकेण विद्यते नास्य कारणम्' इति । आत्मा तु पृथिव्यादिभूतचतुष्टयसंघातो देह एव न तद्विलक्षणः, स्थूलोऽहं कृशोऽहमिति स्थूलत्वादिसामानाधिकरण्येन देह एवात्मत्वानुभावात् । न च जडत्वात् कथं चैतन्यं संपत्स्यत इति वाच्यम्, प्रत्येकं रागासमर्थानां चूर्णपर्णक्रमुकादीनां योगे रागविशेषवत् मार्तण्डमण्डलमयूखसंतप्तभस्त्रास्थितमद्यस्य स्वयमेवोत्पतननिपतनवत् किण्वादिभ्यो

मदशक्तिवच्च प्रत्येकं भूतानां जडत्वेऽपि तत्सङ्घातरूपस्य देहस्य चैतन्यसंभवात् । किं च देहातिरिक्तात्मसद्भावे किं प्रत्यक्षं प्रमाणम् आहोस्विदनुमानं शब्दो वा? नाद्यः, चक्षुरादिना घटादिवद्देहातिरिक्तात्मनोऽनुपलम्भात्; नापि द्वितीयः, सर्वत्रव्यभिचारशङ्कया व्याप्तिग्रहानुपपत्तेः अनुमानस्यैवासंभवात्; न तृतीयः, अनुमानसापेक्षशक्तिग्रहमूलकत्वेन शब्दमात्रस्याप्रमाणत्वात् । न च पारलौकिकस्वर्गनरकान्यथानुपपत्त्या शरीरातिरिक्तात्मसिद्धिरिति वाच्यम्, परिदृश्यमानस्रक्चन्दनवनितादिजनितसुखकण्टकवेधादिजनितदुःखव्यतिरेकेण परलोकोपभोग्यस्वर्गनरकयोरेवाभावात् मोक्षस्यापि शरीरप्राणवियोगव्यतिरिक्तस्याप्रामाणिकत्वाच्च । स्वर्गनरकसंपादनमपि कृषिगोरक्षादिदृष्टोपायैरेव भविष्यति । तपश्चरणं च मूढकल्पितम्, पातिव्रत्यनियमो रतिदुर्बलकल्पितः, सुवर्णदानान्नदानादिकं च दरिद्रक्षुत्क्षामकुक्षिभिक्षुककल्पितम्, प्रपासत्रदेवालयकूपारामादिनिर्माणं पान्थपरिकल्पितम् । अग्निहोत्रादिकं तु पौरुषहीनैर्जीवनार्थतया परिकल्पितम् । अतः परलोकभ्रान्त्या कायक्लेशादिकं तिर-

स्कृत्य ऋणादिनापि घृतं संपाद्य शरीरमेव सर्वदा पोषणीयम्। तदुक्तम्—स्थूलोऽहं तरुणो वृद्धो युवेत्यादिविशेषणैः। विशिष्टो देह एवात्मा न ततोऽन्यो विलक्षणः। जडभूतविकारेषु चैतन्यं यत्तु दृश्यते। ताम्बूलचूर्णपूगानां योगाद्राग इवोत्थितम्। इहलोकात्परो नान्यः स्वर्गोऽस्ति नरको न च। शिवलोकादयो मूढैः कल्प्यन्तेऽन्यैः प्रतारकैः। स्वर्गानुभूतिरिष्टातिहृद्यष्टवर्षवधूरतिः। सूक्ष्मवस्त्रसुगन्धस्रक्चन्दनादिविभूषणम्। नरकानुभवो वैरिशस्त्रव्याध्याद्युपद्रवः। मोक्षस्तु मरणं प्राणवायुसंज्ञानिवर्तनम्। नातस्तदर्थं संन्यासं कर्तुमर्हति पण्डितः। ततो व्रतोपवासाद्यैर्मूढ एव प्रशुष्यति। पातिव्रत्यादिसंकेतो बुद्धिमद्दुर्बलैः कृतः। सुवर्णभूमिदानादिमृष्टामन्त्रणभोजनम्॥ क्षुत्क्षामकुक्षिभिर्लोके दरिद्रैरुपवर्णितम्। देवालयप्रपासत्रकूपारामादिकर्मणाम्। प्रशंसां कुर्वते नित्यं पान्था एव न चापरे। अग्निहोत्रं त्रयो वेदास्त्रिपुण्ड्रं भस्मकुण्ठनम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः। कृषिगोरक्षवाणिज्यं दण्डनीत्यादिभिर्बुधैः। दृष्टैरेव सदोपायैर्भोगाननुभवेद्भुवि' इति। न च दृष्टो-

पायजन्यभोगस्य दुःखसंभिन्नत्वात् न तस्य पुरुषार्थत्वमिति वाच्यम्, दुःखमनादृत्य सुखमात्रोपभोगसंभवात्। अत एवोक्तम्— त्याज्यं सुखं विषयसङ्गमजन्म पुंसां दुःखोपसृष्टमिति मूर्खविचारणैषा। व्रीहीञ्जिहासति सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान्हितैषी॥ तस्माद्दृष्टमेव पुरस्कार्यं नादृष्टमस्तीति। अयमर्थो विष्णुपुराणेऽपि—नैतद्युक्तिसहं वाक्यं हिंसा धर्माय नेष्यते। हवींष्यनलदग्धानि फलायेत्यर्भकोदितम्॥ निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते। स्वपिता यजमानेन किं नु तस्मान्न हन्यते॥ तृप्तये जायते पुंसः भुक्तमन्येन चेत्ततः। दद्याच्छ्राद्धं श्रद्धयान्नं न वहेयुः प्रवासिनः॥' राजधर्मेऽपि—' यदि संन्यासतः सिद्धिं राजन्कश्चिदवाप्नुयात्। पर्वताश्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः॥ एते हि नित्यसंन्यासाद्दृश्यन्ते निरुपद्रवाः। अपरिग्रहवन्तश्च सततं चात्र भाषिणः॥' इति। बोधायनचन्द्रोदयेऽपि— ' मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारकम्। निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम्॥ स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम्। ततो दावाग्निदग्धा-

नां फलं स्याद्भूरि भूरुहाम्' इति। 'आत्मास्ति देहाव्यतिरिक्तमूर्तिर्भोक्ता स लोकान्तरितः फलानाम्। आशेयमाकाशतरोः प्रसूनात्प्रथीयसी स्वादुफलप्रवृत्तौ॥ यशास्त्येव तदस्ति वस्त्विति मृषा जल्पद्भिरेवास्तिकैर्वाचालैर्बहुभिस्तु सत्यवचसो निन्द्याः कृता नास्तिकाः। हंहो पश्यत तत्त्वतो यदि पुनश्छिन्नादितो वर्ष्मणो दृष्टः किं परिणामरूपितचितिर्जीवः पृथक्कैरपि॥ तुल्यत्वे वपुषां मुखाद्यवयवैर्वर्णक्रमः कीदृशो योषेयं वसु चापरस्य यदमुं भेदं न विद्मो वयम्। हिंसायामथ वा यथेष्टगमने स्त्रीणां परस्वगृहे कार्याकार्यकथास्तथापि यदिमे निष्पौरुषाः कुर्वते॥ कालिङ्गनं भुजनिपीडितबाहुमूलभुग्नोन्नतस्तनमनोहरमायताक्ष्याः। भिक्षोपवासनियमार्कमरीचिदाहैर्देहोपशोषणविधिः कुधियां क चैषः' इति। नैषधेऽपि— 'गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः। येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः॥ यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः। रामाया जातकामाया: प्रशस्ता हस्तधारणा॥ कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः। भस्मीभूतस्य भूतस्य पुनरागमनं

कुतः॥ कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम्। वेदो-ऽपि देवकीयाज्ञा तत्राज्ञाः काधिकार्हणा॥ ग्रावोन्मज्ज-नवद्यज्ञफलेऽपि श्रुतिसत्यता। का श्रद्धा तत्र धीवृद्धाः कामाध्वा यत्खिलीकृतः॥ को हि वेदास्त्यमुष्मिन्वा लो-क इत्याह या श्रुतिः। तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम्॥ प्रलापमपि वेदस्य भागं मन्यध्व एव चेत्। केनाभोग्येन दुःखाञ्च बिभीनपि तथेच्छथ॥ अनेन जा-नतास्मीति कार्यं नार्यं त्वमित्यसौ। त्याज्यते ग्राह्यते चा-न्यद्दहो श्रुत्यातिधूर्तया॥ संदेहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजि-नं यदि। त्यजत श्रोत्रियाः सत्रं हिंसादूषणसंशयात्॥ किं ते वृन्तहृतात्पुष्पाच्छन्माते हि फलप्रदः। स्वस्यैव मूर्धनि न्यस्य न्यास्यमेवाश्मनो यदि॥ स्वं च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम्। इति स्वोच्छित्तिमत्युक्ति-वैदग्धी वेदवेदिनाम्॥ दारा हरिहरादीनां तन्मग्नमनसो भृशम्। किं न मुक्ताः कुतः सन्ति कारागारे मनोभुवः। देवश्चेदस्ति सर्वज्ञः करुणाभागवन्ध्यभाक्। तत्किं वा-ग्व्ययमात्रान्नः कृतार्थयति नार्थिनः' इति। इयं चार्वा-केणोक्तम्— तदिदं चार्वाकमतं जाबालिरुपन्यस्य 'सतां

बुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीम् । राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः’ इत्यभिहितवान् ॥

नवोत्तरशततमे—अथ यथाकथंचिदयोध्यां प्रत्यानेतुमधर्मोपबृंहितान्यपि वचनानि व्याहरतो जाबालेराकर्ण्य वाक्यानि धर्मव्यवस्थापको रामभद्रस्तन्मतं निर्मर्यादस्तु पुरुष इत्यादिना दूषयामास ।

निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः ।
मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥

अनेन पापसमाचारः पुरुषः सद्भिर्न बहुमन्तव्य इति सूचितम् । तथा राजधर्मे ‘श्लाघनीयेन चान्येन कर्मणा निरपत्रपः । उपेक्षितव्यो यत्नेन तादृशः पुरुषाधमः ॥

कुलीनमकुलीनं वा वीरं पुरुषमानिनम् ।
चारित्र्यमेव व्याख्याति शुचिं वा यदि वाशुचिम् ॥

अनेन चारित्रमेव पुरुषस्य स्वभावज्ञापकमिति सूचितम् । तथा चानुशासनिके— ‘अनार्यत्वमनाचारः क्रूरत्वं निष्क्रियात्मता । पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ आर्यरूपसमाचारं चरन्तं कृतके पथि ।

सुवर्णमन्यवर्णं वा स्वशीलं शास्ति निश्चयः' इति ।

कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः।
बहु मंस्यति मां लोके दुर्वृत्तं लोकदूषणम् ॥

अनेन लोकदूषिताचारं जनो न बहुमन्यत इति सूचितम् । तथा च मनुः—'दुराचारो हि पुरुषो लोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च' इति ।

कामवृत्तस्त्वयं लोकः कृत्स्नः समुपवर्तते ।
यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः ॥

अनेन प्रजा राजवृत्तमनुसरन्तीति सूचितम् । राजधर्मेऽपि 'राज्ञा हि पूजितो धर्मस्ततः सर्वत्र पूज्यते । यद्यदाचरते राजा तत्प्रजाभ्यश्च रोचते ॥

सत्यमेवानृशंस्यं च राजवृत्तं सनातनम् ।
तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥

ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।
सत्यवादी हि लोकेऽस्मिन्परमं गच्छति क्षयम् ॥

सत्यमेवेश्वरो लोके सत्यं पद्मा समाश्रिता ।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥

अनेन सर्वधर्मापेक्षया सत्यमेव परमो धर्म इति सूचितम् । अयमर्थः प्राक् प्रपञ्चितः ।

असत्यसंधस्य सतश्चलस्यास्थिरचेतसः ॥
नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् ।

अनेन अनृतप्रतिज्ञेन चलचित्तेन च दत्तं हविर्देवाः पितरश्च न प्रतिगृह्णन्तीति सूचितम् ।

क्षात्रं धर्ममिमं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् ।
क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः ॥

नन्वत्र पितृवचनपालनातिक्रमरूपम् अधर्मसहितं राज्यपरिपालनं रामेण परित्यक्तमिति प्रतीयते; तदसङ्गतम् । अधर्मसहितत्वेऽपि स्वधर्मत्वेन राज्यपरिपालनस्यैव कर्तव्यत्वात् । क्षत्रियाणां राज्यपरिपालनस्य स्वधर्मत्वे मनुः— 'क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्' इति । किं च, वैगुण्यप्रसक्तावपि स्वधर्मस्यैव कर्तव्यत्वात् । तथा च गीतायाम्—'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्'

इति । तत्र राज्यपरिपालने प्रसक्तानां पापानां यज्ञदाना-
दिभिर्निर्वृतिसंभवाच्च । तथा चारण्यके भीमः—'न हि
केवलधर्मात्मा पृथिवीं जातु कश्चन । पार्थिवो व्यजयद्राजन्न
भूतिं न पुनः श्रियम् ॥ जिह्वां दत्त्वा बहूनां हि लु-
ब्धानां लुब्धचेतसाम् । निकृत्या लभते राज्यमाहारमिव
शल्यकः ॥ भ्रातरः पूर्वजाताश्च सुसंवृद्धाश्च सर्वशः ।
निकृत्या निर्जिता देवैरसुराः पार्थिवर्षभ ॥ यदेनः कुरुते
किंचिद्राजा भूमिमवाप्नुवन् । सर्वं तन्नुदते पश्चाद्यज्ञैर्विपु-
लदक्षिणैः । ब्राह्मणेभ्यो ददद्ग्रामान्गाश्च राजन्सहस्रशः'
इति । एवं च त्रिगुणत्वेऽपि अवश्यकर्तव्यं राज्यपरिपा-
लनं परित्यज्य किमिति वनवासाय प्रस्थितो राम इति
चेत्, सत्यम् राज्ञां प्रजापालनमेव परमो धर्मः । तथापि
राज्यपरिपालनापेक्षया क्षत्रियस्य प्रतिज्ञातार्थनिर्वहणं
श्रेष्ठो धर्मः । तथा च आरण्यके भीमं प्रति धर्मपुत्रवाक्यम्—
'तं संधिमास्थाय सतां सकाशे को नाम जह्यादिह
राज्यहेतोः । आर्यस्य मन्ये मरणाद्गरीयो यद्धर्ममुत्सृज्य
महीं प्रशासेत् ॥ मम प्रतिज्ञां च निबोध सत्यां वृणे यथा
धर्ममृताज्जीविताच्च ॥ राज्यं च पुत्राश्च यशो धनं च सर्वं

न मत्यस्य तुलामुपैति' इति । किं च, यदेनः कुरुते किंचिद्राजा भूमिमवाप्नुवन् । सर्वं तन्नुदते पश्चाद्यज्ञैर्विपुलदक्षिणैः' इति वचनेन प्रजापरिपालनार्थतया संभावितदोषाणां यज्ञादिप्रायश्चित्तेन निवृत्तिः प्रतिपादिता; प्रतिज्ञातार्थपालने तु संभावितधर्मव्यतिक्रमस्य दोषत्वमेव नास्तीति । अतोऽपि प्रजापालनापेक्षया प्रतिज्ञातार्थपालनमेवोत्कृष्टो धर्मः । तथा च गदापर्वणि गदायुद्धे नाभेरधः प्रहारनिषेधे सत्यपि भीमकृतदुर्योधनोरुभेददर्शनजनितक्रोधाविष्टं बलरामं प्रति कृष्णवचनम्—सुयोधनस्य गदया भङ्क्ष्याम्यूरू महाहवे । इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले । आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः । अतो दोषं न पश्यामि मा क्रुद्धस्त्वं बलं वहन्' इति । एवं च राज्यपरिपालनापेक्षया प्रतिज्ञातार्थपरिपालनस्य प्रबलधर्मत्वात्, तदर्थं राज्यं परित्यज्य रामस्य वनगमनं युक्तमेव । अमुमेवार्थं हृदि निधाय 'क्षात्रं धर्ममहं त्यक्ष्ये' इत्युक्तवान् इति ।

अकुहः श्रद्दधानः सन्कार्याकार्यविचक्षणः ।
कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ॥

अनेन कर्मभूमिं गतः पुरुषः सत्कर्माण्यवश्यं कुर्यादेवेति सूचितम् । विष्णुपुराणे—अत्राजन्मसहस्राणां सहस्रैरपि सत्तम । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् ॥ गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारत भूमिभागे। स्वर्गस्यापवर्गस्यास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥ कर्माण्यपि संकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे । आवाप्य तां कर्म महीमनन्ते तस्मिन्महीं ये त्वमलाः प्रयान्ति ॥ जानीम नैतत्क वयं विलीने स्वर्गप्रदे कर्मणि देहबन्धम् ॥ प्राप्स्याम धन्याः खलु ते मनुष्या ये भारतेनेन्द्रियशक्तिहीनाः' इति । आरण्यके—'इह यत्क्रियते कर्म तत्परत्रोपयुज्यते । कर्मभूमिरियं ब्रह्मन्फलभूमिरसौ मता ॥'

सत्यं च धर्मं च पराक्रमं च
भूतानुकम्पां प्रियवादितां च ।
द्विजातिदेवातिथिपूजनं च
पन्थानमाहुस्त्रिदिवस्य सन्तः ॥

अनेन सत्यधर्मादीनां परलोकसंपादकत्वमुक्तम् । तथा

च सत्यस्य स्वर्गार्थत्वे मनुः—"नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् । स्थितिश्च लोकधर्मश्च तस्मात्सत्यं विशिष्यते ॥ सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव' इति । धर्मस्य परलोकसाधनत्वे मनुः—'धर्मं शनैः संचिनुयाद्वल्मीकमिव धार्मिक । परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥ धर्मप्रधानं पुरुषं तपसा हतकल्मषम् । परलोकं नयत्याशु भास्वन्तं खे शरीरिणम् ॥ पराक्रमस्य उत्तमलोकसंपादकत्वे राजधर्मे भीष्मः—'नित्योद्युक्तो दस्युवधे रणे कुर्यात्पराक्रमम् । ये च क्रतुभिरीजानः श्रुतवन्तश्च पार्थिवाः । त एवाहवजेतारस्त एते लोकजित्तमाः ॥' पराशरोऽपि—'ये यज्ञसंघैस्तपसा च विप्राः स्वर्गेषु शीघ्रेण यथैव यान्ति । क्षणेन यान्त्येव हि तत्र वीराः प्राणान्सुयुद्धे च परित्यजन्तः ॥' भूतानुकम्पायाः उत्तमलोकसंपादकत्वं राजधर्मे—'सर्वभूतेष्वनुक्रोशं कुर्वतस्तव भारत । आनृशंस्ये प्रवृत्तस्य नियतः पुण्यसंचयः' इति । प्रियवचनस्य परलोकसाधनत्वे मनुः—'वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममीप्सता । स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥ द्वि-

जातिदेवातिथिपूजायाः परलोकसाधनत्वे विष्णुपुराणे—'निवापेन पितॄनर्चेद्यज्ञैर्देवांस्तथातिथीन् । अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥ बलिकर्मणा च भूतानि वात्सल्येनाखिलं जगत् । प्राप्नोति लोकान्पुरुषो निजकर्मसमाश्रितान् ।

निन्दाम्यहं कर्म पितुः कृतं त-
द्यस्त्वामगृह्णाद्विषमस्थबुद्धिम् ।
बुद्ध्यानयैवंविधमाचरन्तं
सुनास्तिकं धर्मपथादपेतम् ॥

ननु श्रीरामभद्रेण नास्तिकबुद्धिजाबालिम्, ऋत्विक्त्वेन परिगृहीतवतः पितुर्वृत्तनिन्दाकृतेत्यवगम्यते, तदनुपपन्नम्, पितृनिन्दापरं लक्ष्मणं मातृनिन्दापरं भरतं च निषेधतो रामस्य पितृवृत्तनिन्दायां प्रवृत्त्यसंभवात्, पितृवृत्तनिन्दने दोषश्रवणाच्च । तथा हि—'श्वपाकपुल्कसादीनां कुत्सितानामचेतसाम् । कुलेषु तेऽभिजायन्ते गुरुवृत्तावमानिनः' इति । न च वैदिकविरुद्धाचारं जाबालिं संगृह्णतः पितुः कर्म निन्दामीत्येवंरूपस्य वच-

नस्य विषमाचारजाबालिनिन्दापरत्वमेव न पितृनिन्दापरत्वमिति वाच्यम् । 'परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत् । दैवान्कुर्युरदैवांश्च कः क्षिपंस्तान्समृध्नुयात्' इति सकलशास्त्रनिषिद्धायां ब्राह्मणनिन्दायां ब्रह्मण्यस्य रामभद्रस्य प्रवृत्त्यसंभवादिति चेन्न, ब्राह्मणत्वेन ऋत्विक्त्वेन अनिन्द्यस्यापि जाबालेः लोकायतिकमार्गप्रवृत्तत्वाकारेण निन्द्यत्वसंभवात् । यथा भीष्मस्य गुरुत्वेन ब्राह्मणत्वेन च युद्धायोग्योऽपि परशुरामः क्षत्रधर्मपुरस्कारेण युद्धायोग्यः क्षत्रियत्वेन युद्धयोग्यत्वं च उद्योगपर्वणि— 'एते वेदाः शरीरस्था ब्राह्मण्यं यच्च ते महत् । तपश्च सुमहत्तप्तं न तेभ्यः स्पृहयाम्यहम् ॥ प्रहरे क्षत्रधर्मस्य यत्त्वं राम समाश्रितः । ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात्' इति । तस्माद्रामेण कृता निन्दा न पितुर्नापि जाबालेः, किं तु जाबालिकथितलोकायतिकवृत्तस्यैव । अत एव जाबालेरपरित्यागः पट्टाभिषेकादावुपयोगश्च । दृश्यते ननु अवैदिकस्य चार्वाकस्य वैदिकमतेन दूषणमनुपपन्नम, तेन वेदप्रामाण्यानङ्गीकारात् तदङ्गीकृतप्रमाणेनैव च दूषणीयत्वात्

इति चेन्न, तदङ्गीकृतप्रमाणसहकारिभूतबुद्धिवैभवपरिकल्पितयुक्तीनामप्रतिष्ठितत्वेन तावन्मात्रेण स्वपक्षस्थापनपरपक्षदूषणस्य निर्वाहात्। तदुक्तम् 'यत्नात्परीक्षितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपद्यते। अतस्तर्काप्रतिष्ठानात्पक्षसिद्धिनिराकृती। शुष्कतर्केण न स्यातामिति चेदनुशासनम्। अत एव चार्वाकमतं क्षपणकेन दूषितम्, क्षपणकमतं च माध्यमिकप्रभृतिभिर्बौद्धैः। तथा हि क्षपणकास्तावत् न प्रत्यक्षमात्रं प्रमाणमिति संभवति। तथात्वे, धूमदर्शनसमनन्तरं वह्निमनुमाय तदर्थतया प्रवृत्तिर्न स्यात्। तथा च स्वक्रियाव्याघातः। एवं नद्यास्तीरे पञ्चफलानि सन्तीति वाक्यश्रवणसमनन्तरमेव शब्दार्थज्ञानपूर्विका प्रवृत्तिर्न स्यात्। अतः प्रत्यक्षातिरिक्तमनुमानादिकं प्रमाणमङ्गीकर्तव्यमेव। एवं च अनुमानागमाभ्यां प्रत्यक्षदृष्टमपि वस्तुजातं सिध्यत्येव। यदुक्तं स्वभावादेव अग्न्यौष्ण्यादिवद्वैचित्र्योपपत्तौ नादृष्टं प्रमाणमिति तन्मन्दं स्वभावस्य यावद्वस्तु स्थापितत्वेन कादाचित्कः सुखदुःखादिवैचित्र्यस्य स्वाभाविकत्वानुपपत्त्या च तदुपपादकत्वेन धर्मा-

धर्मयोरावश्यिकत्वात्। यदुक्तमपरिदृश्यमानपदार्थसद्भावे प्रमाणमेव नास्तीति तदपि परास्तं सर्वज्ञार्हत्प्रणीतागमबलादेव तत्सिद्धेः। अत एव न शशशृङ्गप्रतिबन्दि तदाहुः, अग्नेरौष्णीमपां शैत्यं कोकिले मधुरस्वरः। इत्याद्येकप्रकारं स्यात् स्वभावो नापरः कश्चित्। कादाचित्कसुखं दुःखं स्वभावो नात्मनो मतः। धर्माधर्मौ ततस्ताभ्यामदृष्टावपि निश्चितौ। अदृष्टमग्निमादातुं धूमं दृष्ट्वा प्रधावता। धूमेनाग्न्यनुमानं तु त्वयाप्यङ्गीकृतं ननु। प्रत्यक्षेणानुमानेन पश्यन्त्यत्रागमेन च। दृष्टादृष्टं जनाः स्पष्टमार्हतागमसंस्थिताः' इति। एवं धर्माधर्मसिद्धौ कृतहानाकृताभ्यागमदोषपरिहाराय शरीरातिरिक्त आत्मा अवश्यमङ्गीकर्तव्यः; स च त्रिविधः—सिद्धो बद्धो नारकीयश्चेति। सिद्धो मुक्तः, स द्विविधः परमसिद्धो मन्त्रौषधसिद्धश्चेति। बद्धः संसारी; नारकीयो नरकानुभोक्ता, तस्य च धर्माधर्मसहकारिवशेन पुद्गलाख्यैः परमाणुभिरारब्धः सेन्द्रियो देहः। तत्परिमाणश्च आत्मा न अणुः न विभुः स च मोहात् देहतादात्म्यमापन्नः हस्त्यादिपुत्तिकान्तेषु देहेष्ववतिष्ठते।

तस्य च देहरूपावृत्तिर्बन्धः, अनावृत्तिर्मोक्षः, एतादृश-मोक्षप्राप्तिश्च दिगम्बरस्य मनोवाक्कायकर्मभिः प्राणि-हिंसां वर्जयतः मयूरपिञ्छधारणवीरासनादिनियमवतः लूनकेशस्य पाणिपात्रस्य क्षपणकाचार्योपदिष्टं मन्त्रं सा-धयतः शुद्धचित्तस्य कस्यचिदेव भवति। तथा चोक्तम्—सिद्धा बद्धा नारकीया इति स्युः पुरुषास्त्रिधा। केचित्परम-सिद्धाः स्युः केचिन्मन्त्रौषधैरिह। गुरूपदिष्टमार्गेण ज्ञान-कर्मसमुच्चयात्॥ मोक्षो बन्धनरिक्तस्य जायते भुवि कस्य-चित्। अर्हतामखिलं ज्ञातुं कर्मार्जितकलेवरैः॥ आवृ-त्तिर्बन्धनं मुक्तिर्निरावरणतात्मनाम्। पुद्गलापरसंज्ञस्तु धर्माधर्मानुगामिभिः। परमाणुभिरारब्धाः देहाः सर्वे सहेन्द्रियैः॥ स्वदेहमाना ह्यात्मानो मोहाद्देहाभिमा-निनः। क्रिमिकीटादिदेहस्त्यन्तदेहपञ्जरवर्तिनः। आत्मा-वरणदेहस्य वस्त्राद्यावरणान्तरम्॥ न ग्राह्यं यदि गृह्णन्ति तस्यापीत्यनवस्थितिः। प्राणिजातमहिंसन्तो मनोवाक्कायकर्मभिः। दिगम्बराश्चरन्त्येव योगिनो ब्रह्म-चारिणः॥ मयूरपिञ्छहस्तास्ते कृतवीरासनादिकाः। पाणिपात्रेण भुञ्जानाः लूनकेशाश्च मौनिनः। यथा

क्षपणकाचार्यकृतमन्त्रा दुरासदाः । मुनयो विमलाः शुद्धाः प्रणवाघौघभेदिनः । स वै विश्वसनीयः स्यात्स सर्वज्ञो जगद्गुरुः' इति । एवं चार्वाकमतं क्षपणकैर्दूषितम्; तदपि बौद्धाः दूषयन्ति । ते च बौद्धाश्चतुर्विधाः—माध्यमिकः, योगाचारः, सौत्रान्तिको, वैभाषिकश्चेति । तच्छास्त्रमपि तत्तद्बुद्धिभेदाच्चतुर्विधम् । तत्र माध्यमिकः सर्वशून्यतामाचष्टे । योगाचारस्तु विज्ञानमात्रास्तितामवोचत् । विज्ञानव्यतिरिक्तो बाह्यार्थोऽस्ति, स च बुद्ध्याकारेणानुमेय इति सौत्रान्तिकाः । वैभाषिकास्तु बाह्यार्थाः प्रत्यक्षग्राह्याः इति वर्णयन्ति । तदुक्तम्—बौद्धाः क्षपणकाचार्यप्रणीतमपि सांप्रतम् । पक्षं प्रतिक्षिपन्त्येव लोकायतमतं यथा ॥ चतुर्णां मतिभेदेन बुद्धशास्त्रं चतुर्विधम् । अधिकारानुरूपेण तत्र तत्र प्रवर्तते ॥ ज्ञानमेव हि सा बुद्धिर्न चान्तःकरणं मतम् । जानाति बुध्यते चेति पर्यायत्वप्रयोगतः । त्रयाणामत्र बौद्धानां बुद्धिरस्त्यविवादतः । बाह्यार्थोऽस्ति द्वयोरेव विवादोऽन्यत्र तद्यथा ॥ प्रत्यक्षसिद्धं बाह्यार्थं बुद्धिं वैभाषिकोऽब्रवीत् । बुद्ध्याकारानुमेयोऽर्थो बाह्यः सौत्रान्तिकोदितः । बुद्धिमात्रं वदत्यत्र

योगाचारो न चापरः ॥ नास्ति बुद्धिरपीत्याह वादी माध्यमिकः किल ॥ तत्र माध्यमिकाः शून्यमेव तत्त्वमिति वदन्ति। तथा हि पृथिव्यादिवस्तुजातं किं सत् उतासत् उतोभयात्मकम् अथ वा अनुभयात्मकमिति। न तावदाद्यः, सतः उत्पत्त्यनुपपत्तेः, अन्यथा उत्पन्नोऽपि घटः पुनरुत्पद्येत। न द्वितीयः, शशशृङ्गस्यापि उत्पत्तिप्रसङ्गात्। न तृतीयः, एकस्य वस्तुनः विरुद्धोभयरूपत्वानुपपत्तेः। न तुरीयः, सदसद्भिन्नस्यापि वस्तुनः अलीकत्वात्। किं च व्यक्तिः किं परमाण्वारब्धा, अथ वा परमाणुरूपा वा; नाद्यः, द्व्यणुकैस्त्रिभिः त्र्यणुकोत्पत्त्यङ्गीकारेण द्व्यणुकत्रयोत्पादकानां च षण्णां परमाणूनां किं कार्त्स्न्येन संयोगः उतैकदेशेन। नाद्यः, षण्णां समानदेशत्वेन अणुत्वापत्त्या तदुपादानकप्रपञ्चमात्रस्य अणुत्वापत्तेः। न द्वितीयः, निरवयवानां प्रदेशभेदाभावात्। अन्यथा नित्यत्वप्रसङ्गात्। एवं व्यक्तिगतं सामान्यमपि किं व्यक्तितो भिन्नमभिन्नं वा। नाद्यः, भिन्नत्वे करचरणादिवत् पृथक् गृह्येत। न द्वितीयः, अनित्यव्यक्त्यभिन्नत्वे अनित्यत्वप्रसङ्गात्। तस्माज्जातिव्यक्तिनिरूपणासंभवेन

ज्ञेयाभावे तद्विषयकज्ञानमपि न संभवति । अतः शून्यमेव तत्त्वम् । तदुक्तम्—'न सन्नासन्न सदसन्न चोभाभ्यां विलक्षणम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः । यदसत्कारणैस्तन्न जायते शशशृङ्गवत् । सतश्चोत्पत्तिरिष्टा चेज्जनितं जनयेद्घटम् ॥ एकस्य सदसद्भावो न तरामुपपद्यते । एकस्य सदसद्भ्योऽपि वैलक्षण्यं न युक्तिमत् । चतुष्कोटिविनिर्मुक्तं शून्यं तत्त्वमिव स्थितम् । जातिर्जातिमतो भिन्ना न वेत्यत्र विचारिते । भिन्ना चेत्सा च गृह्येत व्यक्तिभ्योऽङ्गुष्ठवत् पृथक् । अविचारितसंसिद्धा व्यक्तिः किं पारमाणुकी । स्वरूपं परमाणूनां वाच्यं वैशेषिकादिभिः । षट्केण युगपद्योगे परमाणोः षडंशता ॥ षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः । जातिव्यक्त्यात्मकोऽर्थोऽत्र नास्त्येवातो विचारिते । विज्ञानमपि नास्त्येव ज्ञेयाभावे विचारिते । अतो माध्यमिको वक्ति सर्वं शून्यं विचारिते' इति । इति माध्यमिकपक्षस्तृतीयः । विज्ञानवादी त्वाह—शून्यत्वसाधकं प्रमाणं शून्यमेव, अथ वा अशून्यम् ; नाद्यः—शून्येन प्रमाणेन अर्थसाधनानुपपत्तेः, न द्वितीयः

शून्यत्वसाधकप्रमाणस्य अशून्यत्वे सर्वशून्यत्वव्याहतिः। किं च स्वपक्षसाधनपरपक्षदूषणादिसापेक्षवादकथायामधिकारो वा तव कथं भवेत्। विपरीतसाधनं वा किमिति न भवेत्। अतः अशून्येन शून्यत्वसाधकेन प्रमाणेन भवितव्यम्। तच्च क्षणिकविज्ञानरूपमेकं वस्तु। न चैवं घटबुद्धिः पटबुद्धिरिति भेदव्यवहारो न स्यादिति वाच्यम्, अनादिवासनाबलात् भेदव्यवहारोपपत्तेः। तस्मात्क्षणिकविज्ञानमेकमेव वस्तु। तच्चालयविज्ञानं प्रवृत्तिविज्ञानं चेति द्विविधम्। आलयविज्ञानमहमालम्बनम्, प्रवृत्तिविज्ञानं तु घटाद्याकारम्; तादृशस्य ज्ञानस्य अनादिवासनोच्छेद एव मोक्षः। तदुपायश्च शून्यं कृत्स्नं वस्तु दुःखात्मकमित्यादिभावेनैव वर्णयन्ति। तदाहुः— अत्र माध्यमिकेनोक्तं शून्यत्वं शून्यवादिना। निरालम्बनवादी तु योगाचारो निरस्यति। त्वयोक्ते सर्वशून्यत्वे प्रमाणं शून्यमेव ते। अतो वादेऽधिकारस्ते न परेणोपपद्यते। स्वपक्षस्थापनं तद्वत्परपक्षस्य दूषणम्। कथं करोत्वत्र भवान्विपरीतं वदेन्न किम्। अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसं-

वित्तिभेदवानिव लक्ष्यते । बुद्धिस्वरूपमेकं हि वस्त्वस्ति परमार्थतः ॥ प्रतिभासस्य नानात्वात् न चैकत्वं विहन्यते । परिव्राट्कामुकपशूनामेकस्यां प्रमदातनौ । कुणपः कामिनी भक्ष्यामिति तिस्रो विकल्पनाः ॥ तथाप्येकैव सा बाला बुद्धितत्त्वं तथैव च । यत्तदन्यत्तु जात्यादि तन्निराक्रियतां त्वया । क्षणिका बुद्धिरेवात्र त्रिधा भूतैर्विकल्पिता । स्वयं प्रकाशतत्त्वज्ञैर्मुमुक्षुभिरुपास्यते ' इति योगाचारपक्षः । चतुर्थः सौत्रान्तिकास्तु— यदुक्तं बाह्यं वस्तु नास्तीति तदयुक्तम्, आन्तरस्य ज्ञानस्य बाह्यस्य चार्थस्य विरुद्धधर्माध्यस्तत्वेन अभेदानुपपत्त्या ज्ञानव्यतिरिक्तपदार्थस्यावश्यमभ्युपगन्तव्यत्वात् । किं च नीलाद्यर्थस्य ज्ञानाकारत्वे अहं नील इति प्रतीतिः स्यात् । न त्विदं नीलमिति प्रतिपत्तिर्विज्ञानस्य नीलाकारव्यतिरेकात् । न च ज्ञानस्वरूपोऽपि भ्रान्त्या बहिरवभासते । तदुक्तम्— ' परिच्छेदान्तराद्योगभावो बहिरवस्थितः । ज्ञानस्याभेदिनोऽभेदप्रतिभासो ह्युपप्लवः । यदन्तर्ज्ञेयं तत्त्वं तद्बहिर्वन्न भासते ' इति वाच्यम्, बहिर्वदित्युपमानस्य बाह्यार्थनिरूपितस्य बहिः पदार्थं निराकुर्वता उपपा-

दयितुमशक्यत्वात् । न हि वसुमित्रो वन्ध्यापुत्रव-
दवभासते इति प्रेक्षावानाचष्टे । अतो ज्ञानादर्थो
भिन्न एव । नन्वेवं क्षणिकज्ञाने असमानकालस्य अ-
र्थस्य कथं ग्रहणम्, समानकालीनयोरेव ग्राह्यग्राहक-
भावदर्शनादिति चेन्न, इन्द्रियसंनिकृष्टस्य विषयस्य
उत्पाद्ये ज्ञाने स्वाकारसमर्पकतया तत्समर्पितेन चाकारे
बाह्यार्थस्य अनुमानग्राह्यत्वसंभवात् । तदुक्तम्—भिन्नकाले
कथं ग्राह्यमिति चेद्ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञाः ज्ञाना-
काराර्पणक्षमम्' इति । यथा च पुष्ट्या भोजनमनुमीयते
यथा च भाषया देशः यथा च संभ्रमेण स्नेहः
तथा ज्ञानाकारेण ज्ञेयमनुमेयम् । तथा च बाह्यार्था-
स्तित्वे अयं प्रयोगः— ये पदार्थाः यस्मिन्सति का-
दाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः अविवक्षति
अजिगमिषति च मयि वचनगमनप्रतिभासाः विवक्षु-
जिगमिषुपुरुषान्तरसंतानसापेक्षाः । तथा च विवादा-
ध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव
नीलाद्युल्लेखिन इति । तत्र आलयविज्ञानं नाम अह-
मास्पदं ज्ञानम् । नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम् ।

तदुक्तम् ‘ तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ’ इति । तस्मादालयविज्ञानसंतानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुः बाह्यार्थो ग्राह्य एव । न च वासनापरिपाकात् प्रत्ययकादाचित्कत्वे कदाचिदुत्पादयन्तीति वाच्यम् । विज्ञानवादिना वासनानामनेकसंतानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिविज्ञानजननशक्तिः, तस्याश्च स्वकार्ये प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसंतानवर्तिपूर्वक्षणः कक्षीक्रियते । सन्तानान्तरनिबन्धनत्वानङ्गीकारात् । ततश्च प्रवृत्तिविज्ञानजनकालयविज्ञानावर्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानसंतानवर्तिनः क्षणाः समर्था एवेत्यङ्गीकर्तव्यम् । न चेदेकोऽपि न समर्थः स्यात् आलयविज्ञानसंतानवर्तित्वाविशेषात् सर्वे समर्था इति स्वीकारे कार्यक्षेपानुपपत्तेः । ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धसुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान्प्रतीत्योत्पद्यन्ते इत्यनिच्छताप्यहंमतिना स्वानुभूतिमनाच्छाद्य परिच्छेतव्यम् । ते च चत्वारः प्रत्यया प्रसिद्धाः आल-

म्बनसमनन्तरसहकार्याधिपतिरूपाः । आलम्बनं विषयः समनन्तरं पूर्वज्ञानं सहकारी आलोकः अधिपतिश्चक्षुरादिः' इति । तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासरूपस्य च तस्य नीलाद्यालम्बनप्रत्ययात् नीलाकारता भवति । समनन्तरप्रत्ययात् प्राचीनज्ञानोद्बोधरूपता । सहकारिप्रत्ययादालोकात्स्पष्टता चक्षुषो अधिपतिप्रत्ययात् विषयग्रहणनियमः उदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तौ तन्नियामकं चक्षुरधिपतिर्भवति, लोके नियामकस्याधिपतित्वोपलम्भात् । एवं चित्तचैत्तात्मकानां सुखादीनां च कारणानि द्रष्टव्यानि । सोऽयं चित्तचैत्तात्मकः स्कन्धः पञ्चविधः । रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः । तत्र एभिर्विषया रूप्यन्ते इति करणव्युत्पत्त्या रूप्यन्ते इति कर्मव्युत्पत्त्या च सविषयाणीन्द्रियाणि रूपस्कन्धः । आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः । प्रागुक्तस्कन्धद्वयसंबन्धजन्यसुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः । गौरित्यादिशब्दोल्लेखिसविषयकज्ञानप्रवाहः संज्ञास्कन्धः । वेदनास्कन्धो रागादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च

संस्कारस्कन्धः । तदुक्तं पञ्चस्कन्धा भवन्त्यत्र द्वादशायतनानि च । सर्वेषामपि बौद्धानां तथाष्टादश धातवः । ज्ञानसंस्कारसंज्ञानां वेदनारूपयोरपि । समूहः स्कन्धशब्दार्थवत्तत्संततिवाचकः । ज्ञानसंततिरेवात्र विज्ञानस्कन्ध उच्यते । संस्कारस्कन्ध इत्युक्तो वासनानां च संततिः । सुखदुःखात्मिका बुद्धिस्तथापेक्षात्मिकी सदा ॥ वेदनास्कन्ध इत्युक्तः संज्ञास्कन्धस्तु नाम यत् । रूपस्कन्धो भवत्यत्र मूर्तभूतस्य संहतिः ॥ परिदृश्यमानस्तम्भकुम्भादिकं तु रूपस्य मूर्तभूतस्योपचयः । तत्र तदात्मके स्तम्भकुम्भादौ पृथिव्यंशमादाय स्थैर्यरूपादिकं अबंशेन द्रवत्वस्नेहादितेजोंशेनोष्णत्वादि वायुधातुना– अनुष्णाशीतवेगादि । तदुक्तम्–रूपस्योपनयस्तम्भकुम्भादिरणुकल्पितः । पृथिव्याः स्थैर्यरूपादि द्रवत्वादि भवेदपाम् । उष्णत्वं तेजसो धातोर्वायुधातोस्त्वशीतता । एषां चतुर्णां धातूनां वर्णगन्धरसौजसाम् । पिण्डजाताः पृथिव्याद्याः परमाणुरूपा अमी । तदिदं सर्वं दुःखायतनं दुःखसाधनं चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं संपादयेत् । अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वारः । आर्यस्य बुद्धस्याभि-

गतत्वान्निरूपितवानिति। तत्र दुःखं प्रसिद्धम्। समुदायो दुःखस्य कारणम् तद्विविधम्; प्रत्ययोपनिबन्धो हेतूपनिबन्धश्चेति। तत्र प्रत्ययोपनिबन्धः कारणसमवायः। यथा बीजहेतुरङ्कुरो धातूनां चतुर्णां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धं च जनयति। अप्तु स्नेहं रसं च, तेजोधातुःरूपमौष्ण्यं च, वायुधातुः स्पर्शं चलनं च, आकाशधातुरवकाशं शब्दं च, ऋतुधातुर्यथायोगं बुद्ध्यादिकमिति। हेतूपनिबन्धश्च कारणपरम्परया कार्योत्पत्तिः। यथा बीजादङ्कुरम्, अङ्कुरात्काण्डम्, काण्डान्नालम् नालाद्गर्भः, ततः शूकः, ततः पुष्पम् ततः फलमिति। एतादृशप्रत्यययोः निबन्धहेतूपनिबन्धयोर्निरोधः। अभावः तस्मिन्सति विमलज्ञानोदयो वा मुक्तिः। तन्निरोधोपायो मार्गः। स च तत्त्वज्ञानम्, तच्च प्राचीनभावनाबलाद्भवतीति सौत्रान्तिकः पक्षः पञ्चमः।

वैभाषिकास्तु बाह्यार्थाः प्रत्यक्षा इत्यवश्यमभ्युपगन्तव्यम् अन्यथा व्याप्तिसंवेदनस्थानालाभेन प्रत्यक्षतः हेतुसाध्यव्याप्तिग्रहणपूर्वकं ज्ञेयानुमानप्रवृत्त्यनुपपत्तेः अनुभवविरुद्धा चानुमेयता अतः प्रत्यक्षभूतो बाह्यार्थः। स च

बाह्यार्थः परमाणुपुञ्ज एव न तु तदारब्धमवयव्यन्तरम् वनादिवत् । तदुक्तं प्रत्यक्षत्वं तु बाह्यस्य कश्चिदेवानुमेयता । पूर्वापरानुभावेन पुञ्जीभूताः सहस्रशः ॥ परमाणव एवात्र बाह्यार्था वनवात्स्थिताः । दूरादेव वनं पश्यन् गत्वा तस्यान्तिकं पुनः । न वनं पश्यति कापि वल्लीवृक्षातिरेकतः ॥ मही घटत्वमायाति कपालत्वं तु ते घटाः । कपालानि च चूर्णत्वं तत्पुनः परमाणुताम्' इति । स द्विविधः ग्राह्योऽध्यवसेयश्चेति । तत्र ग्रहणमपि द्विविधम् निर्विकल्पकम्, सविकल्पकं चेति । तत्राद्यं प्रमाणं तदुक्तम्—कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम् । विकल्पो वस्तुनिर्भासादसद्वादादुपप्लवः ॥ ग्राह्यवस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा । न तद्वस्तुनि तन्मानं शब्दलिङ्गेन्द्रियादिजम्' इति । ननु अप्रमाणभूतात्सविकल्पकात्कथं संवादप्रवृत्तिरिति चेत् इत्थं— मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य मणिप्राप्तिवत्पारम्पर्यात् अर्थप्रतिबन्धोपपत्तेः । चतुर्णामपि बौद्धानामैक्यमध्यात्मनिर्णये ॥ व्यावहारिकभेदेन विवदन्ते परस्परम् । बुद्धितत्त्वाश्रिता बोधा बुद्धिवृत्तिर्द्विधा मता ॥

ज्ञानाज्ञानात्मिका चेति तत्र ज्ञानात्मिका निजा। मूलाज्ञाने निमित्तं तु स्कन्धायतनधातुभाः। शुद्ध-बुद्धयवशेषो हि मोक्षो बुद्धमुनीक्षितः॥ तामन्तर्द्वयवर्जितां निरुपमामाकाशवन्निर्मलाम् । प्राज्ञैगण्यमितां जनस्य जननीं श्रृण्वन्तु बुद्ध्यार्थिनः इति। हेयोपादेयतत्त्वं च मोक्षोपायं च वेत्ति यः। स एव नः प्रमाणं स्यान्न सर्वज्ञस्त्वयेरितः॥ दूरं पश्यतु वा मा वा तत्त्व-मिष्टं प्रपश्यतु। प्रमाणं दूरदर्शश्चेत् वयं गृध्रानुपास्महे। देशे पिपीलिकादीनां संख्याज्ञः कश्चिदस्ति किम्। सर्व-कर्तृत्वमीशस्य कथितं नोपपद्यते॥ यदि स्यात्सर्वक-र्तासौ अधर्मेऽपि प्रवर्तयेत्। अयुक्तं कारयल्लोँकान्कथं युक्ते प्रवर्तयेत्॥ उपेक्ष्यैव हि साधूनां युक्ता साधौ क्रियागमे। न क्षतक्षारविक्षेपः साधूनां साधु चेष्टितम्॥ ईश्वरेणैव शास्त्राणि सर्वाण्यपि कृतानि चेत्। कथं प्रमाणं तद्वाक्यं पूर्वापरपराहतम्॥ कारयेद्धर्ममात्रं चेदेष शास्त्रप्रवर्तकः। कथं प्रादेशिकस्यास्य सर्वकर्तृत्वमुच्यते। ईशः प्रयोजनाकाङ्क्षी जनान्सृजति वा न वा॥ काङ्क्षते चेदसंपूर्णः नो चेन्नैव प्रवर्तते। प्रवर्तते किमीहस्ते भ्रा-

न्तयन्निष्प्रयोजने ॥ छागादीनां पुरीषादेः वर्तुलीकर-णेन किम् । क्रीडार्थोऽयं प्रवृत्तिश्चेत् क्रीडते किं नु बालवत् ॥ अजस्रं क्रीडतस्तस्य दुःखमेव भवत्य-लम् । तप्तलोहादितापाद्यैरीशेनाल्पसुखेच्छुना । प्राणिनो नरके कष्टे बलप्राणैर्वियोजिताः । वरप्रदानशक्तश्चेत् बृह्महत्यादिकारिणे ॥ स्वर्गं दद्यात्स्वतन्त्रः सन्नरकं सोमयाजिने । कर्मानुगुणदाता चेदीशः स्यादखिलो जनः । दाने स्वातन्त्र्यहीनः सन्सर्वेशः कथमु-च्यते ॥ एवं नैयायिकाद्युक्तसर्वज्ञेशनिराक्रिया । हेयोपादेयमात्रज्ञः प्राह्यो बुद्धमुनिस्ततः । चैत्यं बन्देत चैत्याद्या धर्मा बुद्धागमोदिताः । अनुष्ठेया न या-गाद्या वेदाद्यागमचोदिताः । क्रियायां वेदतायां च योगे शून्यपदे क्रमात् ॥ वैभाषिकादयो बौद्धाः स्थिताश्चत्वार एव ते इति । एवं बुद्धिवैभवपरिकल्पितस्य यौक्तिकमार्गं उत्तरोत्तरदोषग्रस्तस्य मूलप्रमाणशून्यस्य अव्यवस्थिततया यौक्तिकमार्गमुपेक्ष्य वेदप्रामाण्यमीश्वरं चाभ्युपगम्यैव जाबालिप्रतिपादितचार्वाकमतदूषणव्या-जेन सकलावैदिकमतं रामो दूषितवान् । तत्र च 'एकः

पालयते लोकमेकः पालयते कुलम् । मज्जत्येको हि निरये एकः स्वर्गे महीयते' इत्यनेन फलवैचित्र्यव्यवस्थापकौ धर्माधर्मौ अवश्यं स्वीकर्तव्याविति प्रतिपादनात् प्रत्यक्षमात्रप्रामाण्यवादिनः चार्वाकस्य दूषणम् । अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः । शतं क्रतूनामाहृत्य देवराट् त्रिदिवं गतः इत्यादिना क्रत्वादीनां देहान्तरोपभोग्यफलत्वप्रतिपादनात् देहात्मवादस्य विहितयागादिक्रियाफलाभावस्य च निराकरणात् चार्वाकस्य क्षपणकस्य च मतदूषणम् ॥

यथा हि चोरस्तथाहि बुद्ध-
स्तथागतं नास्तिकमत्र विद्धि ।

इत्यनेन योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा इति स्मृतिसिद्धात्मापहारप्रयुक्ततया चतुर्णामपि बौद्धानां मतदूषणम् ।

सत्यं च धर्मं च पराक्रमं च
भूतानुकम्पां प्रियवादितां च ।

द्विजातिदेवातिथिपूजनं च
पन्थानमाहुस्त्रिदिवस्य सन्तः ॥
त्वत्तो जनाः पूर्वतरेऽवराश्च
शुभानि कर्माणि बहूनि चक्रुः ।
जित्वा सदेमं च परं च लोकं
तस्माद्द्विजाः स्वस्ति हुतं कृतं च ॥

एतैः श्लोकैः अस्ति परलोकः तत्साधनीभूतं वेदविहितं कर्मजातं तद्बोधकं शास्त्रं च प्रमाणमिति प्रतिपादनात् सर्वेषामवैदिकमतानां दूषणं चोक्तं भवति । तत्प्रकारश्च— प्रमाणमेव वेदाः स्युः सर्वज्ञेशकृतत्वतः । स एव कर्मफलदो जीवानां पारिशेष्यतः । जीवा वा जीवकर्माणि प्रकृतिः परमाणवः । नेशते ह्यत्र जीवानां तत्र कार्यफलार्पणे ॥ जीवाः कर्मफलावाप्तौ शक्ताश्चेत्स्वसुखे रताः । अप्रार्थितानि दुःखानि वारयन्तु प्रयत्नतः ॥ अशक्तान्यत्र कर्माणि जीवानां स्वफलार्पणे अचेतनत्वावगतेः स्वर्गादिफलभूमिषु ॥ नाचेतनत्वात्प्रकृतेः फलदातृत्वसंभवः । अचेतनाः फलं दातुमशक्ताः परमाणवः ॥ कालोऽप्यचेतनस्तेषां न हि कर्मफलप्रदः । अतोऽन्यः फलदो लोके

भवत्येभ्यो विलक्षणः ॥ स तु प्राणिविशेषांश्च देशानपि तदाश्रयान्। जानन्सर्वज्ञ एवेष्टो नान्यो बौद्धादिसंमतः। अजानन्प्राणिनो लोकान्हेयोपादेयमात्रवित्। प्रादेशिको न सर्वज्ञो नास्मदादिविलक्षणः। वेदैकदेशं दृष्ट्वा तु दृष्टार्थं चैष्टभादिकम्। अदृष्टयोश्च विश्वासः कार्यः स्वर्गापवर्गयोः। कारीरीष्ट्यर्थपुष्टिश्च द्रष्टव्या द्रव्यनिर्णये। ज्योतिःशास्त्रोक्तकालस्य ग्रहणं तन्निदर्शनम्। इष्टैकदेशप्रामाण्यं यत्तूक्तं सौगतादिना ॥ तच्च वेदादपहृतं सर्वलोकप्रतारकैः। मन्त्रव्याकरणं दृष्ट्वा मन्त्रा विरचिताः पुनः। लिपिसंमिश्रजप्तास्ते सिद्धमन्त्रास्त्वया कृताः। बौद्धागमेभ्यो दृष्टार्था नाहृता वैदिकैः क्वचित् ॥ वेदस्यैव षडङ्गानि यतः शीक्षादिकानि वै। नान्यागमाङ्गता तेषां न क्वाप्युक्ता परैरपि। अतो वेदबलीयस्त्वं नास्तिकागमसंचयात्। तन्मतेन बाह्यार्थोऽपि न संभवति। परमाणुपुञ्जः परमाणुस्वरूपो वा तदतिरिक्तो वा। आद्ये प्रत्यक्षत्वानुपपत्तिरेव। द्वितीये अधिष्ठातारं कंचन अपेक्ष्य पुञ्जीभवन्ति अनपेक्ष्य वा। आद्येऽपि अधिष्ठाता स्थायी क्षणिको वा। आद्ये अपसिद्धान्तः। द्वितीये

अस्थिरस्य अन्याधिष्ठातृत्वानुपपत्तेः, अचेतनानां परमाणूनामधिष्ठातारमन्तरा पुञ्जीभावानुपपत्तेश्च । किं च परमाणुपुञ्जत्वे घटादेरेकदेशस्याकर्षणेन सर्वस्य अनाकर्षणप्रसङ्गः । तस्मान्न परमाणुपुञ्जो बाह्यार्थ इति सिद्धान्तः । जलानलपरीक्षादौ संवादो वेदवेदि । गलहस्तितनास्तिकश्च क विघं कुरुते नते । सत्येव पतियोगादौ गर्भादेरधुनोदयात् । आक्षिप्तपङ्क्तिरनास्तिकाः । कर्म न किं मम भिनत्ति याचतः स्वगयाश्राद्धं भूतस्याविश्य कंचन । नानादेशजनोपज्ञाः प्रत्येषि न कथाः कथम् । नीतानां यमदूतेन नामभ्रान्तेरुपागतौ । श्रद्धत्से संवदन्ती न परलोककथा कथम् । तस्मात् एवं वैदिकमतावलम्बनेन वैदिकमार्गो न दूषणीयः ।'

इति ब्रुवन्तं वचनं सरोषं
रामं महात्मानमदीनसत्त्वम् ।
उवाच तथ्यं पुनरास्तिकं च
सत्यं वचः सानुनयं च विप्रः ॥

न नास्तिकानां वचनं ब्रवीम्यहं
न नास्तिकोऽहं न च नास्तिकं च ।

समीक्ष्य कालं पुनरास्तिकोऽभवं
भवेय काले पुनरेव नास्तिकः ॥
स चापि कालोऽयमुपागतः शनै-
र्यथा मया नास्तिकवागुदीरिता ।
निवर्तनार्थं तव राम कारणा-
त्प्रसादनार्थं च मयैतदीरितम् ॥

इति । दशोत्तरशततमे—तदनु विविधोपायैरपि अनिवृत्तहृदयं कुपितं श्रीरामभद्रमवलोक्य कुलपुरोहितो वसिष्ठः आकाशप्रभवो ब्रह्मेत्यारभ्य इक्ष्वाकुकुलपरम्परामुक्त्वा

इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ।
स राघवाणां कुलधर्ममात्मनः
सनातनं नाद्य विहातुमर्हसि ।
प्रभूतरत्नामनुशाधि मेदिनीं
प्रभूतराष्ट्रां पितृवन्महायशाः ॥

इति प्रसादयामास ॥

एकादशोत्तरशततमे—

वसिष्ठस्तु तदा राममुक्त्वा राजपुरोहितः ।
अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः ॥

पुरुषस्य हि जातस्य भवन्ति गुरवस्त्रयः ।
आचार्यश्चैव काकुत्स्थ पिता माता च राघव ॥

पिता ह्येनं जनयति पुरुषं पुरुषर्षभ ।
प्रज्ञां ददाति चाचार्यः तस्मात्स गुरुरुच्यते ॥

सोऽहं ते पितुराचार्यस्तव चैव परंतप ।
मम त्वं वचनं कुर्वन्नातिवर्तेः सतां गतिम् ॥

इमा हि ते परिषदः श्रेणयश्च द्विजास्तथा ।
एषां तात चरन्धर्मं नातिवर्तेः सतां गतिम् ॥

वृद्धाया धर्मशीलाया मातुर्नार्हस्यवर्तितुम् ।
अस्यास्तु वचनं कुर्वन् नातिवर्तेः सतां गतिम् ॥

एतेन गुरुमात्रादीनामभिमतं कुर्वन्पुरुषः सद्गतिं नातिक्रामति । अतस्तेषां वचनमवश्यं कर्तव्यम् । तथा चानुशासनिके—'पितुर्मातुर्गुरूणां च आचार्यस्य च सर्वदा । हितं वाप्यहितं वापि तत्कार्यमविशङ्कया' इति । इत्थमाचार्यप्रजामात्रादिवचनमनतिलङ्घनीयम् अतः समुल्लङ्घ्यापि पितृवचनं मत्प्रार्थनां सफलीकुर्विति गुरुणा वसिष्ठेनोक्तो रामभद्रस्तमित्थमुवाच—

यन्मातापितरौ वृत्तं तनये कुरुतः सदा ।
न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम् ॥

यथाशक्ति प्रदानेन स्नापनाच्छादनेन च ।
नित्यं च प्रियवादेन तथा संवर्धनेन च ॥

इति । अयमर्थो मनुना दर्शितः— 'यन्मातापितरौ क्लेशं सहेते संभवे नृणाम् । न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥' इति ।

भरतस्य वचः कुर्वन्याचमानस्य राघव ।
आत्मानं नातिवर्तेस्त्वं सत्यधर्मपरायण ॥

अनुरक्तस्य भ्रातुर्वचनकरणे स्वात्महितमेव कृतं भवतीत्युक्त्वा भ्रातुरात्माभिन्नत्वं सूचितम् । तथा च मनुः— 'आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । माता पिथ्व्या मूर्तिस्तु भ्रातरो मूर्तिरात्मनः ॥

स हि राजा जनयिता पिता दशरथो मम ।
आज्ञातं यन्मया तस्य न तन्मिथ्या भविष्यति ॥

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् ।
अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥

नन्वस्मिन्वचने पित्राज्ञया प्रतिज्ञातमेव परिपालनीयमिति प्रतीयते। तदनुपपन्नम्, अभिवादनप्रकरणस्थाने 'आचार्यप्राचार्यसंनिपाते प्राचार्यायोपसंगृह्योपसंजिघृक्षेदाचार्यं प्रतिषेधेदितरः' इति आपस्तम्बसूत्रेण प्राचार्यस्य प्राबल्यावगमेन तद्वचनस्यैव कर्तव्यत्वात्। एवं वनगमने पित्राज्ञामात्रं राज्याभिषेके तु प्राचार्यमातृप्रजादीनामनुज्ञेति। विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वमिति न्यायेन वसिष्ठादिवाक्यस्यैव कर्तव्यत्वाच्च। अतः उभयथापि वसिष्ठवाक्यस्यैव कर्तव्यत्वेन कथं पितृवचनपरिपालनप्रतिज्ञेति चेन्न। आचार्याधीनः स्यादन्यत्र पतनीयेभ्य इत्यापस्तम्बसूत्रेण पातित्यापादककर्मव्यतिरिक्तकर्मण्येव आचार्याधीनत्वप्रतिपादनेन, तस्मात्पितुर्वचः कार्यं न विचार्यं कदाचन। पातकान्यपि पूयन्ते पितुर्वचनकारिणः इति चिरकारिवचनात् पितृवाक्यकरणे पातकनिवृत्त्यवगमेन परशुरामादिभिः पित्राज्ञया महापातकरूपमात्रादिवधकरणेन च आज्ञाविषये पितुरतिप्रबलत्वात् तद्वचनमेव परिपालनीयम्। आचार्यप्राचार्येत्यादिवचनं तु अभिवादनमात्रविषयम्। अत

एव रामेण ताटकावधे आचार्यस्य विश्वामित्रस्य वचनं पितृवचनगौरवादेव कृतमित्यवगम्यते। तथा हि—

पितुर्वचननिर्देशात्पितुर्वचनगौरवात्।
वचनं कौशिकस्येति कर्तव्यमविशङ्कया॥

अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना।
पित्रा दशरथेनाहं नावज्ञेयं च तद्वचः॥

सोऽहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्मवादिनः।
करिष्यामि न संदेहस्ताटकावधमुत्तमम्॥'

इति। यदुक्तं भूयसोऽनुग्रहन्यायेन इति तन्न, तत्र मातुराज्ञाकरणे स्वातन्त्र्यं नास्तीति प्राक्प्रतिपादितम्। प्रजाभिरपि—

काकुत्स्थमभिजानीमः सम्यग्वदति राघवः।
एषोऽपि हि महाभागः पितुर्वचसि तिष्ठति॥
अत एव न शक्ताः स्म व्यावर्तयितुमञ्जसा।

इत्यादिना वनगमनस्यैव अनुज्ञानाच्च भूयोऽनुग्रहन्यायानवतारात्। तस्मात् पितृवचनमेव परिपालनीयमिति यदुक्तं तद्युक्तमेव। एवमनेकविधोपायैरप्यशक्यनिवर्तनं

रामभद्रमवलोक्य तत्प्रसादनोपायं कर्तुकामो भरतः सुमन्त्रमिदमादिदेश—

इह मे स्थण्डिले शीघ्रं कुशमास्तर सारथे ।
आर्यं प्रत्युपवेक्ष्यामि यावन्मे न प्रसीदति ॥

अनेन सर्वोपायेनापि गुरुजनः प्रसादनीय इति सूचितम् । तथा चोशना— 'यो वाचयति या सूते येन विद्योपदिश्यते । ज्येष्ठभ्राता च भर्ता च पञ्चैते गुरवस्तथा । आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः । पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ' इति । अथाश्रमकुटीपुरतः सुमन्त्रविरचितकुशास्तरणे प्रत्युपविष्टं भरतमवलोक्य रामस्तमित्थमुदाजहार—

किं मां भरत कुर्वाणं तात प्रत्युपवेक्ष्यसि ।
ब्राह्मणो ह्येकपार्श्वेन प्राणान्रोद्धुमिहार्हति ॥
न तु मूर्धावसिक्तानां विधिः प्रत्युपवेशने ।

अनेन प्रत्युपवेशनं दरिद्रैर्ब्राह्मणैरेव कार्यं न मूर्धावसिक्तैरिति सूचितम् । अत एव भरतवचनम्—

अनाहारो निरालोको धनहीनो यथा द्विजः ।

इति। तत्समुत्तिष्ठ महाभाग भरत विसृज तदिदं दारुणं व्रतं प्रयाहि सत्वरं कुलपरंपरापरिपालितामस्मद्राजधानीमयोध्यामित्यभिहितो भरतो निजगाद— भो भोः पौरजानपदा जनाः किमिति वाचंयमतामवलम्ब्य तिष्ठथ यत्समुचितं तदार्यमनुशासथ इति। तदनु पितृवचनगौरवेण वनवासे कृतनिश्चयं रामं विनिवर्तयितुं न वयं पारयाम इति पौरजनसमुदीरितवचनमाकर्ण्य रामभद्रो भरतमेवमवादीत्—

एवं निबोध वचनं सुहृदां धर्मचक्षुषाम्।
एतच्चैवोभयं श्रुत्वा सम्यक्संपश्य राघव॥

उत्तिष्ठ त्वं महाभाग मां च स्पृश तथोदकम्।

अत्र प्रत्युपवेशनप्रायश्चित्तत्वेन मां च स्पृश तथोदकमित्युक्त्या अशुद्धित्वे निमित्ते गुरुजनसंस्पर्शनमुदकोपस्पर्शनं च प्रायश्चित्तमुक्तं भवति। तदनु कृतोदकस्पर्शो भरतः मन्त्रिपुरोहितादीनेवमवोचत्—

न याचे पितरं राज्यं नानुशासामि मातरम्।
आर्यं परमधर्मज्ञमभिजानामि राघवम्॥

यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः ।
अहमेव निवत्स्यामि चतुर्दश समा वने ॥

अत्र राज्यं मया न याचितं राज्यं प्रार्थनीयमिति मातरमपि नानुशासितवान् राज्यार्हो राम एव इति तु परं जानामि यदि पित्राज्ञया रामेण वने वस्तव्यमिति निर्बन्धः तदा तच्छिष्यः अहमेव वने निवत्स्यामि रामस्तु राज्यं परिपालयत्विति कथनेन गुरुणा कर्तव्यं कर्म शिष्यहस्तात्कारितं चेत् गुरुणा कृतं भवतीति सूचितम् । विष्णुपुराणे— 'पूर्वमेवं मुनिगणैः समयो यः कृतो द्विज । वैशम्पायन एवं तु तं व्यतिक्रान्तवांस्तदा ॥ स्वस्तीयं बालकं सोऽथ यथाभ्रष्टमघातयत् । शिष्यानाह च हे शिष्याः ब्रह्महत्यापहं व्रतम् । चरध्वं मत्कृते सर्वे न विचार्यमिदं ततः । ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः । चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम' इति । ततो भरतवचनेन संजातविस्मयो रामस्तं जनमिदमाह—

विक्रीतमाहितं क्रीतं यत्पित्रा जीवितं मम ।
न तल्लोपयितुं शक्यं मया वा भरतेन वा ॥

अनेन पुत्रक्रयविक्रयार्हता पितुरस्तीति सूचितम् । तथा च बोधायनः 'शोणितशुक्लसंभवो मातापितृनिमित्तकः तस्य प्रदानपरित्यागविक्रयेषु मातापितरौ भवतः' इति ।

उपाधिर्न मया कार्यो वनवासे जुगुप्सितः ।

अत्र क्रयविक्रयादियोग्यैः पुत्रैः पितृकृतव्यवस्थायामेव स्थेयम्, न तु अतिजुगुप्सितप्रतिनिधिकरणेन तल्लोपः कर्तव्यः, तथा सति पितुरसत्यप्रतिज्ञत्वं लक्षणबाधकमस्तीति तात्पर्यम् । अत एव भरतं प्रति सिद्धर्षिवचनम् ।

कुले जात महाप्राज्ञ महाव्रत महायशः ।
ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ॥

सदानृणमिमं रामं वयमिच्छामहे पितुः ।
अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥

इति ।

जानामि भरतं क्षान्तं गुरुसत्कारकारिणम् ।
सर्वमेवात्र कल्याणं सत्यसंधे महात्मनि ॥

तदाहमपि निर्वर्तितवनवासः समागत्य निजराजधानी-

मवश्यमनेन भ्रात्रा सह पृथिवीं पालयिष्यामि ॥ द्वादशो-त्तरशततमे—इति सरसतरमभिभाषमाणयोः श्रीरामभद्रभरतयोरन्यादृशं समागममवलोक्य विस्मितहृदयाः महर्षिसिद्धविद्याधरगन्धर्वाः सानन्दमेवं प्रशशंसुः ।

स धन्यो यस्य पुत्रौ द्वौ धर्मज्ञौ धर्मविक्रमौ ।
श्रुत्वा वयं हि संभाषामुभयोः स्पृहयामहे ॥

अथ पित्राज्ञापरिपालनेनानृणं रामभद्रं वयमिच्छामः तद्भवतापि पितृऋणमवेक्षमाणेन परिग्राह्यं रामवचनमिति । दशकन्धरवधाभिलाषेण भरतमुपदिश्य यथागतं गतेषु महर्षिसिद्धगन्धर्वेषु तद्वचनश्रवणजनितहर्षनिर्भरहृदयं श्रीरामं परित्रस्तगात्रो भरतः कृताञ्जलिरिदमुवाच—

राजधर्माननुप्रेक्ष्य कुलधर्मानुसंततिम ।
कर्तुमर्हसि काकुत्स्थ मम मातुश्च याचनाम् ॥
ज्ञातयश्च हि योधाश्च मित्राणि सुहृदस्तथा ।
त्वामेव प्रतिकाङ्क्षन्ते पर्जन्यमिव कर्षकाः ॥

अनेन धार्मिकमेव राजानं प्रजाः काङ्क्षन्तीति सूचि-

तम्। तथा च कामन्दके—'धार्मिकं पालनपरं सम्यक्परपुरंजयम्। राजानमभिमन्यन्ते प्रजापतिमिव प्रजाः' इति। तदधुना त्वमेव राज्यं परिपालय त्वदनुरक्ताः प्रजाः समनुरञ्जयेति सादरमुदीर्य निजचरणारविन्दयोर्निपतितं दरदलितकुवलयोदरसोदरद्युतिम् अरविन्ददलसुन्दरलोचनं भरतं समुत्थाप्य समुज्जृम्भितबाष्पपरिस्थगितकण्ठतया मत्तहंसस्वरो रामभद्रस्तमिदमाह—

आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या।
भृशमुत्सहसे तात रक्षितुं पृथिवीमपि॥

अनेन विनीतात्मा नृपतिः श्रेयोभाजनं भवतीत्युक्तम्। तथा च कामन्दके—'सदानुरक्तप्रकृतिः प्रजापालनतत्परः। विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते' इति।

अमात्यैश्च सुहृद्भिश्च बुद्धिमद्भिश्च मन्त्रिभिः।
सर्वकार्याणि संमन्त्र्य सुमहान्त्यपि कारय॥

तदिदानीं कामलोभपरया कैकेय्या समाचारितं वृत्तं सर्वथा मनसि मा कुर्विति वदन्तं सकलभुवनाभिरामं

रामं भरतः सविनयमिदमवादीत्—

अधिरोहार्य पादाभ्यां पादुके हेमभूषिते ।
एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥

सोऽधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च ।
प्रायच्छत्सुमहातेजा भरताय महात्मने ॥

स पादुके संप्रणम्य रामं वचनमब्रवीत् ।
चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् ॥

फलमूलाशनो वीर भवेयं रघुनन्दन ।
तवागमनमाकाङ्क्षन्वसन्वै नगराद्बहिः ॥

तव पादुकयोर्न्यस्तराज्यतन्त्रः परंतप ।
चतुर्दशे हि संपूर्णे वर्षे हि रघुनन्दन ।
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् ॥

अथ तथेति प्रतिज्ञाय सर्वथा मातरं प्रति कोपं मा कृथा मया च सीतया च शप्तासीति बाष्पपरीतलोचनेन रामचन्द्रेण समाज्ञप्तो भरतः महाराजोचितैराभरणैरलंकृत्य पादुके नियोज्य च सविनयमञ्जसा शत्रुंजयकुञ्जरकुम्भपीठे, कृतप्रदक्षिणप्रणामः, तमामन्त्रयांचकार । तदनु रामभद्रोऽपि लक्ष्मणेन सह वसिष्ठादीनभिपूज्य

गुरुजनान्परिष्वज्य सुहृज्जनं प्रणम्य कैश्चन परिजनैः शोकवेगविसृत्वराश्रुपरंपरापिहितलोचनकौसल्याद्या जननीः कथं कथंचित् सप्रणाममामन्त्र्य निजाश्रमकुटीरमेव प्रविवेश ॥ त्रयोदशचतुर्दशोत्तरशततमयोः— तदनु शिरसा गृहीतरामपादुकः वसिष्ठवामदेवजाबालिमुखान् ऋत्विक्पुरोहितान्मन्त्रिवृद्धानपि पुरत एव प्रहिण्वानः शत्रुघ्नेन सह रथमधिरूढः

प्रदक्षिणं च कुर्वाणश्चित्रकूटं महागिरिम् ।
पश्यन्धातुसहस्राणि रम्याणि विविधानि च ॥
प्रययौ तस्य पार्श्वेन ससैन्यो भरतस्तदा ।

अनेन पुण्यवनस्पतिपर्वतादयः प्रदक्षिणनमस्कारादिभिः पूजनीया इति सूचितम् । तच्च प्रागेव प्रपञ्चितम् । तस्य च गिरेरदूरत एव भगवतो भरद्वाजस्य मुनेराश्रममवलोक्य रथादवरुह्य विनीतवेषः सह वसिष्ठादिभिराश्रममासाद्य शिरोवतंसीकृतमुनिचरणारविन्दः तेन च प्रहृष्टचेतसा मुनिना परिपृष्टरघुपतिसमागमवृत्तान्तो भरतः सविनयमखिलमाचचक्षे । अथ भरतवचनजनितप्रमोदमेदुरहृदयः

भरद्वाजः शुभतरं मुनिर्वाक्यमुवाच तम् ।
नैतच्चित्रं नरव्याघ्र शीलवृत्तवतां वर ॥

यदार्यं त्वयि तिष्ठेत्तु निम्ने वृष्टमिवोदकम् ।
अमृतः स महाबाहुः पिता दशरथस्तव ॥

यस्य त्वमीदृशः पुत्रो धर्मज्ञो धर्मवत्सलः ।

अनेन धार्मिकपुत्रेण सता पिता मृतोऽप्यमृत एवेति सूचितम् । तथा च श्रुतिः— 'प्रजामनुप्रजायसे तदु ते मर्त्यामृतम्' इति । इति प्रशंसन्तं स तं मुनिवतंसं समभिवाद्य निरवद्यास्तदाशिषः कृताञ्जलिर्भरतसत्तमः आमन्त्र्य मन्त्र्यधिपतिपुरोहितसहितः परितः संचलदनेकचतुरङ्गबलचरणविदलितमहीतलसत्वरमुदित्वरविसृत्वरपरागपरम्परापराकृतदिनकरकरप्रकरः पटुतरपटहपटपटारवप्रबोधितपरिसरगिरिचरपर्यन्तदर्यन्तरशायितकेसरिकृतोर्जितचकितप्रधावितसैन्यकरेणुकलितकोलाहलैः बृंहितरवोपबृंहितहेषितभटाट्टहासबधिरीकृतभुवनोदरैः सह चमूसमूहैः सकलसुरासुरसिद्धगन्धर्ववन्दितां कलिन्दनन्दि-

नीमुत्तीर्य क्रमेण भगीरथमनोरथपरिपूरणव्याजेन सक लजनपावनीकरणाय सकरुणमवनिमवतीर्णां दुरधिगमविधिसदनसौधाधिरोहणसोपानवीथिकायमानतरङ्गपरंपराम्, शंकरविशङ्कटजटापटलघटितसुधाकरचिरसहवासवशादिव नितान्तशीतलमधुरतोयाम्, शिशिरपवनवलनदोधूयमानकमलवनडोलाविहारसुखितकलहंसमालिकाम्, भगवतीं भागीरथीमपि समुत्तीर्य, शृङ्गबेरपुरं गतः, संनिकृष्टतया स्फुटतरपरिदृश्यमानसमुत्तुङ्गगोपुरसौधशृङ्गाम्, सुरासुरैरप्ययोध्यामयोध्याम्, निध्यायन्नेव तां प्रविश्य, दुर्निरोधशोकवेगसंतप्यमानमानसः सारथिमिदमुदीरयामास । सारथे पश्य पश्य या किल पुरा नगरी नवनवमनुदिनमपि विरचितमहोत्सवोत्साहनिर्भरपौरजनगरीयसी सैवेयमधुना निरानन्दजना न मनागपि मम नयनानन्दमादधाति । तथा हि, यत्र विचित्रमाल्यवसनभूषणाः तरुणाः घणघणरवमुखरमणिमयकिंकिणीगणालंकृतस्कन्धाधिरूढनिपुणाधोरणाः मदवारणाश्च विलासमन्थरमचरन् अधुना तत्र दिवसेऽपि निशास्विव निबिडबिडालपङ्क्तयः निर्भयमुलूकलोकाश्च

संचरन्ति। हन्त किमितोऽधिककष्टतरं यदियं रघुपति-विरहजनितघनतरखेदपरिदूयमानजना दुर्निग्रहाग्रहोदग्रमहाग्रहगृहीता रोहिणीव शोचनीयरूपाणि दग्धसमयसमुदयदर्कमयूखसंपर्कपरिक्वथितमितजलान्तरान्तर्निलीयमानमीनझषा कृशिता गिरिनदीव खेददायिनी हविःप्रक्षेपणक्षणपरिक्षीणच्छविः अध्वरसमिद्धहुताशनशिखेव परिगलितप्रभा समरदुर्मदरिपुनृपतिवीरविदलितपलायितपत्तिरथगजहयभटविकीर्णकवचा भग्नचमूरिव विपत्तिमापन्ना याजकजननिर्वर्तितसुत्यावसानसमयप्रशान्तमन्त्रघोषा यज्ञभूमिरिव विलीनकोलाहला पुरी पुरेव न परिदृश्यते। अपि च समदवृषभविरहविधुरां धेनुमिव दुरन्तचिन्तासमाक्रान्तां दिनकरकरनिकरमतिकररुचिनिचयरुचिरमणिगणरहितां हारलतामिव प्रभाविकलां स्वकृतसुकृतक्षरणक्षणक्षणपतनविशीर्णसौभाग्यान्तरामिव संप्राप्तदीनदशाम्, अकाण्डचण्डानिलदोधूयमानदावानलशिखाकलापलेलिह्यमानकुसुमसमुद्गतमधुकराम्, वासन्तिकलतामिव परिम्लानरूपां रघुवरविवासनसमुज्जृम्भितशोकाम्भोनिधिकृतमज्जनवणिग्जनसंक्षिप्तविपणा-

घनतया निबिडसमावृतधाराधरावलीविलीनतारागणां निशीथिनीनभस्थलीमिव निष्प्रकाशां निरादरपौरजना-धमीकृतनिश्शेषभूमिभागतया निदाघविगमसमयशि-थिलितां पानीयशालिकामिव परिष्कारहीनामिमामि-क्ष्वाकुकुलराजधानीमवेक्ष्य तूर्णमेव यत्र मे विदीर्णं मनः तन्नूनमायसमेव । अपि च इयं हि सा राजधानी दशरथरामलक्ष्मणवियोगनितान्तसंतप्तलोका स्वप्रियविप्रवासजनितखेदपर्याकुला कुलपालिकेव विलो-क्यते । अपि च विचित्रा विधातुरधरोत्तरीकरणचातुरीधु-रीणता यदद्य तत्तादृशीष्वेव राजवीथीषु विलीनमिव वादित्रनिःस्वनैर्वित्रस्तमिव वेदशास्त्रघोषैः अस्तमितमिव मांसमद्यगन्धैः प्रशान्तमिव चन्दनागरुगन्धवातैः प्रण-ष्टमिव प्रकृष्टचतुरङ्गबलगर्जितैः प्रतारितमिव मङ्गलसंगी-तनिनदैः पलायितमिव महोत्सवैः प्रसुप्तमिव पिहितक-वाटनिकेतनैः प्रस्थितमिव तरुणजनविलासयात्राभिः सर्वथा संमूढेव बधिरेव मूकेव न विराजते इति बहुविधं प्रलपन् सगद्गदपदमिदमवादीत् ।

कदा नु खलु मे भ्राता महोत्सव इवागतः ।
जनयिष्यत्ययोध्यायां हर्षं ग्रीष्म इवाम्बुदः ॥

तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः ।
संपतद्भिरयोध्यायां न विभान्ति महापथाः ॥

इति समुद्गतबाष्पनिःस्पन्दितलोचनो भरतः महाराजनिवेशनमेवाविवेश ॥

पञ्चदशोत्तरशततमे—

ततो निक्षिप्य मातॄः स अयोध्यायां दृढव्रतः ।
भरतः शोकसंतप्तो गुरूनिदमथाब्रवीत् ॥

नन्दिग्रामं गमिष्यामि सर्वानामन्त्रयेऽद्य वः ।
तत्र दुःखमिदं सर्वं सहिष्ये राघवं विना ॥

गतश्च हि दिवं राजा वनस्थश्च गुरुर्मम ।
रामं प्रतीक्ष्ये राज्याय स हि राजा महायशाः ॥

इत्यादिवचनमत्यादरभरितमाकर्ण्य सहामात्यैः वसिष्ठमुख्यैः पुरोहितैरपि साधु साध्विति सश्लाघमभ्यनुज्ञातः शिरसि विनिहितरामपादुको भरतः सारथिसमानीतं

रथमारुह्य पुरस्कृतगुरुजनः तत्क्षणमनाहूतसमागतैः सक-
लसैनिकैरखिलैरपि पौरजनैः सममभिगम्य नन्दिग्राम-
मवतीर्य रथोत्तमात् अशेषजनहितवानिदमभिहितवान् ।

'एतद्राज्यं मम भ्रात्रा दत्तं संन्यासवत्स्वयम् ।
योगक्षेमवहे चेमे पादुके हेमभूषिते ॥

भ्रात्रा हि मयि संन्यासो निक्षिप्तः सौहृदादयम् ।
तमिमं पालयिष्यामि राघवागमनं प्रति ॥

क्षिप्रं संयोजयित्वा तु राघवस्य पुनः स्वयम् ।
चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ ॥

ततो निक्षिप्तभारोऽहं राघवेण समागतः ।
निवेद्य गुरवे राज्यं भजिष्ये गुरुवृत्तिताम् ॥

राघवाय च संन्यासं दत्त्वेमे वरपादुके ।
राज्यं चेदमयोध्यां च धूतपापो भवामि च ॥

अभिषिक्ते तु काकुत्स्थे प्रहृष्टमुदिते जने ।
प्रीतिर्मम यशश्चैव भवेद्राज्याच्चतुर्गुणम् ॥'

इति ॥

अथ विधृतजटावल्कलतया मुनिजनसमानवेषो भरतः भ्रातृसौहृदातिशयेन समुत्क्षुभ्यमाणविरुदावलीपीठे भद्रपीठे—

पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा ।
सवालव्यजनं छत्रं धारयामास स स्वयम् ।
भरतः शासनं सर्वं पादुकाभ्यां न्यवेदयत् ॥

यदा हि यत्कार्यमुपैति किंचि-
दुपायनं चोपहृतं महार्हम् ।
स पादुकाभ्यां प्रथमं निवेद्य
चकार पश्चाद्भरतो यथावत् ॥

ननु पूर्वोक्तवचनैः रामभद्रदत्तपादुकापुरस्कारेण भरतो राज्यं कृतवानित्यवगम्यते । तत्र किं पादुकाप्रदाता रामो राजा अथ वा तद्दत्ते पादुके अथ वा भरतः उत न कोऽपीति; नाद्य',

भरतो भजतामद्य यौवराज्यमकण्टकम् ।

इति कैकेयीप्रार्थितस्वतन्त्रराज्यनिर्वहणाभावेन पितुरसत्य-

प्रतिज्ञत्वं स्यात् । न च परिवेत्तृतादोषः अभ्यनुज्ञापूर्वकत्वाद्भिन्नमातृप्रसूतत्वाच्च । अभ्यनुज्ञातभिन्नमातृप्रसूततः दोषाभावः पराशरेणोक्तः 'ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ॥ पितृव्यपुत्रान्सापत्नान्या नारी सुतांस्तथा । दाराग्निहोत्रसंयोगे न दोषः परिवेदनः' इति । न च पादुकाभिषेकवैयर्थ्यम्, शास्त्रतः परिवेत्तृत्वदोषाभावेऽपि पामराणां ज्येष्ठे सति कनिष्ठेन भरतेन राज्यं कृतमिति स्वस्मिन्परिवेत्तृत्वशङ्का स्यात् तद्द्वारा रामोऽपि कृतश्रीपरिग्रह इति पामराणामपि स्वपरिवेत्तृशङ्का न भवेत् । न द्वितीयः, अचेतनायाः पादुकायाः दुष्टनिग्रहशिष्टपरिपालनात्मकचेतनकार्याधिकारासंभवात् । न तृतीयः, 'दाराग्निहोत्रराज्यानि यः कुर्यादग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ स हि प्रथमजस्तस्मिन्नकृतश्रीपरिग्रहे । परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः' इति स्मृतिवचनकालिदासवचनाभ्यां परिवेत्तृदोषापत्तेः । तथा भरतस्य स्वातन्त्र्येण राज्यकर्तृत्वे

पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा ॥

इत्यादिवचनावगतपादुकापट्टाभिषेकबालव्यजनधारण-राज्यतन्त्रनिवेदनादिकमप्यनुपपन्नं स्यात् । न तुरीयः, तथा सति राज्यस्य अराजकत्वापत्त्या 'नाराजके जनपदे विद्युन्माली महास्वनः । अभिवर्षति पर्जन्यो मही दिव्येन वारिणा ॥' इत्यादीनामराजकराज्यधर्माणां प्रवृत्ति-प्रसङ्गादिति चेत् उच्यते— भरत एव स्वतन्त्रो राजा,

नन्दिग्रामेऽकरोद्राज्यं भरतो मन्त्रिभिः सह ।

इत्यादिवचनेन राज्यकरणप्रतीतेः । किं च,

पूजिता मामिका माता दत्तं राज्यमिदं मम ।
तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥

इति वचनेन भरतकर्तृकरामसंप्रदानकराज्यप्रदानाव-गमाच्च । अन्यथा

भरतो भजतामद्य यौवराज्यमकण्टकम्

इति कैकेयीप्रार्थितवरनिर्वाहाभावेन पितुरसत्यप्रतिज्ञत्वं स्यात् । रामश्चतुर्दशसंवत्सरानन्तरं निःशङ्कमागत्य राज्यं यथाङ्गीकुर्यात् ।

एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ।
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमंस्यते ।

इति कौसल्यावचनावगतकनिष्ठोपभुक्तराज्यप्रतिषेधो यथा न भवेत् यथा च कुलक्रमागतज्येष्ठपुत्रराज्याभिषेकरूपधर्मातिक्रमो न भवेत् लोकापवादश्च यथा न स्यात् इत्येतदभिप्रायकत्वात् । तस्माद्भरत एव राजा । अत एव,

स काममनवाप्यैव रामपादावुपस्पृशन् ।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ॥

इति वचनमपि संगच्छते ॥

षोडशोत्तरशततमे— तदनन्तरमनधिगतमनोरथे भरते निजराजधानीमधिगते निरतिशयतपःप्रबन्धनिर्धूतकल्मषैः महर्षिभिः सह तपोवने निवसन् श्रीरामभद्रः तत्र चित्रकूटाश्रमेषु साशङ्कं स्वमालोकय भ्रुकुटिरचन-

नयनवलनकराङ्गुलीप्रदर्शनपुरःसरं किमपि किमपि शनैः शनैः कर्णपुटेषु मिथः कथयतां तपोधनानां तेषामौत्सुक्यमालक्ष्य रामः स्वात्मनि शङ्कितः

कृताञ्जलिरुवाचेदमृषिं कुलपतिं तदा।

भगवन्निदमृषिमण्डलमकाण्ड एव किञ्चिदपि अनाविष्कृतवचनमप्रकाशितानिदानं केवलमन्योन्यमेव रहःकथनैः सावहित्थमुखवर्णैश्च नितान्तमाकुलमिव विलोक्यते, तद्ब्रवीतु भवान् प्रमादवशेन किं मया किञ्चिदतिक्रान्तं किमुत लक्ष्मणेन महर्षिजनेषु निजाभिजनाननुरूपं किञ्चिदाचरितं किं नु वा मुनिजनशुश्रूषमाणेषु विदेहनन्दिन्या किञ्चिदयुक्तमेव कर्म निर्वर्तितम् तद्भगवानौत्सुक्यमूलकथनेन परिहरतु महतीं ममाशङ्कामिति प्रसादयामास।

अथर्षिर्जरया वृद्धस्तपसा च जरागतः।
वेपमान इवोवाच रामं भूतदयापरम्॥

वत्स रामचन्द्र त्रिलोकीविदितनयायाः जनकतनयायाः ब्राह्मणेषु, विशिष्य तपोधनेषु परमस्मासु कुतो भवेदपकारलेशसंभावना, परं तु वयं त्वन्निमित्तमेव समुत्सुकाः स्मः यदत्र वित्रासितत्रिभुवनः जनस्थानकृतावस्थानः तापसरुधिरपारणपरायणो दशवदनानुजः खरो नाम नीचरजनीचरपतिस्त्वदागमनमारभ्य त्वद्दर्शनजनितसंभ्रमः स्वानुचरान्निशाचरानादिश्य तापसाश्रमेषु कचिदाकस्मिकभीषणभाषणैः क्वचन विकटभ्रुकुटीरचनैः क्वचिदपि देवयजनभूमिषु रुधिरवर्षैः दुःसहतरैरितरैरुपद्रवशतैरस्मानतीव परिबाधते । तदधुना तापसैः सह बहुमूलफलोदकमध्युषितचरमन्यमाश्रममाश्रयिष्ये यदि तत्रापि सममस्माभिरागमने मनः तदा सजानकीलक्ष्मणः सत्वरं प्रतिष्ठस्व सर्वथा समर्थस्यापि तव सकलत्रस्य न समुचितोऽत्र वने निवासः इत्यभिधाय कुलपतौ प्रस्थिते रघुपतिरपि मुनिजनविरहजनितखेदः स्वमाश्रमं समाश्रयत ॥

सप्तदशोत्तरशततमाष्टादशोत्तरशततमयोः— यदनु राघवोऽपि प्रस्थितेषु तपोधनेषु दुरन्तचिन्तासमा-

श्रान्तः भरतसैनिकस्कन्धावारनिवेशनैः तत्र तत्र पति-
तविपुलगजवाजिकरीषराशिभिः कृतोपमर्दोऽयमाश्रमः
भ्रात्रादिनिजेष्टजनसमागमस्थलदर्शनेन मुहुरपि शोचतो
मम नैव स्मृतिरन्येति । तदधुना नायमाश्रमो वासयोग्य
इति विचिन्तयन् जानकीलक्ष्मणसहितो महामुनेराश्र-
ममाससाद ॥

सोऽत्रेराश्रममासाद्य तं ववन्दे महायशाः ।
तं चापि भगवानत्रिः पुत्रवत्प्रत्यपद्यत ॥

अथ भगवानत्रिमुनिः चिराय समागतस्य रामभद्रस्य
ससंभ्रममर्घ्यपाद्यकन्दमूलफलोपहारेण सादरमातिथ्यवि-
धिमभिनिर्वर्त्य कठोरतपश्चरणपरिशोषितदेहां अनितरस-
तीजनसाधारणसौशील्यभूषितां अनसूयां प्रणमेति सीता
भिचोदयन् रामाय तच्चरिताद्भुतानि स्वयं शशंस । अनया
किल दशवर्षाण्यवर्षवशाद्दह्यमानेषु लोकेषु दयाविधेयहृ-
दयया दुश्चरतपश्चरणमहिम्ना विनिर्मितैः स्वादुतरमूलफ-
लैरह्नाय प्रवर्तितया जह्नुसुतया च चिरं सुखितः कृतोऽ-
खिलो लोकः । किं च दशसहस्रवर्षपर्यन्तमनुपमनियम-

नियमितप्रत्यूहमत्युग्रं तपश्चरन्त्या त्रिदशकार्यनिमित्तं दशरात्रं प्रवर्तिता रात्रिरेव ।

तामिमां सर्वभूतानां नमस्कार्यां तपस्विनीम् ।
अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा ॥

इति । तस्य मुनेर्वचनमाकर्ण्य निखिललोकपावनचरितामनुपमतपोराशिमथीमन्वर्थनामधेयामनसूयामभिगच्छेति भर्तृवदनारविन्दविनिर्गलितं वचनमकरन्दमादरेण कर्णाञ्जलिपुटेन पिबन्ती मिथिलाधिराजतनया विगलितभूतारिवर्षतया शिथिलितसकलावयवां जराधवलिमूर्धजां महाभागामनसूयां निजनामधेयकथनपूर्वकमभिप्रणम्य बद्धाञ्जलिपुटा विनयेन सर्वत्र कुशलमप्राक्षीत् ।

ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणीम् ।
सान्त्वयन्त्यब्रवीद्वृद्धा दिष्ट्या धर्ममवेक्ष्यसे ॥
त्यक्त्वा ज्ञातिजनं सीते मानवृद्धिं च भामिनि ।
अवरुद्धं वने रामं दिष्ट्या त्वमनुवर्तसे ॥
नगरस्थो वनस्थो वा पापो वा यदि वा शुभः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥

दुःशीलः कामवृत्तो वा धनैर्वापि विवर्जितः ।
स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥

नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ।
सर्वत्र योग्यं वैदेही तपः कृतमिवाव्ययम् ॥

न त्वेवमवगच्छन्ति गुणदोषमसत्स्त्रियः ।
कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥

प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि ।
अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥

त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः ।
स्त्रियः स्वर्गे चरिष्यन्ति यथा धर्मकृतस्तथा ॥

तदेवमेनं त्वमनुव्रता सती
पतिव्रतानां समयानुवर्तिनी ।
भवस्व भर्तुः सहधर्मचारिणी
यशश्च धर्मं च ततः समाप्स्यसि ॥

इदं तु पतिव्रतामाहात्म्यं प्रागेव प्रपञ्चितम् । इत्थम-
खिलसखीजनललामभूतया तयानसूयया सानुरागमभि-

हिता विदेहराजतनया प्रमुदितहृदया सती स्वयमपि ता-
मिदं वक्तुमुपाक्रमत—

नैतदाश्चर्यमार्याया यन्मां त्वमभिभाषसे ।
विदितं तु मयाप्येतद्यथा नार्याः पतिर्गुरुः ॥

यद्यप्येष भवेद्भर्ता ममार्ये व्रतवर्जितः ।
अद्वैधमुपवर्तव्यस्तथाप्येष यथा भवेत् ॥

किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ।
स्थिरानुरागो धर्मात्मा मातृवर्ती पितृप्रियः ॥

यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः ।
तामेव नृपनारीणामन्यासामपि वर्तते ॥

सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ।
मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ॥

तस्यादृशकल्याणगुणगणाभरणस्य पत्युर्नित्यमपि च-

रणशुश्रूषणादृते किमुत्तमतमं तपः । पुरा हि जनकसदने पाणिग्रहणसमये सतीजनन्यायवेदिन्या जनन्या सम्यगनुशिष्टास्मि कुलपरंपरागतमपि राज्यमुत्सृज्य पितृवचनेन दण्डकारण्यगमनोन्मुखपतिमेवानुव्रजन्ती कौसल्ययापि सादरमुपदिष्टास्मि तदखिलमधुना निजदुहितृजनहितोपदेशनिर्विशेषैः भगवतीवचनैर्मम नवीकृतमिति वदन्त्यै जनकनन्दिन्यै निरुपमनिजतपोबलार्जितम् अङ्गरागवसनभूषणादिकमनसूया प्रतिपादयामास ॥

प्रतिगृह्य च तत्सीता प्रीतिदानमनुत्तमम् ।
श्लिष्टाञ्जलिपुटा धीरा समुपास्त तपोधनाम् ॥

तदनु तया सकलभुवनविनुतया 'जानकी तव स्वयंवरकथानिशमने जनितादरमिव मे मनः; । तत्कथय यथानुभूतमुदन्तमानुपूर्व्येण' इति प्रचोदिता सीता वक्तुमारभत । अस्ति समस्तसामन्तराजचक्रमकुटमणिमरीचिमण्डलाक्रान्तपादपीठः, संततनिगमान्तसिद्धान्तविचारचातुरीधुरीणः, ब्रह्मर्षिसमचरितो राजर्षिर्जनको नाम ।

तस्य लाङ्गलहस्तस्य कृषतः क्षेत्रमण्डलम् ।
अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता ॥

स मां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः ।
पांसुकुण्ठितसर्वाङ्गीं जनको विस्मितोऽभवत् ॥

अत्र यद्यपि कृषिगोरक्ष्यवाणिज्यं वैश्यं कर्म स्वभावजमिति गीतास्थवचनपर्यालोचनया कर्षणं वैश्यधर्मः क्षत्रियस्य न धर्मः तथापि महाग्निचयनप्रकरणे षड्गवेन कृषति द्वादशगवेन कृषतीति विधिसिद्धमग्निक्षेत्रकर्षणम् । अग्निक्षेत्रकर्षणं कर्माङ्गभूतं ब्राह्मणक्षत्रिययोरपि संभवतीति तैत्तिरीयश्रुतिः । अत एव मुष्टिविक्षेपतत्पर इति प्रतिपादितम् । मुष्टिविकरणमपि या जाता ओषधय इति चतुर्दशभिर्वपतीति विधिसिद्धग्राम्यारण्यौषधिमुष्टिविक्षेपपरमिति न दोषः । तदनु द्रुतबहलरजःपुञ्जपिञ्जरितावयवां मामवलोक्य विस्मयपरवशहृदयः निरपत्यतया नित्यमपि संतप्यमानो नरपतिः निजपर्यङ्कमधिरोप्य मां राजश्रियं तवैव धर्मतस्तनयेति नितान्तमन्तरिक्षागिरापि सन्दानितानन्दः, निजावरोधभवनमासाद्य पुत्री

तवेयमागतेति ज्यायस्यै प्रेयस्यै समर्पयामास । अथ तया मम जनन्या दुहितृस्नेहनिबद्धहृदयतया तैस्तैर्नवोपलालनविशेषैः परिगलितशैशवायां मयि किंचिदिव समुदञ्चितयौवनायां जनको मदीयरूपानुरूपवरवरमपश्यन् नक्तंदिवमपि हृदयेन खिद्यमानः कंचिदुपायं चिन्तयामास । अस्ति यदिदं मदीयभवने समस्तसुरासुरस्तुतसारम्, अशेषभूमिपालैरसंभाविततोलनम्, शांभवधनुस्तदेतदुद्यम्य सम्यगवनिपालेषु यः सज्यीकरिष्यति तदलंक्रियेयं मदीयपुत्रेति प्रतिज्ञाय समावर्जितेषु मध्यमलोकपालेषु विलोक्य विन्ध्यमन्दरसमानसारं धनुर्वरमाभिवाद्य यथागतेषु न कोऽपि मौर्वीसमारोपणपारीणो बभूव। तदनु बहोः कालाज्जनकयज्ञदिदृक्षया समागतेन कौशिकमुनिना सह समागतः सलक्ष्मणो रामो मुनिवचनमुदितजनकदर्शितं कार्मुकं सविलासमेव सज्यीचकार। अथ नितान्तसंतुष्टेन जनकेन

दीयमानां न तु तदा प्रतिजग्राह राघवः ।
अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥

अत्र जीवति पितरि तदाज्ञां विना न किमपि कर्तव्यमित्युक्तोऽर्थः प्राक्प्रपञ्चितः । ततः किल तत्क्षणप्रहितदूतवचनाकर्णनसमुदीर्णपूर्णहर्षेण वसिष्ठादिभिः सह सत्वरमानीतेन दशरथेन समुज्जृम्भिते विवाहसंरम्भे प्रहृष्टचेतसा।

मम पित्रा त्वहं दत्ता रामाय विदितात्मने ।
मम चैवानुजा साध्वी ऊर्मिला प्रियदर्शना ॥

भार्यार्थे लक्ष्मणस्यापि पित्रा दत्ता मम स्वयम् ।
एवं दत्तास्मि रामाय तदा तस्मिन्स्वयंवरे ॥

इति यथातथमखिलमपि स्वयंवरवृत्तमनसूयायै निवेदयामास ॥

एकोनविंशत्यधिकशततमे— तदनु जनकनन्दिनीवचनाभिनन्दिवा भगवत्यनसूया परिष्वज्य बाहुभ्यामाघ्राय च मूर्धनि । सादरं भुवि भगवानरविन्दबान्धवः चरमाचलशिखरं परिष्कुरुते ।

संप्रवृत्ता निशा सीते नक्षत्रसमलंकृता ।
ज्योत्स्ना प्रावरणश्चन्द्रो दृश्यतेऽभ्युदितेऽम्बरे ॥

गम्यतामनुजानामि रामस्यानुचरी भव ।

अनेन पत्न्या रात्रौ भर्तृसमीप एव शयनं कर्तव्यमिति सूचितम् । तथा च तच्छेषो बोधायनः— 'तस्याः सह पत्या पूर्वरात्रा उपसंवेशनम् अर्धरात्रादधः शयनम् आ ब्रह्ममुहूर्तात् । अथोपोत्थाय नित्यान्यारभते' इति । भर्तुः समीपशयनाकरणेन दोषमाह मनुः— 'पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥' इति । अस्यार्थः पानं मद्यादेः दुर्जनसंसर्गः पारदारिकसंभाषणादि पत्या च विरहः पतिशयनदेशादन्यत्र शयनम् अटनम् परगृहादौ स्वप्नः अकाले अन्यगेहवासः स्फुटः इति । तदनुजानामि गम्यतां रघुवरपरिसरमङ्गरागादिभिरलंकुरु तवाङ्गयष्टिमिति सीतामुवाच । सीतापि अनसूयावचनेन दिव्याङ्गरागवसनभूषणादिभिरलंकृतनिजतनुलता पुनरपि तामभिप्रणम्य रामान्तिकमागत्य सर्वमपि वृत्तं निवेदयामास । रामोऽपि

तपस्विनीदत्तमुत्तमं प्रीतिदानमवलोक्य लक्ष्मणेन सह संहृष्टमनास्तदाश्रम एव तां निशां विगमय्य प्रभातायां निशीथिन्यां कृतपूर्वाह्णिकः हुताग्निहोत्रान्मुनीन् गमनायामन्त्रयामास। ततः प्रस्थितौ रामलक्ष्मणौ संवीक्ष्य

तावूचुस्ते वनचरास्तापसा धर्मचारिणः।
रक्षांसि पुरुषादीनि नानारूपाणि राघव॥

वसन्त्यस्मिन्महारण्ये व्यालाश्च रुधिराशनाः।
उच्छिष्टं वा प्रमत्तं वा तापसं धर्मचारिणम्॥

अदन्त्यस्मिन्महारण्ये तान्निवारय राघव।

अत्रोच्छिष्टादिनिमित्ते सति पुरुषं रक्षांसि प्रधर्षयन्तीति उक्तम्। तथा चानुशासनिके— प्रमथान्प्रति देववचनम्— भवन्तो वै महाभागा अपरोक्षनिशाचराः। उच्छिष्टानशुचीन्क्षुद्रान् कथं हिंसथ मानवान्। श्रोतुमिच्छामि युष्माकं सर्वमेतन्निशाचराः। प्रमथा ऊचुः— मैथुने सदोच्छिष्टाः कृते चैवाधरोत्तरे। मोहान्मांसानि

खादेत वृक्षमूले च यः स्वपेत् ॥ आमिषं शीर्षतो यश्च पादतो यश्च संविशेत् । एते उच्छिष्टकाः सर्वे बहु च्छिद्राश्च मानवाः ॥ उदके चाप्यमेध्यानि श्लेष्माणं च प्रमुञ्चति । एते भक्ष्याश्च वध्याश्च मानुषा नात्र संशयः । एवंशीलसमाचारान् धर्षयामो हि मानवान्' इति । अतः पुरुषेणाशुचिना न भवितव्यमिति सिद्धम । तथा चापस्तम्बः—'शक्तिविषयेन मुहूर्तमप्यप्रयतः स्यात्' ।

इतीव तैः प्राञ्जलिभिस्तपस्विभिः
द्विजैः कृतस्वस्त्ययनः परंतपः ।
वनं सभार्यः प्रविवेश राघवः
सलक्ष्मणः सूर्य इवाभ्रमण्डलम् ॥

ये धर्मैकनिसर्गसिद्धरुचयो ये वेदवेद्ये परे
पुंसि ब्रह्मणि मैथिलीसहचरे भक्ता रघूणां वरे ।
ये वा कौतुकिनो रघूद्वहकथाशैलीसमाकर्णने
ये वा मर्मविदस्त एतदुररीकुर्वन्तु तैस्तैर्गुणैः ॥

प्रतिदिनमपि श्रीयज्ञेशप्रसादमुपेयुषा
गुरुवरकृपाधाम्ना श्रीमत्त्रियम्बकयज्वना ।
महति रचितेऽयोध्याकाण्डे द्वितीय इहार्थिना
प्रकटितमिदं धर्माकूतं यथामति गृह्यताम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये
चतुर्विंशतिसहस्रिकायां संहितायाम्
**अयोध्याकाण्डः समाप्तः ॥**